रस-विमर्शः

अभिनवगुप्तमम्मटजगन्नाथादीनां मतानां विवेचनेन सह काव्यरस-
विषयकाणामधिकतमानां प्रामाण्यतमानां च विचाराणां प्रस्तावः

रचयिता

नैमिषीयो हरिश्चन्द्र दीक्षितः

रस-विमर्शः

अभिनवगुप्तमम्मटजगन्नाथादीनां मतानां विवेचनेन सह काव्यरस-विषयकाणामधिकतमानां प्रामाण्यतमानां च विचारणं प्रस्तावः

रचयिता

(नैमिषीय) हरिश्चन्द्र दीक्षित शास्त्री

साहित्याचार्य, एम० ए० (अंग्रेजी, हिन्दी, संस्कृत)

पी-एच० डी०

निवृत्त उपाचार्य, हिन्दी विभाग

क्राइस्टचर्च कालेज, कानपुर

मूल्य ६० रु०

मुद्रक- शारदा प्रेस

शारदानगर, कानपुर-२०८०२५

पुस्तक का नाम
रसविमर्शः

प्रथम मुद्रण
आषाढ़ वि० सं० २०५६

जुलाई १९९९ ई०
मुद्रित प्रतियाँ ५००

मुद्रापक
डा० हरिश्चन्द्र दीक्षित
डा० शिवबालक द्विवेदी

सर्वाधिकार
लेखकाधीन

मुद्रणकर्ता— शारदा प्रेस शारदानगर
कानपुर—२५

नैमिषीयेण हरिश्चन्द्रदीक्षितेन रचितस्य
रसनिरूपणाख्यस्य काव्यशास्त्रीयप्रबन्धस्य
विषये

रचयितुर्विज्ञापनम्

अस्मिन् रसनिरूपणाख्ये काव्यशास्त्रीये प्रबन्धे मुनिभरतात् प्रभृति पण्डितराजं जगन्नाथं यावत् संस्कृतभाषायां प्रसिद्धैराचार्यैर्यत् किमपि रसविषयकं ज्ञेयं च विचारणीयं चोक्तमस्ति तस्य सर्वस्य, एवं हिन्दी-भाषायां प्रसिद्धाभ्यां रसविचारकाभ्यां रामचन्द्रशुक्लनगेन्द्राभ्यां यत् किमपि विशेषतयाऽवधेयमुक्तमस्ति, तस्य च अस्मिन् प्रबन्धे अकृतपूर्वं संकलनं स्पष्टीकरणं च विवेचनं कृतमस्ति। यत्रावश्यकं च सम्भाव्यं चाऽऽसीत् तत्र पूर्वेषामाचार्याणां मतानि खण्डयित्वा प्रबन्धकर्त्रा स्व-कीया नवा विचारा अपि प्रकटिताः सन्ति। अन्यैर्वैशिष्ट्यैः सार्धम् 'अभिनवगुप्तेन जगन्नाथेन च भट्टनायकं प्रति कृतस्य अन्यायस्य प्रदर्शनम्, तयोः रसनिष्पत्तिव्याख्ययोः खण्डनम्, प्रबन्धकर्तुः स्वकीयं समीचीनतरं रसनिष्पत्तिव्याख्यानं चेत्यन्यद् वैशिष्ट्यम्। विद्वांस एनं प्रबन्धं कृपया पठन्तु चास्मिन् यत् प्रतिपादितं तदङ्गीकुर्वन्तो वा विवेचयन्तो वा अस्य कर्तारं कृतार्थं कुर्वन्तु। अस्मिन् ग्रन्थे किं किं प्रतिपादितमस्ति इति अस्मिन् प्रतिपादितानां विषयाणां सूचकाद् विवरणाज् ज्ञातुं शक्यते। इति

विदुषामनुग्रहणीयः
नैमिषीयो दीक्षितो
हरिश्चन्द्रः

हरिश्चन्द्र-शास्त्रिणा रचिते
काव्यशास्त्रीये प्रबन्धे

प्रतिपादिता विषयाः

मुनिभरतस्य नाट्यशास्त्रे रसविषयकं यत् किमपि उक्तमस्ति, तस्य सारसंकलनम्, तस्य गुणदोषानामुल्लेखश्च ।

सर्वेषां स्थायिभावानां परिभाषणम् । वात्सल्यस्य स्थायित्वस्य खण्डनम्, भक्तेः प्रतिबन्धितं स्थायित्वम्, कान्ता-सख्य-वात्सल्य-शान्ताभक्तीनां खण्डनम्, दानदयाधर्मवीरतानामपि खण्डनम् ।

पाश्चात्त्ये मनोविज्ञाने प्रतिपादितानां मूलप्रवृत्तीनां रससिद्धान्ते अनुपयोगः ।

व्यभिचारिभावानां परिभाषाः । मुनिभरतेन स्मृतानां व्यभिचारिभावानां संकलनम्, तेषां वर्गीकरणम्, विवेचनम् च । केषाञ्चिन्नवानां व्यभिचारिभावानां ग्राह्यतायाः प्रतिपादनम् । छलाशाविश्वासानां मनोभावत्वस्य खण्डनम् ।

स्थायिभावानां च व्यभिचारिभावानां च आलम्बनानि कारणानि वा । स्थायिभावानामाश्रयाः ।

आश्रयस्य पक्षे विभावानां द्विविधता, सामाजिकस्य पक्षे त्रिविधता । भावानामुद्बोधश्चानुभवश्च । आलम्बनगतमनौचित्यम् । आश्रयगतमनौचित्यं च ।

रसनिष्पत्तिः

भरतस्य रसनिष्पत्तिसूत्रस्य विषये विचारः । तस्य दोषाणां प्रदर्शनम् ।

भरतस्य मतानां स्पष्टीकरणस्य प्रयासः । भट्ट-लोल्लट-शंकुक-नायकाभिनवगुप्ताचार्याणां च जगन्नाथधनंजयधनिकानां च रस-निष्पत्तिव्याख्यानामुद्धरणं स्पष्टीकरणं च । अभिनवगुप्तजगन्नाथयो-र्व्याख्यानं विध्वंसनात्मकं खण्डनम् । भट्टशंकुकनायकौ प्रति अभिनवगुप्तस्य वञ्चनानामुल्लेखः । अभिनवगुप्तस्य समर्थनाय भट्टनायकं

प्रति जगन्नाथेन कृतस्य अन्यायस्य प्रदर्शनम् ।

रसनिष्पत्तिव्याख्यासु किं विभिन्नानां दार्शनिकमतानां प्रभाव इति समीक्षणाय प्रमुखदर्शनसम्प्रदायसिद्धान्तानां संग्रहणम् । भट्ट-लोल्लटशंकुकनायकानां व्याख्यासु दार्शनिकतायाः मिथ्या आरोपस्य खण्डनम् । अभिनवगुप्तजगन्नाथयोर्व्याख्ययोः दर्शनतत्त्वस्य दुरुपयोगस्य प्रदर्शनम् । भग्नावरणाचिदेव रस इत्यस्य रसस्य चिदात्मगोचरता भवति इत्यस्य च खण्डनम् ।

धनञ्जयधनिकयोर्मतेन रसस्य तात्पर्यवृत्त्या निष्पादनस्य खण्डनम् । विश्वनाथाभिमतायाः रसस्य व्यक्तेश्च खण्डनम् ।

रसनिष्पत्तिविषयकः स्वकीयो विचारः । काव्ये च नाट्याभिनये च प्रथमं समानां रसनिष्पत्तिप्रक्रियां विचार्य काव्ये च नाट्ये च पृथक् पृथक् रसनिष्पत्तिप्रक्रिययोः प्रदर्शनम् । रसनिष्पत्तये उद्दीपनानां च व्यभिचारिभावानां च स्थितिर्न अपरिहार्या । नाट्ये च काव्ये च भाव्यभावकसम्बन्धस्य प्रकारद्वयतायाः प्रतिपादनम् । रसस्य व्यंग्यार्थत्वस्य च अनुमेयार्थत्वस्य च खण्डनम् ।

रसस्य अलौकिकतायाः खण्डनम् । करुणादयो रसाः कस्मादानन्दरूपा इति विषये नवस्य तर्कस्य उपस्थापनम् । साधारणीकरणम् विभावानुभावादीनां सर्वेषां साधारणीकरणस्य खण्डनम् कवेरनुभूतेश्च । केवलमालम्बनं साधारणीक्रियत इति रामचन्द्रशुक्लस्य मतस्य समर्थनम् । वस्तुतः कविना साधारणीकृतमेवालम्बनमुपस्थाप्यते ।

—:०:—

रसविमर्शः

विषयसूचीपत्रम्

(अस्मात् पृथगपि अस्मिन्ग्रन्थे प्रतिपादिता विषया विस्तरेणप-रिगणिताः।)

प्रथमो भागः	**पृष्ठसंख्या**
स्थायिभावाः	१
द्वितीयो भागः	
व्यभिचारिभावाः	४
व्यभिचारिभावानां व्याख्या	५
तृतीयो भागः– अनुभावाः	
स्थायिभावैरनुभावाः	८
व्यभिचारिभावानामनुभावाः	१०
स्थायिव्यभिचारिभावानाम्	
कारणानि–आलम्बनानि	१३
उद्दीपनानि	१५
विभावानां विविधत्वम्	१७
भावानामुद्बोधोऽनुभवश्च	१८
आलम्बनस्वरूपम्	१८
आलम्बनगतमनौचित्यम्	१९
आश्रयगतमनौचित्यम्	२०
चतुर्थो भागः	
रसनिष्पत्तिः	२१
लोल्लटशंकुकादीनां व्याख्या	२४
अभिनवगुप्तस्य मतं सविवेचनम्	३०
नाट्यशास्त्रस्य महिमा	४८
नाट्यशास्त्रे केचिदन्ये	४९
दोषाः	
रसस्य विषये जगन्नाथस्य	

मिथ्या धारणा ४६
रसनिष्पत्तिव्याख्यासु
दर्शनशास्त्राश्रयस्य विचार: ५०
निबन्धकर्त्राभिमतरस–
निष्पत्तिप्रक्रिया ६४
पञ्चमो भाग:
साधारणीकरणम् ६६
रसरसाभासादय: ७४
स्वशब्दवाच्यता दोषस्य रसदोषा: ७७
वृथा कल्पना ८०
दशरूपकगतरसविषयक–
विचारविशेषस्य विवेचनम् ८१
रसशब्दगुणादिसम्बन्धविचार: ८२
रसानुभावि वर्ण्यं वस्तु ८४
कथानकस्य कल्पनम् ८६
अङ्गीरस:
किं कोऽप्येक एव रस: ८८
साधारणीकरणे
शुक्लस्यैव मतं साधु ९२
किं रस आस्वाद्योऽप्यस्ति ९६
अभिनवगुप्तस्य वञ्चना: ९७
सांख्यवादिव्याख्याविचार: ९८
नाट्यावलोकने रसानुभूति: १००
नगेन्द्रेण शंकुकस्य मतं १०३
स्वमतस्यारोप: रसनिष्पत्ते:
समीचीनं व्याख्यानम् १०४
साधारणीकरणविषयकं परिशिष्टम् १०५

त्रुटिशोधनम्

पृष्ठ सं०	पंक्ति:	अशुद्धम्	शुद्धम्
३	१०	दीक्षाणां चित्तादव	दोषाणां चिन्तनादेव
८१	१	प्रस्तुतस्तर्कस्य	प्रस्तुतस्तर्कश्च
६५	२०	प्रकारा	प्रकारां

रसविमर्शः

हरिश्चन्द्र दीक्षित शास्त्री
नैमिषारण्य-सीतापुर

प्रथमो भागः

स्थायिभावः- स्थायिभाव एव रसस्य प्रमुखं कारणम् । कियन्तो भवन्ति स्थायिनो भावाः? अत्र मुनिभरतेनोक्तम्-

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥

इति । अत्र गणितेभ्यो अष्टभ्यः स्थायिभावेभ्यः पृथक् वैराग्यवात्सल्यभक्तिभावनानामपि स्थायिभावत्वं विचारितमस्ति ।

१. रतिः- द्वयोर्जनयोर्मध्ये यावन्तोऽपि भवन्त्यनुकूलाः सम्बन्धास्तावन्तः प्रकाराः भवन्ति रतेः । किन्त्वत्र यस्याः रतेः स्थायिभावरूपत्वेन ग्रहणं कृतम्, सास्ति स्त्रीपुरुषयोः काम्यकान्तभावनारूपा । कामस्यैवापरा संज्ञा रतिरिति ।

२. हासः- हासोऽस्ति स प्रसादः प्रमोदो वा यो हसनेषु व्यज्यते । हसनमिति किम् ? दन्तपंक्तिप्रदर्शनेन सह हहहेति ध्वनेरुत्पादनम् । हसनं मुख्यतया भवति त्रिविधम्-सुहसनम्, विहसनम् अतिहसनम् । अतिहसनमेवास्ति अटटाहासः । सुहसनम् उत्तमस्य विहसनं मध्यमस्य, अतिहसनम् अधमस्य इति सम्भावनं नोचितम् । कदाचिद् उत्तमोऽप्यतिहसति, अधमोऽपि सुहसति । किन्तु उत्तमप्रकृतिजनः प्रायो नातिहसति । अधमप्रकृतिजनः प्रायोऽतिहसति । हासादुपहासः किमपि नितान्तं भिन्नं वस्तु । कस्यचिदङ्गविकारादीन् प्रकटान् दोषान् अज्ञत्वनिर्धनत्वादीनि वा लक्षयित्वा सहासो वा निर्हासो दुःखकरापमानाय आक्षेपो भवत्युपहासः ।

३. शोकः- हृदयस्य मनसो वा गभीरोऽवसादः शोक इति कथ्यते ।

४. क्रोधः- प्रतिकूलकर्मिणो वा प्रतिकूलवादिनो वा प्रहारेण

हरिश्चन्द्र दीक्षितः

वाक्पारुष्येण वा दमनस्य प्रवृत्तिः क्रोधः ।

५. उत्साहः- यस्मिन प्राणसंकटमपि सम्भवति तस्मिन् कर्मणि प्रसन्नतया प्रवृत्तेः संकल्प उत्साहः । दयोत्साहश्च दानोत्साहश्च भवति धर्मोत्साह एव । अन्यायप्रतिकारिणि युद्धे उत्साहो भवति धार्मिको हि उत्साहः । अति दानं प्रायः दयाया एव कार्यं लक्षणं वा । अतिदानं अतिदया परार्थे अतिकष्टसहिष्णुता क्वचिद् भवति केवलस्य विस्मयस्य कारणम्, क्वचित् सविषादस्य विस्मयस्य । गुरुजनेष्टसिद्धये, गुरुजनाज्ञापालने वा अतिकष्टसहनं गुरुभक्तेरनुभाव एव ।

६. भयम्- यस्मात् स्ववधस्य महत्या हानेर्वा संकटं सम्भवति तस्मात् स्वस्य असामर्थ्यस्य कारणात् दूरेऽपसरणाय मनसः कष्टकारिणी प्रवृत्तिर्भयम् ।

७. जुगुप्सा- कुरुचिकारणाद् वस्तुनो दूरेऽपसरणस्य मनः प्रवृत्तिर्जुगुप्सा ।

८. विस्मयः- अतिविचित्रसत्त्वकर्मश्रवणदर्शनजन्यमोहयुक्तहर्षो विस्मयः ।

९. वात्सल्यस्य न स्थायिभावत्वम्-वत्सान् प्रति गुरुजनानां भवति स्थिरा प्रीतिः पुत्ररतिर्वा । किन्तु सा सामाजिकैः केवलमनुमातुं शक्यते । शिशूनां स्वाभाविकीनां चेष्टानां वर्णनात् सामाजिके स्वभावोक्तेरेवानन्दो जायते, न पुत्रप्रीतिः । अतो वात्सल्य वा पुत्रप्रीतिर्वा न भवति स्थायी भावः । लोभस्य भवति यद्यपि स्थायित्वम् । किन्तु अस्य सहानुभूतिर्न सम्भवति । अपितु लोभिनं प्रति सामाजिकेषु घृणा जायते ।

१०. भक्तेर्देवताविषयकरतेर्वा प्रतिबन्धितं स्थायित्वम्- ये नास्तिकाः निरीश्वरवादिनो वा, अथवा केवलस्य निराकारस्य ब्रह्मण आराधकास्तेषां कृते भक्तिर्वा देवताविषयक रतिर्वा न भवति स्थायिभावः । ये साकारस्य वा सगुणस्य वा ईश्वरस्य उपासकास्तेषां कृत एव भक्तिर्भवति स्थायिभावः । हिन्दूनां सगुणभक्तौ सम्प्रदायभेदोऽपि

हरिश्चन्द्र दीक्षितः

भवति । प्रायशो रामभक्तानां रामभक्तिरेवाह्लादिनी, कृष्णभक्तानां कृष्णभक्तिरेव ।

कान्ताभक्तिः वात्सल्यभक्तिः, सख्यभक्तिश्च शान्ताभक्तिश्च न सम्भवन्ति । कान्ताभक्तौ सत्यतो रतिरेवानन्ददायिनी । वात्सल्यस्य च सख्यस्य च केवलमनुमेयत्वम् । यत्र शुद्धात्मज्ञानरूपा शान्तिस्तत्र शुद्धवैराग्यम् । भक्ती रागरूपा । अतो न सम्भवति शान्ता भक्तिरपि ।

११ वैराग्यं वा निर्वेदो वा- वैराग्यं वा निर्वेदो वा भवति केषाञ्चित् ज्ञानिनामवश्यं स्थिरा चित्तवृत्तिः । किन्तु नाट्ये वा काव्ये वा सामाजिकैः सा प्रायोऽनुमातुमेव शक्यते, गुरुजनभातृसखिप्रीतावपि कैश्चिदेवाऽनुभवितुमपि । निर्वेदस्य वैराग्यस्य वा उद्दीपनान्येव भवन्ति मूर्तानि । आलम्बनं न भवति मूर्तम् । स्वशरीरावस्थानां च संसारस्य दीक्षाणां चित्तादेव जायते वैराग्यम् । लोके वैराग्यस्य स्थिरत्वे न संशयः । किन्तु सामाजिकानामनुभूतेर्दृष्ट्या अस्य स्थायित्वं स्वीकर्तुमपि शक्यते नापि स्वीकर्तुमपि ।

रतिहासोत्साहविस्मयनिर्वेदाश्च भवन्ति सुखात्मिकाश्चित्तवृत्तयः । वत्सलताभक्ती चापि सुखरूपे एव क्रोधभयशोकजुगुप्साः दुःखात्मिकाश्चित्तवृत्तयः ।

रतिहासोत्साहशोकविस्मयवत्सलताभक्तिषु भवति रागः क्रोधभयजुगुप्सावृत्तिषु भवति द्वेषः । वैराग्ये वा निर्वेदे वा न भवति रागो न च द्वेषः । रतौ च शोके च भवति चित्तस्य द्रुतिः । एवमेव वात्सल्ये च भक्तावपि । हासोत्साहे क्रोधे च भवति दीप्तिः । भये च जुगुप्सायां च भवति चित्तसंकोचः । निर्वेदे वा वैराग्ये वा भवति चित्तस्य स्थिरा अविकृतिः ।

पाश्चात्त्ये मनोविज्ञाने या आत्मरक्षा-आत्मप्रकाशन-भोजनान्वेषण-संघबद्धता — संग्रहशीलतेत्यादिभिः संज्ञाभिः चतुर्दशमूला मनःप्रवृत्तयः कल्पिताः सन्ति, तासां रससिद्धान्तेन सह न कोऽपि उपकार्योपकसम्बन्धः ।

हरिश्चन्द्र दीक्षितः

रतिहासोत्साहक्रोधशोकभयजुगुप्साविस्मयभक्तिनिर्वेदस्थायिभावाः क्रमशः शृङ्गारहास्यवीररौद्रकरुणबीभत्साद्भुतभक्तिशान्त-रसानां प्रमुखानि कारणानि।

स्थायिभावानां 'स्थायित्वम्' रसस्य 'स्वरूपम्' च अग्रे परिभाष-यिष्येते ।

द्वितीयो भागः

१ व्यभिचारिभावाः– ये स्थायिभावेषु व्यभिचरन्ति संचरन्ति वा ते व्यभिचारिणो वा सञ्चारिणो भावाः। एको व्यभिचारिभावो बहुषु स्थायिषूत्पद्यते, अनेके वा व्यभिचारिभावा एकस्मिन्नेव स्थायि-भावे जायन्ते । इदमेव तेषां व्यभिचारित्वम् । कस्मिंश्चित् स्थायि-भावे उद्बुद्धे हि कोऽपि व्यभिचारी उदयति । स्थायिनि वर्तमाने हि स विलीयतेऽपि । किन्तु दया घृणा (दुःशीलान् प्रत्युपक्षा, जुगुप्सायाः पृथक्) (अपमानजन्या) लज्जा उदारता (समता) इति केचित् व्यभिचारिणः (अप्रधानाः) मनोभावाः स्थायिभावेभ्यः स्वतन्त्रतया अपि उद्भवितुं शक्नुवन्ति ।

निर्वेदश्लानिशंकाख्यास्तथाऽसूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥
क्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मति - र्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥

ना० शा० ६

अत्रैतद् ध्यातव्यं यद् भरतेन न स्थायिभावा न च खलु व्यभि-चारिभावाश्च मनोभावा इत्युक्ताः। किन्तु स्थायिभावास्तु सर्वेऽपि मनोभावा एव । तद्विपरीतं सर्वेषां व्यभिचारिभावानां न

हरिश्चन्द्र दीक्षितः

मनोभावरूपत्वम् । कस्मिंश्चित् स्थायिभावे मनसि उत्पन्ने तस्य प्रभावात् कार्यरूपत्वाद् वा मनसि च बुद्धौ च शरीरे च यः कश्चिदन्यो विकार उत्पद्यते स भरतेन व्यभिचारिभाव इति संज्ञितः। भरतेन स्मृतषु त्रयस्त्रिंशत्सु व्यभिचारिभावेषु निर्वेदः (अरुचिर्न खलु स्थिरा विरक्तिः) ग्लानिः शंका असूया (ईर्ष्या) दैन्यम् चिन्ता धृतिः व्रीडा चपलता हर्षः गर्वः विषादः औत्सुक्यम् इत्येते हि भावा वस्तुतो मनोभावाः। स्मृतिर्मतिश्च बुद्धिव्यापाराः । श्रम आलस्यं मोहः (मूर्च्छा) जडता निद्रा अपस्मारः (व्याधिविशेषः) विबोधः (जागरणम्) व्याधिः मरणम् इत्येताः शरीरावस्थाविशेषाः, याः कस्यचिन्मनोभावस्यानुभावरूपत्वेन जायन्ते । इमाः सर्वाः पुनः स्वलक्षणैरभिनेया । अत एव व्यभिचारिसु परिगणिताः । मदो मदिरापानजन्यमनोबुद्धिविकारः । आवेगत्रासौ तु भयरूपावेव। उदितमनोभावविशेषगोपनप्रयासोवहित्थेति उक्तोऽस्ति । उग्रतामर्षौ क्रोधस्यैव दशाविशेषे । व्रीडा लज्जाया अपरं नाम । लज्जा भवति द्विविधा द्विप्रकारमनोभावरूपा वा। तयोरेका सुखात्मिका, उपसारिका लज्जा या नारीसु कामानुरागप्रारम्भे जायते । दुःखात्मिका अपसारिका लज्जा अन्या या अपमानात् स्वच्छिद्रापावरणाद् वा जायते । एतस्या अतिरिक्ताः केचिदन्येऽपि भवन्ति व्यभिचारिणो मनोभावाः । त इमे दया संकोच उदारता च घृणा च । अतः समग्रतया मनोभावरूपा व्यभिचारिणो भवन्ति अष्टादश ।

व्यभिचारिमनोभावानां व्याख्या–

१– निर्वेदो निर्विण्णता अरुचिर्वा– निर्वेद इति शब्दो वैराग्यार्थः । प्राचीनैराचार्यैः निर्वेद इति शब्दस्तस्या अरुचेरर्थे प्रयुक्तोऽस्ति या वियोगादिजन्ये मनःकष्टे इष्टेषु भोगेषु हासविनोदे सखिजनमिलने च कष्टान्तावधि यावद् विरतिरूपत्वेन जायते । इयमरुचिर्निर्विण्णता इति वक्तुं शक्यते यद्यपि निर्वेद इति शब्दस्यैव रूपान्तरं निर्विण्णतेति शब्दः ।

हरिश्चन्द्र दीक्षितः

२. ग्लानिः–हठवशात् प्रमादवशाद् वा कस्मिश्चित् कृते दुष्कर्मणि तस्य दुष्परिणाम उत्पत्तौ च सम्भावनायां वा यो मनसि जायते पश्चात्तापः स एव ग्लानिः। मुनिर्भरतः केनापि दुःखेन जनितां शरीरक्षीणतां ग्लानिममन्यत, यस्याः वस्तुतः पश्चात्तापस्यानुभावत्वम्।

३– शंका– अज्ञातभाविविषये अनिश्चयात्मिका प्रतिकूला सम्भावना शंका। शंकाया एव अपरे नामनी संशयसन्देहौ। अज्ञातभावि इति किम्? कोऽपि शत्रुः किं प्रतिकूलं चरितुं शक्नोति इति। प्रोषितस्य प्रियजनस्य का विपत्तिर्भवितति वा।

४- असूया (ईर्ष्या)- यन्ममापि काम्यम् तदन्येन तु लब्धम्, न मयेति या दुःखसम्वेदना सा असूया।

५-दैन्यम्- बले च ज्ञाने च धने च पुण्ये च आत्महीनत्वस्यानुभवो दैन्यम्।

६- चिन्ता– अनिष्टस्य उत्पत्तौ सम्भावनायां वा तत्प्रतिकारस्याऽसामर्थ्याज्जाता दुःखानुभूतिश्चिन्ता।

७- धृतिः– विपत्तौ स्वकर्तव्याद् अविचलनम् स्वबुद्धेः पूर्ववद् व्यवस्थितिश्च धृतिः।

८- व्रीडा– काम लज्जा- रतिसम्भावनायाम् उपसरणेच्छया सह (विशेषतया नारीणां) सुखदः संकोचः।

९- चपलता– क्रोधशोकभयाद्यावेगकारणाद् उत्पन्ना निश्चयहीनताऽविवेकिता वा।

१०- हर्षः– इष्टोपलब्धौ कस्मिश्चिन्मनोऽनुकूले घटिते वा उत्पद्यमान आनन्दः।

११- विषादः– अनिष्टोपलब्धौ कस्मिश्चिन्मनः प्रतिकूले घटिते वा अनुभूयमानं मनः कष्टम्। प्रियजनमृत्यौ भवति शोकस्तद्वियोगे भवति विषादः।

हरिश्चन्द्र दीक्षितः

१२- गर्वः (अहंकारः) – स्वसौन्दर्यजनगुणबलसौभाग्यसम्पत्ति-शास्त्रादिज्ञानातिरेकभावनया अहमन्येषामभिभावक इति प्रत्ययो भवति गर्वः ।

१३- औत्सुक्यम्– उत्कण्ठेत्यौत्सुक्यम् । इष्टवस्तु वा प्रियजनो वा शीघ्रातिशीघ्रं दृश्यताम् प्राप्यताम् इति मनोव्याकुलता उत्सुकता ।

१४- दया– परदुःखं दृष्ट्वा स्वचित्तस्य द्रुतिः तत्साहाय्यप्रवृत्तिश्च दयैव करुणा । अशोकवाटिकायां रावणेन त्रस्ता सीता जायते मन्दो-दर्यास्त्रिजटायाः हनुमतश्च दयाया आलम्बनम् ।

१५- संकोचः– श्रद्धेयगुरुजनसन्निधौ विनीतलघुजनानां संभ्रमः विनयो वा ।

१६- उदारता– चित्तद्रुतिं विना अन्यैः सह व्यवहारेषु आत्मी-यत्वस्य समत्वस्य च प्रदर्शनम् ।

१७- घृणा– चौर्यद्यूतमदिरापानलोभलम्पटत्वादिदुर्व्यसनग्रस्ता-ज्जनादसम्पर्कस्य प्रवृत्तिः ।

मोहनिद्रापस्मारादीनामाभासिकं व्यभिचारित्वम्–

साधारणतया सर्वेषां स्त्रीपुरुषाणां जीवने जीवनस्य लक्षणानां रूपत्वेन स्वभावतया श्रमनिद्राजाग्रतिस्वप्नदर्शनादयः क्रिया अनुदिनं समाप-द्यन्त एव । स्वभावतया भवमानासु इमासु जीवनीयक्रियासु न किमपि व्यभिचारभावित्वम् । न च खलु स्वशरीरे दोषदुर्घटनाकारणाज् जातेषु मोहापस्मारव्याधिमरणेषु । मदो मदिरापानसम्भूतश्चित्तविकारो न स्वाभाविकी जीवनक्रिया न च स्वाभाविकशरीरदोषः । किन्तु उद्-बुद्धस्य कस्यचित् स्थायिमनोभावानुभावक्रिया प्रभावाज् जातानां श्रमनिद्रास्वप्नदर्शनजाग्रतिमूर्च्छाव्याधिमरणादीनां रसनिष्पत्ति-प्रक्रियायां जायते मान्यते वा व्यभिचारिभावत्वम् । एवमेव उदिते रतिस्थायिभावे कामोद्दीप्तिकामसुखवर्धनपीतमदिराजातमदो व्यभि-चारिभावत्वं याति । श्रमनिद्रास्वप्नदर्शनजाग्रतिमोहादयो जीवन-क्रियारूपत्वेन जायन्तां वा उद्बुद्धस्थायिभावविशेषप्रभावरूपत्वेन वा

हरिश्चन्द्र दीक्षितः

इमेषामपि सर्वेषां स्थायिव्यभिचारिमनोभाववद् भवन्ति अभिनेयानि अनुकरणीयानि वा लक्षणानि ।

तृतीयो भागः

स्थायिव्यभिचारभावानाम् अनुभावा लक्षणानि वाअनुभाव इति किम्? यः कस्माच्चिन् मनोभावाद् अनुभवति तस्य पश्चाद् भवति वा सोऽनुभावः । मनोभावं योऽनुभावयति वा सोऽनुभावः । यदि कोऽपि मनोभावो न दम्यताम्, तर्हि स स्वतो वाग्विकारविशेषेसु (सार्थं) वचनविशेषेषु शरीरविक्रियाविशेषेसु, चेष्टाविशेषेषु च अभिव्यज्यते । कोऽपि मनोभावो येषु प्रत्यक्षेषु- वाग्विकारविशेषादिसु व्यज्यते, तेऽनुभावा इति कथ्यन्ते ।

एवमनुभावाः प्राथम्येन भवन्ति द्विविधाः—वाचिकाश्चाङ्गिकाश्च । अनयोः पुनः प्रत्येकस्य द्विविधत्वम् । वाचिकानामनुभावानाम् १– शब्दार्थहीनध्वनयः यथा सीत्कारचीत्कारहुंकारगर्जनादयः, २– कार्यकर्मज्ञापकानि शब्दार्थवचनानि चेति द्वौ भेदौ । आङ्गिकानामनुभावानाम् १- शरीरविक्रियारूपानुभावाः यथा वैवर्ण्यम्, वेपथुः जडत्वम् इत्यादयः । २- शरीरचेष्टारूपाश्च यथा धावनम्, पलायनम्, प्लवनम् प्रहरणम् इत्यादि ।

आहार्यानुभावः स्वमनोभावविशेषस्य व्यंजनाय सूचनाय वा जना चिह्नविशेषं वेषविशेषमपि वा कदाचित् कृत्रिमतया धारयन्ति । मनोभावस्य सूचकः कृत्रिमोऽयमनुभावः आहार्योऽनुभाव इति कथ्यते ।

निद्रादीनाम् अमनोभावरूपत्वाद् यैरिमाः जीवनक्रियाः ज्ञायन्ते लक्ष्यन्ते वा तानि भवन्ति अनुभावेभ्यो भिन्नानि ज्ञापकानि लक्षणानि वा । अतः लक्षणम् अस्ति जीवक्रियाविशेषसूचकं तल्लिङ्गं येन निद्रामोहादिषु कस्यचिद् आभासिको व्यभिचारिभावो लक्ष्यते ।

स्थायिभावानामनुभावाः

१– रतिस्थायिभावस्य निर्निमेष– निरीक्षणम्, तिर्यग्दृष्ट्यावलोकनम्, व्याजेनावलोकनम्, सुरमितिर्मन्दहसनं बत वा, साहाय्यम्

हरिश्चन्द्र दीक्षितः

उपकारो वा संगीतकाव्यादिषु स्वकौशलस्य प्रदर्शनम् उपहारप्रदानम् अन्यैः सह भाषमाणस्य प्रियस्य भाषमाणायाः प्रियायाः वा वचनानां ध्यानेन श्रवणम्, सम्पृक्ते परिचये जाते आश्वासनं, प्रशंसनम्, विविध-प्रकारकेषु वचनेषु अनुरागस्य प्रकाशनम् । व्याजेन स्पर्शः, आलिङ्गनम् चुम्बनम् इत्यादयो भवन्ति सामान्या अनुभावाः स्त्रीपुरुषाणाम् । विलोक्य नेत्रयोर्वा मुखस्य वा अधोनमनम् कान्तस्य दृष्ट्या सह मिलितायाँ स्वदृष्टावन्यत्रावलोकनम्, मुखस्य रक्तीभवनम्, वक्षसः स्तनोर्ध्वभागस्य नाभेश्च व्याजेन प्रदर्शनम् अंकस्थशिशोश्चुम्बनम्, इत्यादयो स्त्रीणां विशेषाः ।

२- हासस्य- हसनं, करतलवादनम्, उत्प्लवनम् ।

३- उत्साहस्य- मुखेतेजोवृद्धिः, भालग्रीवावक्षसाम् उन्नमनम्, उत्प्लवनम्, साटोपं परिक्रमणम्, हुंकरणम्, गर्जनम्, वचसा स्वशक्ति-प्रकाशनम्, परिकरकर्षणम्, शस्त्रधारणम् इत्यादयोऽनुभावा भवन्ति ।

४- क्रोधस्य- भवन्ति भ्रूकुञ्चनमुखरक्तीभवनोच्छ्वसनदन्तपेषणाधरचर्वणशरीरकम्पनहुंकरणप्रहारोद्यमदुर्वचनादयोऽनुभावाः ।

५- शोकस्य- रोदनाश्रुस्रावणविलपनचीत्कारवक्षस्ताडनवस्त्र-भूषणापसारणवलयभञ्जनहाहाक्रन्दनादयोऽनुभावाः ।

६- भयस्य- मुखवैवर्ण्यकण्ठशोषस्वरभंगजडत्वकम्पस्वेदपलायना-त्मगोपनरक्षार्थावाहनक्रन्दनादयोऽनुभावाः ।

७- जुगुप्सायाः- दूरापसरणाक्षिनासासंकोचश्वासरोधननासाछिद्राच्छादनथूत्करणवमनमूर्च्छनादयोऽनुभावाः ।

८- विस्मयस्य- अर्थविस्तारमुखविवृति निर्निमेषावलोकनाश्चर्य-सूचकशब्दोच्चारणादयोऽनुभावाः ।

९-- स्थिरनिर्वेदस्य वैराग्यस्य वा- विषयविरतीन्द्रियदमनसदा-त्माचिन्तनैकान्तवासपुण्यतीर्थशान्तपर्वतक्षेत्रभ्रमणादयोऽनुभावाः ।

१०- वात्सल्यस्य-शिशोः पालनं, लालनं, मण्डनम्, स्वादुस्वाद्यमृष्टान्नस्य अर्पणम्, अंके निधानम्, तस्य स्वाभाविकीसु चेष्टासु अस्फुटवचनेषु

हरिश्चन्द्र दीक्षितः

हर्षानुभवनम् इत्यादयोऽनुभावाः ।

११- भक्तेरिष्टदेवरतेर्देवश्रद्धायाः वा- इष्टदेवविग्रहस्य विविधोपचारैः पूजनम्, तन्नामजपगुणकीर्तनवन्दनं च भवत्यनुभावनम् ।

व्यभिचारिभावानामनुभावाः

१ निर्विण्णता अरुचिर्वा- भोजनविश्रामनिद्राविनोदपरिहासप्रसाधननवस्वच्छवस्त्रभूषणधारणादिषु प्रियजनेष्टवस्तूपलब्धि यावद् अनिच्छैव निर्विण्णताया अनुभाविका ।

२ ग्लानिः- शरीरपाण्डुत्वकृशत्वोच्छ्वसनरोदनादिभिरनुभाव्यते । भरतस्य मतो विषादचिन्तादिकार्यरूपशरीरकृशत्वपाण्डुत्वादीनां ग्लानित्वम् । किन्त्वयम् अनुभावः ।

३ शंकायाः अनुभावाः- अमनस्कत्वम् शून्ये वा कस्मिंश्चिद् वस्तुनि वा तदलक्षिणी स्थिरा दृष्टिरधोदृष्टिर्वा ।

४ असूयाया अनुभावाः- उपेक्षणम् कटुवचनं निन्दनम्, स्वोपलब्धिप्रशंसनम् ।

५ दैन्यस्य प्रभुत्वसम्पन्नजनेभ्यो दूरेऽवस्थानम्, संकोचः याचनम्, स्वेषां दोषाणां स्वेषामभावानां च स्ववचनैः प्रकाशनम् इत्येतेऽनुभावाः।

६ चिन्ताया अमनस्कत्वम्, कृशत्वम् निद्राया अभावः सहसा-निद्राभंगः भोजनादिष्वरुचिः दीर्घकाल यावत् स्थिरमुपवेशनम् ।

७ धृतेः अम्लानता तेजोवृद्धिर्वा स्वकर्मसु पूर्ववत् प्रवृत्तिः ।

८ क- रतिलज्जाया- मुखस्य रक्तीभवनम्, अधोदर्शनम् कदाचिन् मुखाधरशोषः वचनस्यास्फुटत्वं च कृत्रिमापसरणयत्नः, कृत्रिम एव विरोधश्च ।

८ ख- अपमानजन्यलज्जाया- मुखस्य नमनम्, शोषः, स्वरभङ्गः, कृत्रिमतया हसनम्, दूरेऽपसरणम् इत्येते भवन्त्यनुभावाः ।

९ चपलता- अकार्येषु प्रवृत्त्या, अवचनीयस्य वचनेन च प्रकाश्यते ।

१० हर्षस्य मुखकान्तिवृद्धिशरीरदीप्ति- भोजनविनोदपरिहासरुचिकार्यकर्माचरणादयो भवन्त्यनुभावाः ।

हरिश्चन्द्र दीक्षितः

११- विषादः प्रायश्चित्ताया अनुभावैरेवानुभाव्यते ।

१२- गर्वस्य भालोन्नतिः वक्षसः उद्धरणम साटोपं चलनम् भव्य-वस्त्र'भूषणानां प्रदर्शनप्रवृत्त्या धारणम् स्वविभूतिशक्तिप्रशंसनम् इत्येते भवन्त्यनुभावाः ।

१३- औत्सुक्यम्- ग्रीवाया उद्धरणम्, वारं-वारं पथि निरी-क्षणम्, परस्य वचनानाम् उत्कर्णत्वेन श्रवणम् प्रतीक्षायाम् इतस्ततो भ्रमणम्, अचलतया पद्भ्यां स्थितिरित्येतैरनुभावैर्ज्ञायते ।

१४- दयायाः दयनीयस्य निकटे गमनम् तस्य यत् साहाय्यमभीष्टं तस्याचरणम्, तस्य सान्त्वनम् आश्वासनं वा इत्येतेऽनुभावाः ।

१५- संकोचः गुरुजनानां समक्षं वस्त्राणि चाङ्गानि च समाहृत्य अप्रसार्य वा उपवेशनम् अल्पं भाषणम् अनुच्चैः स्वरैर्वचनम् इत्याभिर-नुभावैर् ज्ञायते ।

कामलज्जा अपमानलज्जा विनयलज्जा च संकोचो वा भवन्ति लज्जाया एव त्रयः प्रकारा इत्यपि मन्तुं शक्यते ।

१६- उदारता- अस्या भवन्ति स्वागतं सम्माननं शिष्टभाषणं साम्येन व्यवहरणं बहुजनहितसंकल्पनम् इत्येते भवन्त्यनुभावाः ।

१७- घृणाया अनुभावाः- उपेक्षणम् असम्पर्कः, विमुखीभवनम्, अवचनम्, दुत्कारणम् निन्दनम् ।

मोहस्मृतिनिद्रादीनां लक्षणानि

१- मोहस्य मूर्च्छायाः वा- भूमौ सहसा निपातः, केशवस्त्रादी-नामस्तव्यस्तता, चक्षुषोर्निमीलनम् इति ।

२- स्मृतेः शून्ये वा कुत्रचिद् वा स्थिरा दृष्टिः, मुखस्य शनैरू-र्ध्वमधश्चालनम्, भालत्वचः संकोचनम्, भ्रुवोरुत्कर्षणम् इति ।

३- जडतायाः अङ्गेषु नियंत्रणाभावः- पलायनादौ असामर्थ्यम् इति ।

४- निद्रायाः- जृम्भणम् पार्श्वोपरि पृष्ठोपरि वा शयनम् चक्षु-षोर्मीलनम् अर्धमीलनं वा केशानां चाङ्गानाम् इतस्ततः प्रसारः,

श्वासानां दीर्घत्वम्, वक्षउदरयोरुन्नमननयनयोर्लक्ष्यता आननस्य किञ्चिद् वैवर्ण्यम् मुखस्य विवृतिश्च ।

५- सुप्तस्य स्वप्नदर्शनस्य वा- निद्रायामेव करपदयोश्चालनम्, किमपि वचनम्, चीत्कारः, चकितत्वेन सह सहसा जागरणम् इति ।

६- अपस्मारस्य- सहसा भूमौ पतनम् चक्षुषोर्निमीलनम् दन्तपंक्त्योर्बन्धनम्, कम्पनम् मुखात् फनस्य निस्सरणम् ।

७- विबोधस्य जागरणस्य वा- शयनमुद्राया उत्थानम् चक्षुषोर्मर्दनम्: जृम्भणम्, अङ्गानां प्रसारणम् ।

८- अवहित्थस्य उदितभावविशेष गोपनस्य वा- मुखस्य नमनम्, अन्यत्र दर्शनम्, अन्यत्र गमनम् कस्मिन्नपि कार्यान्तरे प्रवृत्तिः ।

९- मतेः- शास्त्रानुशीलनाद् बुधजनवाक्यश्रवणात् स्वतो मननाद् वा जातस्य प्रबोधस्य मुखे कान्तेरुदयः शरीरे स्फूर्तिः साधुक्रियासु प्रवृत्तिरिति ।

१०- व्याधेः विशेषतो ज्वरस्य, शयनम्, अंगान्तं क्षेपणम् शरीरतपनम्, कृशत्वं वैवर्ण्यम्, निद्रा क्षुधाभाव इति ।

११- उन्मादस्य- प्रलापः मौनधारणम् वा निरुद्देश्यतया इतस्ततो धावनम्, स्थिर उपवेशः स्थिरा वा पद्भ्यां स्थितिः, वेषभूषास्वनवधानम् व्यर्थेषु असम्बद्धेषु कार्येषु वा प्रवर्तनम् इति ।

१२- श्रमस्य- उपवेशनम्, शयनम्, शैथिल्यं, कर्मणि अप्रवृत्तिः, वदनानुभव इति ।

१३- आलस्यस्य- उपवेशनम्, शयनम्, कर्मणि अप्रवृत्तिः ।

१४- मदस्य- प्रलपनम् घूर्णनम् अतिहसनम् ।

१५- वितर्कस्य- संशयस्य लक्षणैः सह वचसा व्यक्तानि विकल्पनानि इति लक्षणानि ।

१६- मरणस्य- शयनम्, श्वासस्य, नाडिहृदयगत्योः स्थगनम्, शनैः शनैः शरीरे शैत्यस्य इति लक्षणानि ।

आवेगत्रासौ भयरूपावेव । अमर्षः क्रोध एव क्रोधश्च कार्यं वा ।

हरिश्चन्द्र दीक्षितः

उग्रता क्रोधस्यैव दशाविशेषा ।

छलं भवति वञ्चनाउपायविशेषः । आशा भवत्यपुष्टहेतुकमनुमानम् । विश्वासः पुष्टहेतुकमनुमानम्, कामं तत्रापि कालान्तरे हेतुपुष्टिभ्रंमजन्यैव मिथ्या हि सिद्ध्येत । अतो छलाशाविश्वासानां न मनोभावत्वम् ।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभंगोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥

अत्र सात्त्विकभावा इति संज्ञया ये अष्ट भावाः स्मृतास्ते वस्तुतया अनुभावा एव । इमे अनुभावाः केनचित् स्थायिभावेन सत्त्वस्य मनसो वा अतिशयेन अभिभूतत्वादुत्पद्यन्ते । एतेषु केचिद्व्यभिचारिष्वपि परिगणिताः । इयमव्यस्थावा स्तम्भो जडतैव । वेपथुरिति कम्पस्यापरा संज्ञा । स्वरभङ्गो वचनशक्त्यवसादः । वैवर्ण्यं मुखाद्यङ्गानां श्वेतता पाण्डुता वा । अश्रु रोदनस्य लक्षणम् । अतो रोदनमेव । मरणमेव प्रलय इत्यपि कथ्यते ।

स्थायिव्यभिचारिभावानाम्
कारणानि आलम्बनानि

आलम्बनं कारणं वा— तच्चेतनं वा जडं सत्त्वं काव्यशास्त्रे आलम्बनम् इति कथ्यते यत् केवलं स्वस्य रूपाकृत्या अथवा रूपाकृत्या सह स्वस्य चेष्टाभिश्च स्वस्य शब्दार्थहीनैः सशब्दार्थैर्वा ध्वनिभिः तत्प्रत्यक्षीकर्तुः कस्यचिन्मनसि कमपि स्थायिभावं वा व्यभिचारिभावं वा उभयप्रकारको भावौ वा उत्पादयति ।

सम्भवतो मुनिभिरतः स्थायिव्यभिचारभावानां कस्यचिन्मनसि उत्पत्तेः कारणस्यार्थे आलम्बनेति शब्दं न प्रयुक्तवानस्ति । स आलम्बनोद्दीपनयोर्विभागमपि नह्यकार्षीत् तथोभौ समत्वेन विभावेति समज्ञापयत् । तस्य मते विभाव एव भवति कारणं विभावा एव वा भवन्ति स्थायिभावस्य कारणानि । इयमव्यवस्था । यो विभावः स एव स्थायिभावस्य कारणम् ।(स्थायिभावस्य) कारणानि भवन्ति लोके, काव्ये वा नाट्ये भवन्ति विभावा इति न तस्य कल्पना। लोके यो भावानुभवस्तस्मात् काव्ये वा नाट्ये वा रसानुभवो भवति

हरिश्चन्द्र दीक्षितः

भिन्नः । अथ विभाव इति कस्मात । विभावो नाम विज्ञानार्थः । विभावः कारणं निमित्तं हेतुरिति पर्याया इति भरतः । यद् वा यं वा रस आलम्बते तद् वा स वा आलम्बनम् ।

स्थायिभावानामालम्बनानि

१- रतेः- क- पुरुषस्य कृते सुन्दरी सुवस्त्रभूषणा कमनीया युवती । ख- स्त्रियाः कृते सुन्दरः सुवस्त्रभूषणः कमनीयो युवा । या स्त्री स्वयं रतेराश्रयो भूत्वा स्वस्याः रतिं स्वानुभावैः प्रकटयति तामेव संस्कृत-काव्यशास्त्रेषु पारम्परिकभ्रान्तिवशाद् आलम्बनस्य रूपे उपस्थापयन्ति। रतिरीदृशः स्थायिभावः यस्या य आलम्बनं भवति, स सर्वास्ववस्थासु आश्रयोऽपि भवति। अन्यथा एकस्मिन् हि पक्षे रतौ जायमानायाम् अनैतिकत्वात् रतेर्वा शृङ्गारस्य वा आभासो जायिष्यते । आश्रयस्य आभासश्च अग्रे व्याख्यायिष्यते ।

२- हासस्य- विकृताकृतिः, विकृतवचनः विकृतवेषभूषः विकृत-चेष्टश्च जनः । यः स्वनेत्रकर्णनासिकादिषु वाण्यां च स्वाभाविकविकृतत्वाद् उपहसितः सन् खिन्नो भवति आत्मानम् अपमानितं चानुभवति स साधुजनैर्नोपहसितव्यस्तस्य दयापात्रत्वात् । हसेत् तमेव लक्षयित्वा, यः स्वहास्यत्वेन स्वयमपि हसेत् ।

३- उत्साहस्य प्रतिकारसमर्थभुजबलशस्त्रकौशलसम्पन्नः कोऽपि शत्रुः दृप्तः सिंहव्याघ्रगजादिपशुर्वा । यः विकटपर्वतरोहणसमुद्रसन्तरणादिषु स्वोत्साहं प्रकटयति, स स्वयं विस्मयस्य आलम्बनत्वं गच्छति । समुद्रमुत्तरतो हनुमतः समुद्रो न आलम्बनम् । हनूमतः समुद्रतरणोत्साहः रामं प्रति तस्य श्रद्धायाः कार्यम् । हनूमान् स्वयम् अन्येषामृक्षवानराणाम् विस्मयस्य आलम्बनम् ।

४- क्रोधस्य भवत्यालम्बनं प्रतिकारसमर्थः कोऽपि दुष्टोऽपराधी वा, कस्यचित् सतोऽनागसस्त्रासकः, अकामायाः नार्याः धर्षकः, दस्युहिंसकः समाजराष्ट्रयोर्धर्मस्य शत्रुर्वा ।

५- शोकस्य मृतो वा म्रियमाणो वा गभीरतया व्रणितो वा

हरिश्चन्द्र दीक्षितः

स्वप्रियजनः परोपकारितया चरित्रोत्कृष्टतया वा समाजराष्ट्रयोः श्रद्धेयः सुजनो वा भवत्यालम्बनम् । प्रोषितप्रियस्य दीर्घकालिको वियोगोऽपि भवति शोकस्य कारणम् । सम्पत्तिनाशाद् घोरापमाना-च्चापि शोको जायते ।

६- भयस्य आलम्बनम् बलवत्तरो मारणोद्यतः शत्रुः घोराकृती राक्षसो भूतप्रेतपिशाचादिको वा क्रुद्धः सिंहमहाव्यालादिजन्तुर्वा । सिंहादीनां दर्शनं विनापि तेषां गर्जनमेव भयमुत्पादयति । अरण्यस्य विशालस्य भवनस्य शून्यतापि अन्धकारच्छन्नतापि अन्यत् कारणं विनापि जनयति भयम् ।

७- जुगुप्सा विकृतसकृमिव्रणपूयशीर्णमांसशीनरक्तकफश्लेष्ममल-मूत्रादिदर्शनवर्णनश्रवणाज्जायते । कुष्ठिनश्चातिमलिनस्यावलोकना-दपि । तीव्रदुर्गन्धिरपि घृणां जनयति ।

८- विस्मयस्य- यत् किमप्यलौकिकम् साधारणतया लोके न प्रत्यक्षम् दैवतं गान्धर्वम् ऐन्द्रजालिकं वा तद् भवति आलम्बनम् । असाधारणकलाकौशलनिर्मितं भवनादिकमपि विस्मयमुत्पादयति ।

९- निर्वेदस्य संसारस्वशरीरदोषदर्शनमेव भवति प्रमुखं कारणम् ।

१०- वात्सल्यम् सुन्दरशिशोरूपस्य तस्य स्वाभाविकीनां चेष्टानां च दर्शनात् तस्य मधुराऽस्फुटवचनानां श्रवणाच्च जायते ।

११- भक्तेरालम्बनं भवति स्वेष्टदेवताविग्रहमेव ।

व्यभिचारिभावानामालम्बनानि

व्यभिचारिभावानां तान्येवालम्बनानि भवन्ति यानि भवन्ति तदुदयहेतुस्थायिभावानाम् । किन्तु कदाचित् कोऽपि व्यभिचारिभावः केनाऽपि कारणेन स्वतन्त्रतयापि जायते, यथा हर्षो दीनेन सहसा धनस्योपलब्धेः, लज्जा वा विषादो वा स्वस्य केनाप्यमानात्, विषादो धनस्य हानेः, ग्लानिः स्वप्रमादानुस्मरणात् ।

उद्दीपनानि

उद्दीपनमिति किम् ? यदुद्दीपयति प्रबलीकरोति वा स्वालम्बनेन पूर्वतः प्रबुद्धं कमपि स्थायिभावम् । रतेः नदीतटपर्व-

तोपवनादिरमणीकं दृश्यम्, प्रावृड्शरत् वसन्तसन्ध्यारजनिद्वितीयया-मचन्द्रोदयादिरमणीकः समयः, संगीतश्रवणम्, स्वकान्तायाः स्वकान्त-स्य वा सौन्दर्यम्, स्वकान्तया स्वकान्तेन वा प्रसाधनेन सुवस्त्रभूषण-माल्यादिधारणं वा भवत्युद्दीपनम्। यान्यत्र रत्युद्दीपनानि गणि-तानि तेषां रत्युद्दीपनत्वं तदैव जायते यदा परस्परकमनीयस्त्रीपुरुष-योः संयोगो निष्पन्नो भवति ; परिचयाद् वा मिलनात् पूर्वं वा उद्या-नसकमलकुमुदतडागचन्द्रोदयादीनां न भवति रत्युद्दीपनत्वम्। यथा जनकस्य पुष्पवाटिकायां सीतारामयोः कण्वाश्रमे च दुष्यन्तशकु-न्तलयोः।

२– हासस्य आलम्बनात् पृथक् न किमप्युद्भवति उद्दीपनम्।

३– उत्साहस्य विशेषतो युद्धेषु स्वशौर्यप्रशंसाश्रवणम्, उत्तेजक-वाद्यध्वनिः, वैरिणामास्फालनम्, द्वन्द्वयुद्धायावाहन चत्युद्दीपनानि।

४– क्रोधः प्रतिकार्यदुष्टस्यैव कुशब्देन, कुचेष्ट्या च तस्य कुकर्म-णः स्मरणन च उद्दीप्यते।

५– शोकः मृतजनस्य सुगुणानां सुकर्मणा वा स्मरणेन वा तत्क-थाश्रवणेन वा तस्योपयुक्तवस्तूनां दर्शनेन वा उद्दीप्यते।

६– भयस्य- भयंकरस्य सत्त्वस्य विकृताश्चेष्टाः, सहसा श्रूयमाणः कठोरश्च विचित्रश्च ध्वनिः अन्धकारस्य गाढीभवनम् इत्युद्दीपनानि।

७– जुगुप्सा ८– विस्मयः ९– वात्सल्यं च येभ्य आलम्बनेभ्यो जायन्ते, तैरेवोद्दीप्यन्ते, यदि त उद्दीप्यन्ते नाम।

१०- भक्तिः भक्तसाधुजनानां वा सङ्गेन इष्टदेवस्य आलये गमनेन तद्गुणकीर्तनेन च उद्दीप्यते।

११- निर्वेद उद्दीप्यते– दर्शनशास्त्रानुशीलनेन, वैराग्योपदेश-श्रवणेन पुण्यरम्यनिभृतनीरवपार्वतादिप्रदेशभ्रमणेन च।

स्थायिभावानामाश्रयाः

आश्रय इति किम् ? यः केनचिदाश्रियते स आश्रयः। यद्यपि आलम्बनाश्रयशब्दयोः पारस्परिकं पर्यायवाचकत्वं सम्भवति, तथापि

हरिश्चन्द्र दीक्षितः

साहित्यशास्त्रे अनयोर्भेदः । आलम्बनं पूर्वं व्याख्यातमस्ति । आश्रयोऽधुना व्याख्यायते । आश्रयः स स्त्रीरूपो वा पुरुषरूपोवा कोऽपि मनुष्यः कोऽप्यन्यो प्राणी वा यस्य मनसि आलम्बनविशेषस्य प्रत्यक्षीकरणेन तस्य स्मरणेन वापि (मनुष्यदेवादिष्वेव न तिर्यक्सत्वेषु तेषु कल्पनास्मृतेरभावात्) रतिहर्षादिषु कोऽपि 'भावो' जायते ।

आश्रयसत्त्वोपगमनस्य पृथक्तया आवश्यकता—

प्राचीनकाव्यशास्त्रेषु आश्रय उपेक्षित इव प्रतीयते । इत्थं प्रतिभाति यत् नाटकेषु महाकाव्येषु च वीरशृंगारयोरेव अनयोर्द्वयोर्हि कस्याप्येकस्य प्राधान्यात्, नायके एव रतेर्वा उत्साहस्य वा क्रमश उभयोर्वा उद्भवस्योपगमनात् तस्मिन्नेव स्थायिभावाश्रयत्वमुपगतमासीत् । किन्तु आश्रयः क्वचित् कोऽप्यन्योऽपि भवितुं शक्नोति । आश्रय एव भवति आलम्बनस्वविशेषस्य निर्धारको वा सूचको वा । कल्प्यताम्-रङ्गमञ्चे दिव्यसौन्दर्यमयी कापि युवती स्थिता दृश्यते । सा रतेरालम्बनं भवितुं शक्नोति विस्मयस्यापि भक्तेश्चापि । रंगमञ्चे दृष्टः सिंहो भयस्याप्यालम्बनं भवितुं शक्नोति उत्साहस्यापि । आश्रयविशेष एव यदा स्वानुभावैस्तां स्त्रीं प्रति तं सिंहं प्रति यं स्थायिभावविशेषं प्रकटयिष्यति तदैव सामाजिकास्तां स्त्रीं तं सिंहं वा भावविशेषस्य आलम्बनरूपत्वेन अभिज्ञास्यन्ति । अत आश्रयोऽपि तृतीयविभावरूपत्वेन उपगन्तव्यः । आश्रयस्याहं सर्वप्रथमम् उल्लेखं रसगङ्गाधरे दृष्टवानस्मि ।

विभावानां त्रिविधत्वम्

आलम्बनमस्ति प्रथमो विभावः भावोद्बोधकारणत्वात् । आश्रयोऽस्ति द्वितीयो विभाव आलम्बनेन उद्बोधितस्य स्थायिभावविशेषस्य धारकत्वात् स्वानुभावैस्तस्य प्रकाशकत्वात् कस्यापि सत्त्वस्य आलम्बनत्वस्य निर्धारकत्वाच्च । उद्दीपनमस्ति तृतीयो विभाव आश्रये उद्बुद्धस्य भावस्य उद्दीपकत्वात् ।

हरिश्चन्द्र दीक्षितः

भावानामुद्‌बोधोऽनुभवश्च

प्रत्यक्षतया स्मृततया वा आलम्बनस्य अनुपस्थितौ मनुष्याणां मनांसि शून्यानि भवन्ति। तेषु भावा न वर्तन्ते। केवलं रागद्वेषजन्यसम्बन्धस्मृतयो विद्यन्ते। यदि मनुष्याणां मनस्सु सदा भावाः वर्तन्ताम् तर्हि स कामक्रोधादिभिरनेकैर्भावैर्युगपदाविष्टो भवेत्। कोऽपि पुरुषः स्वपत्न्या सह सदैव स्वगृहे तिष्ठति, कापि स्त्री तथैव स्वपत्या सह। किन्तु निरन्तरमहर्निशं पतिपत्न्योर्न भवति रत्यालम्बनत्वम्। यदा एकेन जनेन अन्यस्मिन् जने रतिरुद्‌बोध्यते, तदैव एकस्य जनस्य जायते आलम्बनत्वम्। रतौ तु उभौ पक्षौ भवत आलम्बनाश्रयौ।

बहुधा कोऽपि कस्यापि प्रथमं वारम् आलम्बनं भवति स्वलक्षणकर्मविशेषहेतुत्वात्। कथं भवति? स्वप्रत्यक्षीभवनात्। एकदा यो जनः कस्यापि प्रत्यक्षीभवनात् आलम्बनं जायते स जनस्तत् सत्त्वं वा स्वस्मृतत्वादपि भवितुं शक्नोत्यालम्बनम्। मनुष्या आलम्बनं कल्पयितुमपि शक्नुवन्ति।

यावत् किमप्यालम्बनम् आलम्बनरूपत्वेनैव सम्मुखं (प्रत्यक्षं) तिष्ठति, कदाचित् स्मृतौ हि वा तावदेव तदुद्‌बुद्धस्थायिभावविशेषाऽनुभूयते।

यदा स्त्रीपुरुषाणां मनस्सु कोऽपि 'स्थायी भावः' भवत्येव न, तदा विषादस्य विरोधी हर्षो वा आनन्दोऽपि वा न भवति। अतः कस्याप्यज्ञानाधरणस्यापसारणाद् रत्यादेरानन्दानुभवस्य अभिव्यक्तेरुपगमनम्, उपगन्तुरज्ञानमेव।

आलम्बनस्य स्वरूपम्

नाटकानां च प्रबन्धकाव्यानां च रचनासु सामाजिकानां पक्षे रसानन्दानुभावनमेव भवति प्रमुख उद्‌देश्यः। रसस्य प्रमुखो हेतुराधारो वा भवत्यालम्बनम्। तर्हि स्वभावत आलम्बनेन एवंविधेन भवितव्यम्, यत् तत् सर्वेषां मनस्सु समानं स्थायिभावविशेष—

हरिश्चन्द्र दीक्षितः

मुद्बोधयितुं समर्थं स्यात्। अतो यदि विभिन्नानां स्थायिभावानाम् आलम्बनानि स्त्रीपुरुषमनुष्याः मनुष्यसदृशाः देवादयो वा भवन्ति, नहि जडानि सत्त्वानि तिर्यग् जन्तवो वा, तर्हि व्यक्तिनामानि विहाय, आकृतिवेषभूषागतानि कानिचिद् गौणानि वैयक्तिकानि लक्षणानि विहाय यथा सुन्दर्याः युवत्याः कपोले तिलचिह्नादिकम् तेषु सर्वमपि जातित्वमेव। सीताराधाशकुन्तलादीनां रत्यालम्बनरूपत्वेन सुन्दर-तमयुवतिस्त्रीणां जातित्वमेव तथैव विभिन्नेषु कालेषु आगतानां राष्ट्र-प्रजाधर्मक्षतिकारकाणां तत्प्रतिकारिवीरेषु क्रोधोत्साहयोरालम्बनरूप-त्वेन दुष्टशत्रूणामपि जातित्वमेव।

आलम्बनगतमनौचित्यम् –रसनिष्पत्ति - दृष्टया

१– रतेः– अकामा प्रवञ्चिताऽपहृता व्यभिचारिणी परकीया। रोगिणी वा स्त्री तथैव असुन्दरी च अयुवती च स्त्री एवमेव अयुवकश्च असुन्दरश्च संन्यासिवेषधारी च रोगी वा दीनो वा कुवेषो क्षुद्रचारि-त्र्ययुक्तो वा पुरुषो अनुचितमालम्बनम्।

२- हासस्य वृद्धो रुग्णो दीनो वा गुरुजनो वा पूज्यो वा सम्मान्यो वा जनो अनुचितम् आलम्बनम्।

३- उत्साहस्य युद्धे विरोधिरूपत्वेन अल्पसत्त्वः, रुग्णः वृद्धः विरक्त वेषधारकस्तपस्वी वा न योग्यं भविष्यत्यालम्बनम्।

४- क्रोधस्य मान्यो वा पूज्यो वा गुरुजनः वृद्धो वा अनुचितमा-लम्बनम्, कामघोरापराधित्वात् स सहसा हन्यतामपि।

५– शोकस्य– हतो दस्युराततायी राष्ट्रशत्रुधर्मशत्रुर्वा न योग्य-मालम्बनम्। तस्य परिजनानां रोदनं प्रदर्शयितुं वा वर्णयितुं वा शक्यते। किन्तु सामाजिकास्तेषां शोकं नाऽनुभविष्यन्ति।

६– भयस्य– आश्रयस्य प्रकृत्यनुसारेण यदस्ति न बहुभयंकरं, तन्न भवत्युचितमालम्बनम्।

७– जुगुप्सायाः– कुरुचिजनकानां वस्तूनाम् अकौपुल्यमेवालम्बन-त्वदोषः।

हरिश्चन्द्र दीक्षितः

८– विस्मयस्य– यस्य वैचित्र्यं स्तोकमेव तन्न उचितमालम्बनम् । निर्वेदस्य बाह्यमालम्बनं भवत्येव न । वात्सल्यभक्त्योरालम्बनयोर्न काप्यनौचित्यसम्भावना ।

आश्रयगतमनौचित्यम्–

१- रतौ यद् आलम्बनस्य अनौचित्यम् । तदेव आश्रयस्य । २- हासस्य धीरो गभीरप्रकृतिर्महान् तपस्वी संन्यासी वा न भवत्युचित आश्रयः । ३- उत्साहे यदालम्बनस्य अनौचित्यं तदेव आश्रयस्य । ४– क्रोधस्य अशक्तो वा वृद्धो वा विरक्तस्तपस्वी वा न विधेय आश्रयः । ५– शोकस्य महापुरुषस्त्यागी वा तपस्वी वा सर्वथा निर्विण्णो वा न भवत्युचित आश्रयः । ६– भयस्य– महापुरुषस्य शक्तिमतो निर्विण्णस्य अनुचिता भविष्यत्याश्रयत्वेन कल्पना । ७– जुगुप्साया आश्रयत्वे अनौचित्यस्य न काऽपि सम्भावना । ८– सर्वथा धीरे ज्ञानिनि च निर्विण्णे च जने विस्मयस्य प्रदर्शनमनुचितम् । ९–निर्वेदस्य साधारणे वा विषयलोलुपे जनेप्रदर्शनमनुचितम् १०– वात्सल्यस्य त्यागिनि महात्मनि । ११– भक्तेरेवमेवाऽद्वैतज्ञानिनि ।

स्थायिभावानां पारस्परिकंविरोधित्वमानुकूल्यं च-

रतेः शोकक्रोधभयजुगुप्साभ्यो विरोधः, हासोत्साहाभ्यामानुकूल्यम् । उत्साहस्य भयशोकाभ्यां विरोधः, क्रोधेन आनुकूल्यम् । हासस्य शोकभयजुगुप्साभ्यो विरोधः, विस्मयेन आनुकूल्यम् । भक्तिनिर्वेदयोः कामरतिः प्रतिकूला । पारस्परिकमानुकूल्यम् भक्तिनिर्वेदयोः । वात्सल्यस्य निर्वेदाद्विरोधः, हासेन तदानुकूल्यम । शिशोर्वा बालस्य वा स्वाभाविक्यश्चेष्टाश्च मुग्धानि वचनानि हासं जनयन्ति । यत्र प्रथमं कस्मिंश्चित् स्थायिभावे उत्पन्ने कोऽप्यन्योऽनुकूलः स्थायिभाव उत्पद्यते, तत्र पश्चादुत्पन्नः स्थायिभावो व्यभिचारितया वर्तते, यथा रतौ हासः उत्साहो वा ।

स्थायिभावेभ्यो निष्पाद्या रसाः–

रतिहासोत्साहक्रोधशोकभयजुगुप्साविस्मयभक्तिनिर्वेदस्थायिभावे–

हरिश्चन्द्र दीक्षितः

भ्यः क्रमशः निष्पाद्यन्ते शृङ्गारहास्यवीररौद्रकरुणभयानकबीभत्साद्भुतभक्तिशान्तरसाः । पुत्रप्रीतेः वात्सल्यस्य रसत्वं न प्रभाष्यम् ।

चतुर्थो भागः रसनिष्पत्तिः

काव्ये रसः– काव्ये रस इति शब्दात् कोऽर्थो बोध्यते । रस इति शब्दस्य जलमिति चोष्यवस्तुसार इति ओषधिप्रकारविशेष इति स्वाद इति आनन्द इति च भवन्ति बहवोऽर्थाः । किन्तु काव्ये रसशब्दस्यार्थो भवत्यानन्दविशेषः । स कीदृशो भवतीति व्याख्यास्यमानाया: रसनिष्पत्तेः स्पष्टीभविष्यति ।

मुनिभरतस्य रसनिष्पत्तिसिद्धान्तः– विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतस्य प्रसिद्धवचनं सूत्रं वा । विभावानुभावव्यभिचारिणः पूर्वमेव व्याख्याताः । संयोगाद् इति किम् ? अस्य मुनेरभिमतं तात्पर्यं ज्ञातुं तेन प्रस्तुतो दृष्टान्तोऽवधातव्यः । को दृष्टान्तः ? अत्राह– यथा हि नानाव्यंजनौषधिद्रव्यसंयोगाद् रसनिष्पत्तिर्भवति, यथा गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षाडवादयो रसा निर्वर्त्तन्ते, तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति । अत्राह- रस इति कः पदार्थः । उच्यते । आस्वाद्यत्वात् । कथमास्वाद्यते रसः । यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जानाः रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्च गच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः, हर्षादींश्च गच्छन्ति तस्मान्नाट्यरसा इत्यभिख्याताः । इति ।

अस्याः रसनिष्पत्तिव्याख्यायाः ज्ञायते यत् संयोगाद् इत्यस्य भरताभिमतं तात्पर्यमस्ति मिश्रणादिति सहवर्तनाद् इति वा ।

सर्वाङ्गरससिद्धान्तव्याख्यातृरूपत्वेन यद्यपि तस्याद्याचार्यत्वाद् भरतस्य महिमा अप्रतिमश्च अक्षुण्णश्च तथापि तस्य रसनिष्पत्तिव्याख्यायां वर्तन्ते केऽपि दोषाः ।

ये केऽपि पेया रसा निष्पाद्यन्ते, तेषां प्रमुखं घटकं द्रव्यं प्रथमं

द्रव्यस्येवोच्यते । यदि कस्यापि पेयविशेषस्य दुग्धशर्करामरिचादिभ्यः पृथक् प्रमुखं घटकम् आम्रफलरसो वा वातामपिष्टिर्वा भवति, तर्हि किं तन्न संज्ञाप्यते । नाटकेषु यद्यनुकारिमनसि स्थायिभावो न विद्यते, तर्हि किं व्यभिचारिभावः लज्जा वा ग्लानिर्वा व्याधिर्वा मरणं वा यथार्थतया विद्यते । कालान्तरेणोत्पन्नैः काव्यतत्त्वव्याख्यातृभिः रसनिष्पादके ये द्वे तत्त्वे आलम्बनमिति च उद्दीपनमिति पृथग्भ्यां नामभ्यां स्मृते ते उभे भरतेन समानतया एकेनैव विभाव इति नाम्नोल्लिखिते स्तः । रसनिष्पत्तये अनुभावाः कस्य ग्राह्याः? नूनम् आश्रयस्यैव यतस्तस्मिन्नेव आलम्बनविशेषं प्रति स्थायिभावविशेष उत्पद्यते । आश्रयस्यैवानुभावैः स स्थायिभावः लक्ष्यतेऽपि । अत्र भरतेन या भ्रान्तिर्विहिता सा तदनुवर्त्तिभिरन्यैः काव्यतत्त्वव्याख्यातृभिश्च पुनरावर्तिता । भरतो यदा रसनिष्पत्तिं व्यचारयत् तदा शृङ्गार-एव तस्य दृष्टावर्तत । शृङ्गारे स्त्री रतेराश्रयोऽपि भवति इति तथ्यमुपेक्ष्यैव तस्यास्ते स्मितिकटाक्षभ्रूभङ्गादयोऽनुभावा गृहीता, ये रतिस्थायिभावं तद्दृष्टरि जनयन्ति, जनयितुं शक्नुवन्ति वा । कमनीयायाः स्त्रियास्तस्या एव रतेर्ज्ञापका (अनुमापकाः) अनुभावा आश्रयस्य अनभिज्ञानेऽपि सामाजिकेषु रसरूपत्वेनानुभाव्यमानां रतिं जनयन्ति । अतो रसनिष्पत्तिव्याख्यातृभिराचार्यैरनेकधा रत्यालम्बनायाः स्त्रिया एव रतिप्रकाशकविभावरूपत्वेन ग्रहणं कृतम्, यथा हि विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैरिति लोल्लटः काव्यप्रकाशस्यानुसारेण । पुनः लोके प्रमदादिभिः कारणादिभिः काव्ये नाट्ये च विभावादिशब्दव्यवहार्यैरिति अभिनवगुप्तः काव्यप्रकाशस्यैवानुसारेण । आश्रयशब्दस्योल्लेखं विनैव लोल्लटश्च शंकुकोऽप्यवश्यमेव रामं रतिस्थायिभावाश्रयरूपत्वेन उपस्थाप्य रसनिष्पत्तिं व्यचारयत् । किन्तु तेन प्रस्तुते उदाहरणे रतिः केवलमनुमीयते, यत आलम्बनस्यानुपस्थितौ वियोगिनो रामस्य रतिः कथमनुभवितुं शक्यते ।

हरिश्चन्द्र दीक्षितः

दृष्टान्तस्यानुसारेण संयोग इति शब्दः मिश्रण इव इत्यस्य तात्पर्ये प्रयुक्तोऽस्ति इति निश्चीयते । किन्तु रङ्गमञ्चे मिश्रणं कथं सम्भवति । केषां संयोगः विभावानुभावव्यभिचारिणाम् इति तु निश्चितमेव भरतस्य मतेन । किन्तु तेषां संयोगः केन सह नानाभावोपगता (विभावानुभाव्यभिारिभावोपगता) अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति भरतस्य वाक्यम् । भरतेन सूत्रे यद्यपि स्थायिभावो न समज्ञायि,तथापि तद्व्याख्यायां संज्ञातम् । (तेन) स्थायिप्रतीतिरनुमितिर्वाच्या, न रसः । अतएव सूत्रे स्थायिग्रहणं न कृतम् । तत् प्रत्युत शल्यभूतं स्यात् । केवलमौचित्यादेवमुच्यते स्थायी रसीभूत इति–इति यद् अभिनवगुप्तस्य वचनं तदसमीचीनमेव। सामाजिकैः सर्वास्ववस्थासु स्थायी तु प्रथममनुमीयत एव, पुनर्व्यभिचार्यपि ।

नाटके विभावानुभावास्तु अनुकृतरूपत्वेन तु प्रत्यक्षा एव भवन्ति। स्थायीभावोऽनुभावैरनुमीयते । तर्हि कथं तस्य विभावादिभिः संयोगः । अभिनवगुप्तस्यानुसारेण लोल्लटो मन्यते स्म यद् विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिरिति । इदं वचनं भरतमतानुकूलमेव । तथाप्यन्यैर्विरोधितम् । ततः संयोगशब्द एव रसनिष्पत्तिव्याख्यासु जाटिल्यस्य कारणं जातोऽस्ति ।

रसनिष्पत्तिसूत्रस्य लोल्लटप्रभृतिभिः कल्पितानां व्याख्यानाम् उदाहरणाच्च समीक्षणाच्च पूर्वं एकं विशिष्टं तथ्यं प्रति पाठकानां ध्यानमाकृष्टमस्ति । तदस्त्येतद् यत् सर्वेऽपि व्याख्याकारा अनुभावैः स्थायिभावस्य अनुमेयत्वमेवाऽमन्यन्त स्म । यद्यपि मुनिभरतप्रवर्तितभ्रान्तिवशात् रतेरालम्बनरूपायाः किन्तु यथार्थतया आश्रयरूपाया अपि स्त्रिया अनुभावैः रामादिरूपे नायके रतेर्जनितत्वं किन्तु तस्यानुभावान् विनैव तस्मिन्नेव स्थायिनो रतेः प्रतीतिं प्रत्यपादयन्। यथा सीतादिषु रतिरवर्तत तथा रामादिष्वपि इति सत्यम् । किन्तु रामादीनां रतेः प्रतीतिस्तेषामेवानुभावैर्मन्तव्या आसीत् । कालिदासस्य अभिज्ञानशाकुन्तले यथा दुष्यन्तः स्वानुभावैः स्वरतिं प्रकाशयति

हरिश्चन्द्र दीक्षितः

तथा शकुन्तला । पुरुषाः सामाजिका दुष्यन्तेन सह रतिमनुभवन्ति । स्त्रियः शकुन्तलया सह अनुभवन्ति अनुभवितुं शक्नुनन्ति वा ।

रतौ शकुन्तलासीतादयो कमनीयाः नार्यः सुरम्योपवनसरित्-ज्योत्स्नाशीतलपवनादयश्च आलम्बनोद्दीपनरूपा विभावा भरतस्य मतेन अतः–

लोल्लटस्यानुसारेण– विभावैर्मानितो रत्यादिस्थायीभावः कटाक्षभुजाक्षेपादिभिरनुभावैः प्रतीति– योग्यः कृतः, निर्वेदादिभिर्व्यभिचारिभिरुपचितः (पोषितः) मुख्यतया रामाद्यनुकार्ये तद्रूपदशानुकरणकारणाद् अनुकारिणि नटेऽपि प्रतीयमानो भवति शृंगारादिको रसः। इत्ययं मम्मटन अभिनवगुप्तस्य वचनानां यः सारांशः प्रस्तुतस्तस्यापि तत्सम्पूर्णतायां संक्षेपः। विभावानुभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिरिति च स्थाय्येष विभावानुभावादिभिरुपचितो रस इति च अनुकार्येऽनुकर्त्तर्यपि चानुसन्धानबलादिति चेमानि वचनानि अभिनवगुप्तेन अभिनवभारत्या लोल्लटप्रभृतीनामुद्धृतायां-व्याख्यायां वर्तन्ते ।

अस्य व्याख्यायाः दोषाः– १. स्थायिभावस्य विभावादिभिः बाह्यतया पृथक् संयोगो न सम्भवति यतः स्थायिभावजनकत्वेनैव कोऽपि भवति विभावः २- काव्यप्रकाशोद्धृतव्याख्यानुसारेण कटाक्ष-भुजाक्षेपादयोऽनुभावाः नायिकाया एव गृहीताः यद्यपि ते नायकस्य इत्यपि कोऽपि वक्तुं शक्नोति। ३– सामाजिकस्य तु उपचितस्य पोषितस्यैव स्थायिनः प्रतीतिः। यत्र स्थाय्युत्पद्यते तत्रैव स व्यभिचारिभिः पोष्यते। किन्तु रतौ किं भवति ? स्त्रियां रतौ जातायां तस्यां या व्रीडा जायते, तया तस्याः रतिः पोष्यतां वा न वा पुरुषस्य तां प्रति रतिश्वश्यं पोष्यते। पुनः सामाजिकेन पुष्टाया एव रतेरुपगमः। किन्तु सर्वेऽपि व्यभिचारिणः स्थायिभावान् पुष्णन्ति। संयोगात् पूर्वं वियोगावस्थायां वा किं चिन्ता वा शंका वा रतिं पुष्णीतः। यस्माद् वियोगः स तु दूरे अज्ञातस्तिष्ठति। किं भयः

हरिश्चन्द्र दीक्षितः

शंकया पोष्यते ।

मम्मटेन उद्धृतायां व्याख्यायां रत्यादिको भाव इत्युक्तमस्ति, निर्वेदादिभिरित्यपि । भरतेन कृतायां व्यभिचारिभावगणनायां निर्वेदग्लानिशंकाख्या इत्याद्युक्तमस्ति । किमारब्धा रतिनिर्वेदग्लानिशंकादिभिः पोष्यते । अनुकार्ये भवति सतो स्थायिभावस्य प्रतीतिरवकर्तरि असतः स्थायिभावस्य आभासिकी प्रतीतिः । प्रतीतिरनुमितिरेव । प्रतीतिमात्रं कथं भवितुं शक्नोति सामाजिकानां रसरूप आनन्दानुभवः ?

व्यभिचारिणोऽपि भवन्ति चित्तवृत्तयः । यथा स्थायिनः । द्वे चित्तवृत्ती न सह वर्तेते । अत एकया कथमन्यस्याः परिपोष इति यदाक्षिप्तं तन्नोचितम् । हृदये रतौ स्थितायामेव व्रीडाहर्षसौभाग्यगर्वशंकादयो भावा जायन्ते, भये स्थिते हि दैन्यशंकाचिन्तादयः । विरोधिनौ भावौ न सह वर्तेते यथा प्रियसंयोगे रतिश्च (वियोग) विषादश्च । दैन्योत्साहौ च । रतिशोकौ च क्रोधहासौ । रतिवियोगविषादे चिन्ता वा शंका वास्त्यनुकूलो भावः ।

पूर्वकृतानां व्याख्यानां खण्डनाय यदुक्तं तत् पृथक्कृत्य शंकुकेन कृताया व्याख्याया स्पष्ट आशय एवं प्रस्तोतुं शक्यते– नाट्यदर्शकाः सर्वेऽपि सामाजिका जानन्त्येव यद् योऽयं रामस्यानुकर्त्ता नटः स नट एव, न वास्तविको रामः । तथापि तदभिनयकलाकौशलप्रभावात् तस्य नटत्वस्य प्रतीत्या (अभिज्ञानेन) सह तस्मिन् अनुकार्यस्य रामत्वस्यापि प्रतीतिर्जायते । नटे जातायां रामत्वस्य प्रतीतौ तदभिनीयमानैराङ्गिकैर्वाचिकैश्चानुभावैः तस्मिन् रत्यादिस्थायिभावोऽपि प्रतीयते, अन्यथा रामत्वस्य प्रतीतेर्न कोऽप्युपयोगः स्यात् । प्रतीतिरूपमिदमनुमानं दृष्टेन धूमेन पर्वतशिखरे स्थितस्याग्नेरनुमानाद् विलक्षणं भिन्नं वा भवति, यतो पर्वतेऽनुमितोऽग्निस्तत्र वर्तत एव । किन्तु नटेऽनुमितः स्थायी तस्मिन् न वर्तते ।

यथा (आश्रयरूपस्य नायकस्य) अनुकर्ता भवति कोऽपि नटस्तथा

सीतारूपस्य आलम्बनविभावस्यानुकर्त्री भवति काऽपि नटी। सीता आसीद् रामस्य मनसि रतिस्थायिन उत्पत्तेर्हेतुः कारणं वा। अनुभावाः भवन्ति कार्याणि सामाजिकानां कृते स्थायिभावस्यानुमापकाः। अनुकरणं कृत्रिमं हि भवति। अनुभावा हि भवन्ति कलात्मकत्वेन प्रमुखतया अनुकरणीयाः। व्यभिचारिणो भवन्ति स्थायिनः सहकारिणः। तेऽपि अनुभावैरेवानुमीयन्ते। एवं यः स्थायिभावोऽनुकार्ये रामे वस्तुतया अवर्तत, तस्य तदनुकारिणि नटे (मिथ्या) प्रतीतिरेव सामाजिकानां कृते भवति रस इति। अस्मिन् मते संयोगोऽस्ति विभावादिस्थायिभावयोः गम्यगमकसम्बन्धः। गम्यगमकसम्बन्ध इति किम्? अनुमेयानुमापकसम्बन्ध इति।

नटे या रामस्य रामत्वस्य वा या प्रतीतिर्भवति सा भवति नटे रामस्य चित्रतुरगादिन्यायेन प्रतिपत्तिः (प्रतीतिः) इत्युपगमनं न युक्तम्। अनुकारिणि नटे भवन्ति स्थूलाकृतिचेतनागतयः, या न भवन्ति चित्रगते तुरगे। नटे रामस्य या प्रतीतिः सा सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणेति सर्वं वागाडम्बरमेव। आभासिकी सा प्रतीतिरितिवचनमेवोचितम्।

व्यभिचारिणो न भवन्ति स्थायिन उपचायका इत्याक्षेपः पूर्वमेव निराकृतः। शोकादयः स्थायिभावाः कालक्रमेण मन्दतां यान्ति, हासो भवति षोढा (षट्प्रकारकः) इत्यपि शंकुकस्य वचनं रसनिष्पत्तिसमीक्षाप्रकरणे नितान्तमसाध्वेव। यादृशः स्थायिभावोऽनुभावानां वर्णनाद् अभिनयानुकरणाद् वा उपस्थाप्यते, तादृशा एव सामाजिकैरनुमीयते। स तीव्रदशारूढ एव भवति।

आलम्बनविभावस्य आश्रये उत्पन्नः स्थायिभावो भवति कार्यम्। तस्य कार्याणि भवन्ति आश्रयगतानुभावाः यैराश्रयगतस्थायिभावोऽनुमीयते। आलम्बनविभावो आश्रये स्थायिभाव जनयति। तयोः भवति कार्यकारणसम्बन्धः। किन्तु नाऽनुमेयानुमापकसम्बन्धः, यतो आश्रयगतः स्थायो विभावं नानुमापयति। आश्रयगतानुभावैः सह स्थायिनो

हरिश्चन्द्र दीक्षितः

भवति अनुमेयानुमापकसम्बन्धः। आश्रये स्थायिनः प्रतीतिर्न भवति सामाजिकस्य रसरूपा स्थायिभावानुभूतिः।

शकुकस्य व्याख्यायामनुमानरीतेः प्रदर्शनमेवास्ति विशेषः। अन्यथा शंकुकस्य व्याख्या विस्तारेण लोल्लटस्य व्याख्याया अनुवचनमेव।

शंकुकस्य व्याख्या मुख्यतया अभिनयस्य समीक्षायामेव आधारिताऽस्तीति अस्य दोषः।

'रत्यादिर्भावस्तत्राऽसन्नापि सामाजिकानां चर्व्यमाणो रस इति मम्मटेन उदाहृतायां शंकुकस्य व्याख्यायामुक्तमस्ति तत्र यदि चर्व्यमाण इत्यस्यार्थोऽनुभूयमान इति भवत् तर्हि सैव व्याख्या सर्वशुद्धा सर्वमान्या च।

भट्टनायकस्त्वाह- अनुकार्ये रामादौ अनुकारिणि स्थायिभावस्य या सत्या नटे या आभासिकी प्रतीतिः (अनुमितिः) सा न तटस्थे सामाजिके भवितुमर्हति रसः। एवं न सामाजिकस्य आत्मगतस्थायिभावस्य प्रतीतिः यतस्तस्य शोकभयादयः शोकभयाद्यनुभूतयो हि भविष्यन्ति। सीतादयो न भवन्ति स्वयं सामाजिकस्य आलम्बनानि कान्ताः वा प्रियाः वा। अतः कथं तस्मिन् स्थायिभावस्योत्पत्तिः। नाट्यकाव्यानुशीलनावधौ स्वकान्तास्मृतेरपि अभावः। अतः स्मृतेरपि न स्थायिभावस्योत्पत्तेः सम्भावना। स्थायिभावो रसो वा नाभिव्यज्यतेऽपि यतोऽभिव्यक्तिर्भवति आवृतस्य पूर्वस्थितस्यैव यथा शरावावृतस्य दीपस्य शरावनिवारणात्। सीतादिभिः सह कमपि सम्बन्धं विना रामादिभिः सह तादात्म्यस्यापि न सम्भावना। सामाजिकः न शक्नोति हनुमदादिवत् समुद्रोल्लंघनादिकं विधातुम्। अतः कथं हनुमदादीनामुत्साहस्यानुभावस्तस्यानुभावो भवेत्। तर्हि किं भवति ? नाट्येऽपि काव्यं भवति श्रव्यमेव। तत्राभिनयस्य विशेषः। अभिनयस्य आङ्गिकवाचिकसात्त्विकाहार्या इति चत्वारो भेदाः। (वाचिकोऽनुभावस्तावद्विषादविस्मयादिबोधकध्वनिरूपोमन्तव्यः, नहि

विभावादिवर्णनकाव्यवाक्यरूपः) । तत्र शब्दस्याभिधाव्यापारेण काव्यवाक्यस्य विभावादिवर्णार्थो बोध्यते । तस्य (शब्दस्य) द्वितीयेन भावकत्वव्यापारेण विभावादयः साधारणीक्रियन्ते च ते सामाजिके स्थायिभावस्य शब्दस्य अर्थस्य रसस्य भावका अपि जायन्ते । साधारणीकरणमिति किम् । विभावादीनां सम्बन्धविशेषस्यापहारणम् । शब्दस्य तृतीयेन भोजकत्वनाम्ना व्यापारेण अंशेन वा भावितो रसः भुज्यते । भावितः स्थायीभावो रसरूपत्वेन भुज्यते । स भोगो ब्रह्मानन्दसहोदरानन्दभोगसदृश इति । अस्यां व्याख्यायां वञ्चकत्वेनाभिनवगुप्तो बहून् कल्पितान् दोषानुदभावयत । शब्दस्य अभिधायकत्वभावकत्वभोजकत्वाख्या न श्रुताः सम्भवन्ति वा त्रयोंऽशा व्यापारा वा। प्रतीत्याः भिन्ना भुक्तिः का भवति। सा तु व्यक्तिरूपत्वेन अस्माभिरप्यङ्गीकृता । भावकत्वमपि शब्दार्थानां व्यञ्जकत्वमेवेत्यादि।

अथाधुना अभिनवगुप्तस्य प्रतिकारः प्रतिक्रियते तस्य निर्लज्जा वञ्चना च प्रकाश्यते—

भट्टनायकः भरतमुनिकृते नाट्यशास्त्रे उपस्थापितं रसनिष्पत्तिसूत्रं स्वयं भरतमुनिकृतं तद्व्याख्यानं दृष्टौ निधाय रसनिष्पत्तिं व्याख्यासीत् । अभिनवभारत्यां नायकस्य व्याख्या शंकुकस्य व्याख्याया अनन्तरमुदाहृताऽस्ति । किन्तु ध्वन्यालोकस्य लोचनटीकायायां सैव व्याख्या लोल्लटस्यापि व्याख्यायाः पूर्वम् उदाहृताऽस्ति । रसगङ्गाधरकर्ता जगन्नाथोऽभिनवगुप्तस्य पक्षस्य रक्षायै सर्वप्रथमं भट्टनायकस्य व्याख्यामुदाहृत्य तदनन्तरं चाभिनवगुप्तस्य व्याख्यामुदाहृत्य तस्या अग्रे लोल्लटप्रभृतीनां व्याख्याम् उदाहरत् ।

काव्यवाक्येषु सार्था हि शब्दा प्रयोज्यन्ते। सामाजिकाः काव्यवाक्यार्थान् बुद्ध्वा हि भावविभावादिवर्णनपरकानर्थान् बुद्ध्यन्ति । ततः समाप्नोति शब्दव्यापारः । विभावादिवर्णनपरका अर्था ज्ञाताः सन्तः सामाजिकानां (विभावादिसाधारणीकरणबलात) स्थायिभावानुभूतिरूपं रसं भावयन्ति । यदि तं शब्दार्था वा वाक्यार्था वा न भावयन्ति।

हरिश्चन्द्र दीक्षितः

तर्हि को भावयति । भावितो रसो भुज्यतेऽनुभूयते वा । भुक्तयेऽनुभूतये वा न कोऽपि शब्दार्थव्यापारोऽपेक्ष्यते ।

अधुना पठ्यन्ताम् भरतस्य इमानि वाक्यानि येषु भुक्त्यर्थे हि अशब्दशक्त्यर्थे हि व्यञ्जनाशब्दोऽपि प्रयुक्तोऽस्ति । तस्मादभिनवगुप्तस्य मतेऽस्ति किं नवीनत्वम् ।

नानाभावोपगता अपि स्थायिनो भावाः रसत्वमाप्नुवन्ति । यथा नानाव्यंजनसंस्कृतमन्नं भुञ्जाना सुमनसः पुरुषाः रसानास्वादयन्ति, तथा नानाभावाभिनयव्यञ्जितान् स्थायिभावानास्वादयन्ति प्रेक्षकाः ।

'भावाभिनयसम्बद्धान् स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ॥' इति यदा स्वाद्वन्नं जिह्वायां धृत्वा जनास्तद् आस्वादयन्ति, तदा किं स स्वादः कयाचिच्छब्दशक्त्या जायते । एवमेव यदा भावितान् स्थायिभावान् मनसा आस्वादयन्ति, अर्थात् मनसा अनुभवन्ति तदा किं काऽपि शब्दशक्तिरपेक्ष्यते । धीमन्तः पाठका 'मनसा आस्वादयन्ति' इति भरतवचनमवदधतु । इदमभिनवगुप्तस्य शब्दशक्तिरूपव्यञ्जनावादस्य विध्वंसनम् ।

यदाऽभिनवगुप्तः व्याख्यासु क्रमव्यत्ययं कर्तुं शक्नोति तदा स प्रतिद्वन्द्विनो भट्टनायकस्य व्याख्यां भंक्त्वाऽपि प्रस्तोतुं शक्नोति । तथापि यादृशी सा लभ्यते तादृशी हि विचार्या । अस्यां व्याख्यायाम् इमे दोषाः सम्भवन्ति । १. विभावादीनां सर्वेषामपि साधारणीकरणस्योपगमनम् । केवलम् आलम्बनविभावः साधारणीक्रियते एतत् साधारणीकरणप्रकरणे विवरिष्यते । (अन्यत्र पूर्वतो विकृतमपि काव्यात्मनिर्णयनाम्नि ग्रन्थे) २. नाट्येषु भावकत्वं नास्ति शब्दस्य शब्दार्थस्य वा व्यापारो यत्र यत्र अनुकृतरूपेषु आलम्बनं च उद्दीपनानि च आश्रयश्च स्थायिनोऽनुभावाश्च प्रत्यक्षा भवन्ति, यत्र श्रव्यकाव्यं विनाऽपि स्थायी भावो भाव्यते हि । श्रव्यकाव्ये भावकत्वं भवति विभावादिकल्पनायाः या काव्यवाक्यानुशीलनाज्जायते ।

हरिश्चन्द्र दीक्षितः

नाट्याभिनयदर्शने साधारणीकरणमपि न भवति शब्दव्यापारः। ३. यथा भावनायास्तथा भुक्तेरपि न सम्भवति शब्दार्थव्यापारत्वम्। ४. रसो भवति रजस्तमोऽतिरेकि सत्त्वोद्रेकसम्भाव्यब्रह्मानन्दसहोदर इत्युपगमोऽपि दोष एव रसस्य अविरक्तस्य वासनाग्रस्तस्य भुक्तसुखदुःखस्य कान्तकान्तासङ्गतिप्रमोदज्ञस्यैव जनस्य चित्ते सम्भाव्यत्वात्।

अभिनवगुप्तस्य यन् मतमभिनवभारत्यां प्रस्तुतमसि तदहमत्र प्रामाणिकतया सुगम्यं विधाय प्रस्तौमि-

लोके ललनाकटाक्षोद्यानरूपैः कारणकार्यसहकारिभिः परचित्तगत-स्थायिभावानुमानाभ्यासपाटवात् (---स्थायिभावस्यानुमेयत्वस्य जातत्वात्?) अधुना (= नाट्ये च काव्ये च) तेषामेव कारणादीनां विभावनत्वं चानुभावनत्वं चोपरञ्जकत्वं जायते (अथवा विभावनानुभावनैस्तदुपरञ्जकत्वं जायते ?)। अनन तिरोहितलौकिकत्वानां तेषां विभावानुभावव्यभिचारिण इति

अलौकिकव्यपदेशभाक्त्वं (अलौकिकत्वं) च जायते। तेष्वलौकिकेषु विभावादिषु (नाट्यदर्शनावसरे) सामाजिकधियि (-चित्त) सम्यक् योगं सम्बन्धमैकाग्र्यं (वा) प्राप्तेषु तैरव अलौकिकचर्वणां नीतोऽर्थः (= रत्यादिस्थायीभावः) तत्काल एव जातश्चर्वणावध्येव स्थितः स्थायिविलक्षण एव रसः इति।

एतस्य स्वमतस्य उपस्थापनात् पूर्वम् रसानुभूतेः षड् विघ्नान् कल्पयित्वा क्रमस्तेषां निराकरणानि प्रास्तौत्। १- प्रतिपत्तावयोग्यता =रसप्रतीतावसम्भावना। २- स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेषः = परसम्बद्धविभावानाम् अन्यस्मिन् देशे अन्यस्मिन् काले स्थितेर्ज्ञानम्। ३- निजसुखादिविवशीभावः। ४- प्रतीत्युपायवैकल्यम् =असति अनुकरणाभिनये सतो रामाद्यनुकार्यस्य असम्भावनायाः विघ्नः। ५- स्फुटत्वाभावः = यत् केवलं शब्दार्थेषु वर्णितम् अनुमितं वा तन्न प्रत्यक्षवत् प्रामाण्यमितिभावना। ६- अप्रधानता = मनुष्यजीवनचर्यायां स्थायिभावानाम् अप्रधानता? यत्र व्यभिचारिभावानां

हरिश्चन्द्र दीक्षितः

प्राधान्येन वर्णनम् तत्र स्थायिनो अप्रधानता ? यत्र स्वभावोक्तिः वस्तुध्वनिरलंकारध्वनिर्वा, तत्र रसस्य अप्रधानता ? (अत्र अभिनवगुप्तस्य व्याख्या अस्पष्टास्ति) ७- संशययोगश्च=अनुभावविशेषाः स्थायिभावविशेषस्यैव लक्षणा वा न वेति संशयः-अश्रुपातादीनां यथा शोके तथाऽतिहर्षेऽपि तथैव कस्माच्चिदक्षिरोगेऽपि । इत्येते सप्त-विघ्नाः ।

रसप्रतीतेरसम्भावनायाः कारणमस्ति संवेद्ये संविदो विनिवेशनस्य अशक्तिः-'संवेद्यमसम्भावयमानः संवेद्ये संविदं विनिवेशयितुमेव (यो) न शक्नोति का तत्र विश्रान्तिरिति प्रथमोविघ्नः'। यदि संवेद्य इति शब्दस्य रसम् इत्यर्थो बोध्यताम् क्षीयते वा,तत्र संवेदनानन्तरं जायते वा इति च तथैव तर्हि काव्योपलभ्ये रसे कथं संविदश्चात्मचैतन्यस्य कथं विनिवेश्यता ? किम् अपूर्वतो विद्यमानः काव्यनाट्यानुशीलनात् प्रभृति जायमानस्तत्समाप्तौ नश्यमानच रसः सूक्ष्मः परमात्मैव । अभिनवगुप्तोऽस्य प्रथमस्य विघ्नस्य निवारणं मन्यते- सामाजिकानां रामादिभिः सार्धं तादात्म्यं लोकसामान्यकर्मसु, अलौकिकेषु समुद्रबन्धादिकर्मसु प्रसिद्धवृत्तरामाद्यनुकारिणि नटे रामाद्यनुकार्याणां ग्रहणम् । स्वगतसुखदुःखसम्वेदनं मनोगतैरेव बहुभिः कारणैर्मन्दीभवति अनुकारी नटोऽस्ति सुखयुक्तो दुःखयुक्तो वेति प्रतीत्या सामाजिकेऽपि सुखदुःखप्रतीतिसम्भावनाऽस्ति इति च द्वितीयो विघ्नः । किन्तु यतः नटो रामादिस्वरूपानुकरणे तद्योग्यराजभूषामुकुटादिकं धारयित्वा रङ्गमञ्चमुपतिष्ठति (राजभवनस्यापि काननस्यापि वाऽनुकृते मध्ये), अतो प्रत्यक्षेऽनुकारिणि नटे सुखदुःखप्रतीतिसम्भावना निवार्यते । अनुकार्ये रामादौ हि सुखदुःखमिति प्रतीतिर्जायते । (अनुकरणाभिनयावलोकनजातप्रमोदे स्वसुखदुःखसम्वेदनं विस्मर्यते च ?) दृश्यकाव्ये तु सर्वं प्रत्यक्षं भवमानं दृश्यते हि (अनुकृतरूपत्वेन), श्रव्यकाव्ये विभावादीनां मानसी साक्षात् कृतिः (कल्पना) जायते । तस्मात् परसम्बद्धविभावादीनाम् अन्यस्मिन् देशे च काले च स्थितेर्ज्ञानं तिरोधीयते ।

हरिश्चन्द्र दीक्षितः

नाट्यदर्शने काव्यश्रवणे वा चित्तस्य स्वसुखदुःखाभिभूतत्वात् जन आत्मानं रसे न योजयितुं शक्नोति इति यस्तृतीयो विघ्नः स साधारण्यमहिम्ना च नाट्यदर्शने च वाद्यनृत्यगीतोपलब्धविनोदेन अपसार्यते ।

'किञ्च प्रतीत्युपायानामभावे कथं प्रतीतिः' ? प्रीतेरुपायाः क इति अत्र नोक्तम् । यत् पूर्वमुक्तं तदनुसारेण अनुकारिणि रामत्वस्याऽभावः । तत्र रामत्वं च स्थायिभावानुभावत्वं च सर्वम् असत् । अतः कथं रसः प्रतीयताम् इति चतुर्थो विघ्नः ।

यावत् किमपि प्रत्यक्षप्रमाणेन न प्रामाण्यताम् तावत् केवलं शब्दानुमानाभ्यां प्रमाणितस्य न प्रमाणम् । काव्ये च नाट्ये च शब्दानुमानयोर्हि प्रमाणता । अयं पञ्चमो विघ्नः ।

संगीतसम्वलिताभिनयकौशलप्रभावाद् यदसद् यदप्रत्यक्षं च तस्य सत्त्वं च प्रत्यक्षत्वं निस्संशयतया प्रतीयते हि यथा अलातपरिभ्रमणे असतोऽपि चक्रस्य सत्सदृशी प्रत्यक्षप्रतीतिरिति चतुर्थपञ्चमविघ्नयोः निराकरणम् ।

अप्रधाने च वस्तुनि कस्य संविद्विश्राम्यति ? अस्पष्टमिदं वाक्यम् । वस्तुनि = रसे – इति अनुवादः । व्यभिचारिभावानां प्राधान्ये स्थायिभावस्य अप्राधान्यम् ? स्वभावोक्तेर्वा वस्त्वलंकारध्वन्योः प्राधान्ये वा रसस्य अप्राधान्यम् ? एकस्मिन् स्थायिभावे प्रधाने जाते अन्यस्य प्राधान्यम् इत्ययं षष्ठो विघ्नः ।

स्थायिन्यश्चित्तवृत्तयः सर्वेषु मनुष्येषु वर्तन्ते । कदाचित् कोऽपि स्थायीभावः प्राबल्येन उत्पद्यते, कदाचित् कोऽप्यन्यः । स्थायिभावविशेषउदितोव्यभिचारिभावविशेषा अपि उत्पद्यन्ते । कदाचित् व्यभिचारिभावानां प्राधान्येन उत्पत्तावपि ते स्थापिनि हि सूत्रेऽनुस्यूता मणिगणा इव श्रिता भवन्ति तस्मिन्नपि विच्छित्ति जनयन्ति । अतः स्थापिनः कदापि न अप्राधान्यम् । स्थाय्युन्मुखा हि व्यभिचारिणः स्थाय्युन्मुखा हि स्थाय्यपेक्षिणी हि रस प्रतीतिरिदं षष्ठस्य विघ्नस्य

निराकरणम् ।

(अस्मिन् प्रकरणे अभिनवगुप्तस्य व्याख्यायाम् अतिविस्तारेण सार्धं पाठत्रुटिश्च अभिव्यक्तिजाटिल्यं च वर्तते, तथापि यत्रेदं ग्रन्थ-कारेण यदुक्तं तत्कथञ्चिदभिनवगुप्तमतानुसार्येव ।)

स्थायिभावस्य यत् कारणमुपस्थाप्यत तद् यथार्थतया तस्य कारणम् अस्ति वा न वा ये तस्यानुभावा अभिनीयन्ते (वर्ण्यन्ते वा) ते तस्यैवानुभावाः सन्ति वा न वेति संशयः सप्तमो विघ्नः। 'बन्धु-विनाशो यत्र विभावः परिदेविताश्रुपातादिस्त्वनुभावाश्चिन्ता दैन्या-दिव्यभिचारी, सोऽवश्यं शोक एव' (अभिनवगुप्तस्यैव वाक्यम्)। यद्यपि अश्रुपातश्चक्षुर्व्याधिविशेषेऽपि तथापि यत्र बन्धुविनाशात् कोऽपि रोदिति तत्र रोदनेन सहाश्रुपातः शोकस्यैवानुभावश्च । तदनुभावानु-मितशोकस्य कारणं बन्धुविनाश एव इति सप्तमविघ्नस्य वारणम् ।

यदि अभिनवगुप्तात् पूर्वम् इमे विघ्नाः कल्पिता अभविष्यन् तर्हि एतेषां निवारणं विद्वत्त सूचकमभविष्यत् ।

काव्यनाट्यरसे चित्तं वा मनो वा न निवेश्यते । रसो भवति चित्तस्य वा मनसो वा विषयः । अपूर्वस्थितिः स रसस्तत्रैव निष्पाद्यते। अतो मिथ्यास्ति प्रथमो विघ्नः। नाट्यदर्शनावधौ अनुकृतरूपत्वेन सर्वं प्रत्यक्षं वर्तते प्रत्यक्षसद्वत् भासते च। काव्यपाठावधौ सर्वं वर्णितं मनः कल्प्यमानं भवति। अतः कुतो देशकालभेदस्यविघ्नः। यदा कोऽपि काव्यं पठति वा शृणोति वा तदा वर्णनानुसारं यथा भयानक-स्य सिंहस्य कल्पना पाठकस्य वा श्रोतुर्वा मनसि जायते तथा रति-योग्यायाः स्त्रियाः। नाट्याभिनये निरीक्ष्यमाणे सामाजिकेषु प्रत्येकः पृथक् पृथक् भयानकं सिंहं हास्योत्पादकं विदूषकं वा मज्जामांसपुरी-षादिकं वा रत्युत्पादिकां नारीं वा पश्यति। अत आलम्बनं स्वस्या-स्ति वा परस्यास्ति वा इति भावनैव न सामाजिकस्य जायते । अतो द्वितीयोविघ्नोऽपि न सम्भवति ।

स्वप्रत्यक्षसुखान् निवृत्तो हि जनः नाट्याभिनयावलोकने काव्यपाठे

वा प्रवर्त्तते । स्वसुखं भुञ्जानो को जनोऽभिनयं पश्यति काव्यं शृणोति पठति वा । स्वानुभूतसुखस्मृतिर्न भवितुमर्हति नाट्ये वा काव्ये वा प्रवृत्तेर्बाधिका । इतीयं तृतीय स्यविघ्नस्य वृथात्वम् ।

यदा वयं काव्यं पठामो वा शृणूमो वा, तदा सर्वे दुष्यन्तशकुन्तलाऽऽश्रमोपवनादयोऽस्माकं मनसिकल्प्यमाना भवन्ति । मनस्तैः प्रभाव्यतेऽपि । नाट्याभिनयावलोकनेषु अयं नट इति तथ्यं यद्यपि सामाजिकाः कदापि न विस्मरन्ति (अन्यथा ते तत्र व्याघ्रं वा रावणं वा दृष्ट्वा विद्रवन्तु सुन्दरीं नारीं वा सुन्दरं पुरुषं वा दृष्ट्वा तदालिङ्गनाय उपसर्पन्तु वा । तथाप्यभिनयकलाप्रभावेन तषु मनोभाव प्रेरकः सत्याभासोऽपि । तस्मान्न सम्भावनीयश्चतुर्थोऽपि विघ्नः ।

अभिनयस्त प्रत्यक्षवदेवावलोक्यते । अतः किं तत्र अप्रामाण्यम् । यत् काव्यं पठ्यते वा श्रूयते वा तदनुसारं विभावादीनां मनसि भवति प्रमाणनिरपेक्षा सृष्टिः । इति पञ्चमस्य विघ्नस्य व्यर्थत्वम् ।

यत्र व्यभिचारिणां प्राधान्यम्, तत्र तु स्थायिभावस्य तदाधारिणी स्थितिर्भवत्येवेत्युपगमे न काऽपि हानिः । किन्तु श्रव्यकाव्ये सर्वत्र न रस इत्येतदपि सत्यम् । ध्वनिवाद्यभिमतेषु वस्तुध्वनिषु चालंकारध्वनिषु बहुत्र रसो न भवति । रसगङ्गाधरकर्ता जगन्नाथः स्वभावोक्तावपि रसं नैवामन्यत । अतः षष्ठो विघ्नोऽपि मृषा कल्पितः ।

संशयरूपत्वेन सप्तमविघ्नस्य कल्पनं तु नितान्तं व्यर्थम् । नाट्ये सर्वं विभावादिकम् अनुकृतरूपत्वेन प्रत्यक्षमेव वर्तते । श्रव्यकाव्ये घटनानां क्रमशः वर्ण्यमानत्वात् श्रोता वा पाठको वा प्रामाण्येन जानाति यत् लक्ष्मणो मेघनादेन क्षिप्तया शक्त्या आहतोऽभवत् । तस्य ज्येष्ठो भ्राता रामस्तं पतितं च मूर्च्छितं च दृष्ट्वा रोदिति च विलपति । कस्य तत्र शोके संशयः ।

यदि विघ्नाः सम्भाव्यन्तामेव, तर्हि इमे चत्वार एव विघ्नाः सम्भवन्ति—

१— नाट्यदर्शने इदं सर्वमनुकृतं कृत्रिमं च, न सत्यम् ।

हरिश्चन्द्र दीक्षितः

२– काव्ये च नाट्ये च एतत् सर्वं परगतम् । अनेन सह मम कः सम्बन्ध इति अवधारणा ।

इमौ क्रमशोऽभिनवगुप्तेन कल्पिताभ्यां द्वितीयं चतुर्थविघ्नाभ्यां समौ ।

३– अनुभावैः स्थायिभावानामनुमाने असामर्थ्यम् ।

४– विरक्तिः सदाचारिता विशेषतः शृङ्गाररसानुभवे । इमेऽपि विघ्ना यथार्थतया असन्त एव । अनुभावैः स्थायिभावानामनुमाने अविकसित-बुद्धयो बालाः बुद्धिहीना वा विक्षिप्ता हि वा जना असमर्था भवन्ति न सामान्या जनाः । ये विरक्ताः पूर्णतया सदाचारिणो वा, ते नाट्यस्याव-लोकने, काव्यश्रवणे वा विशेषतः शृंगारात्मके प्रवर्तन्त एव न । अत-स्तृतीयचतुर्थविघ्नौ नाम्नैव वर्तेते न सत्त्वतया ।

नाट्यदर्शने नाट्यकला प्रभावाद् अनुकृतम् अनुकृतत्वस्य प्रतीत्या सहैव सदपि भासते । एनम् विघ्नं कश्चिन्मूर्खोऽपि नानुभवति । यत्र रसस्य निष्पाद्यता भवति कवः प्रयोजनं, तत्र नाट्य वा काव्ये वा कविः पूर्वत एव साधारणीकृतमालम्बम उपस्थापयति । अतः परगत-त्वस्यापि न कापि सम्भावना शिष्यति । इदमुक्तमेव सर्वं स्वधेयमप्येव यत् काव्ये च नाट्ये परगतत्वप्रतीत्या सहैव आत्मगतत्वस्यापि प्रतीतिर्जायत एव । अतो न परगतत्वमपि विघ्नरूपम् ।

अधुनाऽभिनवगुप्तकृतरसनिष्पत्तिसूत्रव्याख्या विवेच्यते–

स्थायिभावास्तु लोक एव स्त्रीपुरुषाणां मनस्सु उत्पद्यन्ते अनु-भावैरनुमेयाश्च क्रियन्ते । लौकिका एव स्त्रीपुरुषाः स्वजीवनकाले स्वजीवनोपरान्तं वा अनुक्रियन्ते । अतो यस्य कारणं लौकिकं तदनु-करणं कथं भवितुं शक्नोत्यलौकिकम् । लोके भवन्ति बहूनि कारण-कार्यसहकारीणि । मेघः कारणं, वृष्टिः कार्यं वातस्पन्दनं सहकारि । अतो यावत् 'कस्य' इति नोच्यते, तावत् किं विशिष्टानि कारणा-दीनीति कथं ज्ञास्यते । इदं (स्त्रीरूपं) रतेः कारणम्, इदं (कटाक्षा-दिरूपं) रतेः कार्यम्, इदम् (औत्सुक्यादिरूपं) रतेः सहकारि इति

यदि व्यपदेशेषु लौकिकत्वम्, तर्हि कथं न इयं स्त्री रतेरालम्बनम्, अयं कटाक्षो रतेरनुभावः अयं (मुखदीप्तिसूचितो) हर्षो रतेः सहकारी इति व्यपदेशेषु। अतो नाट्ये विभवादायो अनुकृता भवन्ति इति कारणेन तेषाम् अलौकिकत्वं कदापि मन्तुं शक्यते, नहि ते सर्वेषु सामाजिकेषु रसरूपत्वेन अनुभूयमानं समानमेव स्थायिभावं जनयन्ति इति कारणेन च। यदा कस्यांचित् सभायां कापि नृत्यन्ती च गायन्ती च वेश्या सुन्दरी निरीक्षमाणान् बहून् सभ्यान् युगपद् वा एकैकं कृत्वा स्वकटाक्षस्मित्यादिभिर्मोहयति तेषां चित्तेषु रतिं च उत्पादयति, तर्हि किं तस्यां किमप्यलौकिकत्वं भवति, यद्यपि तत्र स्थिताः सर्वेऽपि जनाः जानन्ति यत् तत्क्षणमेव सा परामर्शाय नोपलप्स्यते। एवमेव यदा कोऽप्यैन्द्रजालिकः किमप्यसाधारणं कर्म कुर्वन् सर्वान् दर्शकान् युगपद् विस्मयाभिभूतान् करोति तर्हि विस्मयभावकरूपत्वेन तस्मिन् किमलौकिकं भवति। अतो विभावादीनामलौकिकत्वस्य कल्पना निष्प्रयोजनैव।

विभावा अनुभावाश्च व्यभिचारिणश्च सामाजिकानां धियि (बुद्धौ, चित्ते, मनसि) 'सम्यग्योगं सम्बन्धमैकाग्र्यं वा' आसादयन्ति (गच्छन्ति) चुक्रगुडमरिचादिवदापावके इत्यपि अभिनवगुप्तस्य मतिर्मृषा। यथा स्थायिभावानां व्यभिचारिभावानाम् अपि नाट्ये अभिनीयमाना अनुभावा आलम्बनाश्रययोः रूपाभ्यां सह प्रत्यक्षा एव भवन्ति। व्यभिचारिणां भावाः केवलमनुमीयन्ते। स्थायिभावा अनुमीयन्ते चानुभूयन्ते च। विभावादिवर्णनं पठन् वा शृण्वन् वा जन आङ्गिकानुभावैः सह आलम्बनाश्रययोः रूपे स्वमनसि कल्पयति। तस्याः कल्पनाया अपि परिणामेन मनसि (साधारणीकृतम्, परोक्षम् कल्पनयैव स्वसम्बद्धम्) आलम्बनं प्रति (निवृत्तेन्द्रिययोगजन्यकष्टः) स्थायीभावविशेष उत्पद्यते यो रसरूपत्वेन भुज्यतेऽनुभूयते वा। इयमेव लोके स्वसम्बद्धरत्यादिकारणं प्रति स्थायिभावोत्पत्तेः नाट्ये वा काव्ये उत्पन्नस्य स्थायिभावस्य विलक्षणता। अतोऽभिनवगुप्तस्य मतं

हरिश्चन्द्र दीक्षितः

मुनिभरतमतस्यापि प्रतिकूलं यदेवं प्रकटितमस्ति– यथा नानाव्यञ्ज–
नसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादीं–
श्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् (प्रदर्शितान् अनुमे–
यीकृतान्) वागङ्गसत्त्वोपेतान् भावानास्वादयन्ति सुमनसः प्रेक्षकाः
हर्षादींश्च गच्छन्ति। इति केन आस्वादयन्ति ? न रसनेन्द्रियेण।
'आस्वादयन्ति मनसा' (ना० शा० ६।३३) सामाजिकः स्वमनस्येवो–
त्पन्नं स्थायिभावं भुनक्ति भोक्तुं शक्नोति, न परमनोगत्वम्।

रसविघ्ननिवारणायाभिनवगुप्तः 'साधारणीकरणस्य' उपयोगं स्वीकरोति। किन्तु स्वव्याख्यायां भट्टनायकस्य महिमानमपचेतुं तस्योल्लखं न करोति।

नहि स्थायिभावो अपितु (काव्य) अर्थो हि रसतां नीयते इति स्वमौलिकतां साधयितुं, रसो भवति व्यंग्यार्थ इति साधयितुं वा स्थायिभावस्य रसतां नेयत्वं स नोल्लिखति।

किन्तु 'अर्थ' इति शब्देन स्थायिभाव एव अभिप्रेत इति बुद्ध्वा साधारणीकृतैर्विभावैः सामाजिकानां चित्तेषु अभिव्यक्तः (उद्भावितः न च शब्दार्थरूपत्वेन बोधितः) स्थायिभाव एव रसरूपत्वेन अनुभूयते इति बुद्ध्वा वा मम्मटादिभिः अर्थ इत्यस्य स्थाने (रत्यादिः) स्थायि–भावो गृहीतोऽस्ति। 'काव्यार्थान् भावयन्ति' इति वाक्यखण्डं भरत–नाट्यशास्त्रादुद्धृत्य अभिनवगुप्तेन तद्दुरुपयुक्तमस्ति। नाट्यशास्त्रस्य सप्तमाध्यायस्य प्रारम्भ एव लिखितमस्ति– 'वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावाः' इति। पुनः

विभावैराहृतो योऽर्थो अनुभावैस्तु गम्यते।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥१॥
वागङ्गमुखरागेण सत्त्वेनाभिनयेन च।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते ॥७।२॥

वागङ्गसत्त्वोपेतान् इति किम् ? वाचिकैराङ्गिकैः सात्त्विकैश्चा–नुभावैरुपेतान् अभिनीतान् वा अनुभावैः किमुपेयते प्रदर्श्यते व्यज्यते

हरिश्चन्द्र दीक्षितः

वा अनुभावैः किमुपेयते प्रदर्श्यते व्यज्यते वा ? स्थायीभाव एव। विभावैः किमाह्रियते, अनुभावैः किं गम्यते अर्थात् अनुमीयते ? स्थायी भाव एव। अनेनैव सिद्ध्यति अभिनवगुप्तस्य मतस्य दुष्टता। भाव इति शब्दो भरतेन विभावानुभावव्यभिचारिषु इत्येतेषु त्रिषु कस्याप्यर्थे प्रयोज्यते। पुनः भावा इति शब्द एकोनपञ्चाशत् स्थायिभावसात्त्विकभावव्यभिचारिभावानामर्थे प्रयोज्यते, यषु अष्टौ सन्ति स्थायिभावाः अष्टावेव सात्त्विका भावास्त्रयस्त्रिंशद् व्यभिचारभावाश्च। इमेषामेव नाट्येषु अभिनयानां विधाने श्रव्यकाव्येषु वर्णने वा कविः स्वान्तर्गतं भावं स्वकल्पितं स्वभावितं वा काव्यनाट्यवस्तु, न केवलं स्वगतं स्थायिभावं व्यनक्ति प्रकाशयति वा। अतोऽपि इमे भावा इति संज्ञेयाः। अभिनीता वा वर्णिता वा विभावादयो हि सामाजिकानां चित्तेषु (साधारणीकृतमालम्बनं प्रत्युद्भूतान् स्थायिभावरूपान्) रसानपि भावयन्ति। अतोऽपि इमे भावा इति संज्ञेयाः।

नानाभिनयसम्बद्धान् भावयन्ति रसानिमान् यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥ना० शा० ७।३॥ भरतस्य नाट्यशास्त्रे क्वचिदपि साधारणीकरण इति शब्दो न प्रयुक्तः न च साधारणीकरणप्रक्रिया व्याख्याता। साधारणीकरणस्याविष्कर्ता भट्टनायक एव। अभिनवगुप्तोऽस्मिन् विषये तस्य महत्त्वं न स्वीकर्तुमिच्छति। अतः स्वकृतमुख्यव्याख्यायां स साधारणीकरणम् अनुल्लिख्य तत्पश्चात् तस्याः बहुधा स्पष्टीकरणे तदुल्लिखति- 'तद्विभावादिसाधारण्यवशसंप्रबुद्धोचितनिजरत्यादिवासनावेशवशाच्च न विघ्नान्तरादीनां सम्भवः।' इति। मम्मटस्य वचनेषु प्रस्तुतायाम् अभिनवगुप्तकृतव्याख्यायां विभादीनां साधारणीकरणमुल्लिखितमस्ति। पुनरेतद् वचनं शंकुकस्य मतस्य विवेचनं भवितुं शक्नोति, न च भट्टनायकस्य। तथैव नैतदभिनवगुप्तस्य विचारमौलिकत्वास्य प्रमाणम्। स्थायिभावो रूपहीनत्वान्नभवत्यभिनेयः। तदनुभावो भवन्त्यभिनेयाः। भरतो नाट्ये हि रसनिष्पत्तिं व्यचारयत्।

हरिश्चन्द्र दीक्षितः

काव्येऽपि अनुपयोगित्वात् स्थायिभावो न संज्ञाप्यते, यदि क्वचित् केनापि कारणेन संज्ञाप्यते, तर्हि रसनिष्पत्तये तस्यानुभावा अवश्यमेव वर्ण्यन्ते । आलम्बनरूपो हि विभावः, आलम्बनोद्दीपनद्वयात्मको विभावो वा यथा नायके (आश्रय) तथा सामाजिकेऽपि स्थायिभावविशेषमुद्बोधयति, निष्पादयति व्यनक्ति वा । स एव रसरूपत्वेनानुभूयते, भुज्यते, चर्व्यते वा । चर्वणक्रियाप्रयोगः ग्राम्यत्वमेव । भरतस्य मते तु स्पष्टतया सामाजिकानां चित्तेषु तेषामेव स्थायिभावा रसरूपत्वेन विभाव्यन्ते— "स्थायिभावानास्वादयन्ति सुमनसः (सहृदयाः) प्रेक्षकाः" ना० शा० सूत्रव्याख्या ।

नानाभिनयसम्बद्धान् भावयन्ति रसानिमान् ।
यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ।।७।३।।

विभावानुभावानां न किमप्यलौकिकत्वं भरतोऽमन्यत, यथाऽभिनवगुप्तो वारं वारं प्रतिपादयितुं यतते । "तत्र विभावानुभावौ लोकप्रसिद्धौ" ।

लोकस्वभावसंसिद्धा लोकयात्रानुगामिनः ।
अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधैः ।।
ना० शा० ५-६

लोचने याऽभिनवगुप्तेन स्व-व्याख्या उदाहृताऽस्ति तस्यां रसास्वादे घनमोहान्धसंकटता निवृत्तिरिति विचारः, (चित्तस्य) द्रुतिविस्तारविकासस्य च विचारः, रसस्य ब्रह्मानन्दसहोदरत्वस्य विचारश्च भट्टनायकादेव चोरितोऽस्ति ।

रस्यतैकप्राणो ह्यसौ न प्रमेयादिस्वभावः । तर्हि सूत्रे निष्पत्तिरिति कथम् । नेयं रसस्य अपितु तद्विषयरसनाया इति यदभिनवगुप्तस्य वचनं तदपि नाऽवधानयोग्यम् । या रसना सैव चर्वणा वा भुक्तिर्वा । कस्य रसना ? रसस्यैव रसरूपतां प्राप्तस्य स्थायिभावस्यैव ।

विना निष्पादकं न भवति किमपि निष्पाद्यम्, विना कारणं न भवति किमपि कार्यम् । विभावादयो रसनिष्पादकाः । रसो

हरिश्चन्द्र दीक्षितः

विभावादिकार्यो नाऽभविष्यच्चेत् र्तहि विभावादीन् विनाऽपि निरपादयिष्यत् । स्वकारणदीपज्योतिः स्थित्यवध्येव प्रकाशस्तिष्ठति, विभावादिस्थित्यवध्येव रसः । अतः 'विभावादयो न निष्पत्तिहेतवो रसस्य तद्बोधापगमेऽपि रससम्भवप्रसङ्गात्' इति योऽभिनवगुप्तस्य तर्कः, सोऽपि कुतर्क एव ।

अथाऽधुना प्राप्तोऽस्त्यवसरः शंकुकस्योपरि कृतानां अभिनवगुप्तस्य हि तदुपाध्यायस्य वा दोषाक्षेपाणां प्रतिकास्य । नाट्याभिनये नटिनटा भवन्त्यनुकर्तारः । तेषु यदि स्वोद्भूतः स्थायिभावो भवेत् स्वाभाविकैरनुभावैस्ते तं प्रकटयन्तु चेत्, र्तहि कस्मात् ते भवन्त्वनुकर्तारः यदि नटेषु कदाचित् काव्यवाक्योच्चारणप्रभावात् मनाग् भावबोधो जायतामपि, तद्यपि नटीनटैः स्वानुकर्तृत्वरूपं कदापि न विस्मर्यते, विस्मर्यतां चेत्, र्तहि अनर्थो जायताम्– रणमल्लयुद्धाभिनये हिंसा उत्पद्येत । दर्शका अपि जानन्ति यत् तेऽनुकरणमेव पश्यन्ति, न वास्तविकताम् । ते वास्तविकतां पश्यन्ति इति यदि तेषां प्रतिपत्तिर्जायेत र्तहि ते रङ्गमञ्चे सिंहं वा राक्षसं वा दृष्ट्वा पलायन्ताम् । अतो वास्तविकतां बुध्यन्तोऽपि ते (सामाजिकाः) अभिनयषु अभिनयकलाप्रभाववशीभूतत्वात् तत्र सत्यतामप्यनुभवन्ति ।

स्थायिभावोऽनुक्रियत इति कोऽपि मूर्ख एव वक्ष्यति । स्थायिभावस्यानुभावा हि अनुक्रियन्ते । कृत्रिमैरप्यनुभावैर्या स्थायिभावस्यस्थितिरनुमीयते, सैवान्यानुमीयमानविलक्षता । धूमेन पर्वते सतो वह्नेरनुमानम् । नाटके कृत्रिमैरनुभावैरसतोऽपि स्थायिभावस्य सतोऽनुमानेन सदृगनुमानम् । श्रव्यकाव्ये सद्भिरनुभावैः सतः स्थायिभावस्यानुमानम् । नाटके अनुकर्तरि स्थायिभावाः न भवन्ति अनुभावाः कृत्रिमा एव भवन्ति इति कस्यां रसनिष्पत्तिव्याख्यायां न मानयिष्यते । नटे न भवति स्थायिभाव इति सत्यम् । तस्माद्रसोऽपि न भवति इत्यपि सत्यम् । किन्तु नाटके अनुभावानां कृत्रिमत्वात् स्थायिभावस्य अवर्तमानत्वात् अनुमितेरसत्त्वाच्च कथं सामाजिकानां

अनुमितेरसत्त्वाच्च कथं सामाजिकानां रसप्रतीतिः, शंकुकस्य अनुकृति-वादसिद्धान्तोऽस्ति मृषा इति सर्वं वातुलप्रलापवद् असदेव। शंकुकस्य सिद्धान्तस्य अनुमितिवाद इत्येव संज्ञोचिता, नानुकृतिवाद इति यतो नाट्येषु रसनिष्पत्तः कस्यामपि व्याख्यायां विभानुभावानाम् अनुकार्यतैव मानयिष्यते।

अनुभावा यथा लोके भवन्ति रतिशोकादिस्थायिभावानां लज्जा-शंकादिव्यभिचारिभावानामनुमापकास्तथैव काव्ये च नाट्ये च कामं नाट्ये रतिलज्जादिमनोभावानां प्रतीतिराभासिकी एव स्यादिति इति विषये कस्य विप्रतिपत्तिः भवितुं शक्नोति। भरतेनाप्युक्तमस्ति-

विभावैराहृतो योऽर्थो ह्यनुभावैस्तु गम्यते।
वागङ्गसत्त्वाभिनयः स भाव इति संज्ञितः ॥७।१॥

गम्यते=अनुमीयते। भाव इति किम् ? अत्र स्थायी वा व्यभिचारी वा मनोभावः। स एव भरतस्य वचने अर्थ इत्यपि संज्ञितः। विभावैराहृत इति किम् ? विभावैः कारित इति।

मम्मटेन काव्यप्रकाशे यस्मिन् रूपे शंकुकस्य व्याख्या उदाहृतास्ति तस्मिन् रूपे सा सर्वथा निर्दोषेव भाति- 'अन्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानः (कल्प्यमानोऽनुमीयमानो वा) रत्यादिभाव-स्तत्रासन्नपि सामाजिकानां चर्व्यमाणो रस इति शंकुकः। अनुक्रियमाणा विभावानुभावव्यभिचारिण इति सर्वेऽपि कारणकार्यसहकारिणः स्थायिभावस्य अनुमापका गमका वा इति शंकुकस्य व्याख्यायां दोष एव यद्यपि अभिनवभारत्याम् उद्धृतायां शंकुकस्य व्याख्यायां व्यभिचारिणः कृत्रिमनिजानुभावार्जनबलाद्' (ज्ञायन्ते) इति यदुक्तं, तस्यानुसारेण शंकुको व्यभिचारभावं मनोभावमेवाऽमन्यत। अतोऽभिनव-भारत्यामुद्धृतायां शंकुकस्य व्याख्यायाम् (अनुकर्तरि) लिङ्गबलतः प्रतीयमानः स्थायिभावो मुख्यरामादिगतस्थाय्यनुकरणरूपं इति यदुक्त-मुक्तमस्ति तस्य तात्पर्यं स्थायिभावस्य विभावानुभावानामेवानुकरणं मान्यताम्। श्रव्ये काव्ये कुत्र भवति तदनुकरणम्। तत्र तु प्रथमं राम-सीतादावनुभावैर्हि तद्रतिरनुमीयत एव।

हरिश्चन्द्र दीक्षितः

'सर्वपक्षेषु प्रतीतिरपरिहार्यारसस्य' इत्यभिनवगुप्तः । भट्टनाय-केन अनुमितिरूपत्वेन प्रतीतिः खण्डिताऽस्ति, भुक्तिरूपत्वेन सैवोपगता-स्ति तेन। सैव भुक्तिरभिनवगुप्तेन तथैव सरण्या व्यक्तिरूपत्वेन उपगताऽस्ति । किं तत्र नवीनत्वम्?

लोचने अभिनवगुप्तेन उद्धृतायां शंकुकस्य व्याख्यायाम् 'अनुका-र्याभिन्नामते नर्तके आस्वादयिता सामाजिक इत्येतावन्मात्रमद' इति यदुक्तमस्ति तस्य किं तात्पर्यम् ? यदि नर्तक एव न सामाजिक आस्वादयिता सामाजिको दर्शको हि भवति आस्वादयिता, तर्हि किं दर्शकोऽनुमितं ह्यास्वादयति, आस्वादयितुं शक्नोति वा ? निस्संशयं यदनुमितं च स्वान्तसि उद्भूतं च तदेवास्वादितं भवति । अतो-ऽभिनवभारत्यां शंकुकस्य व्याख्यायाः विवेचने तथा हि अनुकरणरूपो रस इति यदुच्यते तत् किं सामाजिकप्रतीत्यभिप्रायेण उत नटाभि-प्रायेण इति अथ नटगता चित्तवृत्तिरेव प्रतिपन्ना सती रत्यनुकारः शृङ्गार इत्युच्यते, तत्रापि किमात्मकत्वेन सा प्रतीयते चिन्त्यम् । ननु प्रमदादिभिः कारणैः कटाक्षादिभिः कार्यैः धृत्यादिभिश्च सह-कारिभिर्लिङ्गभूतैर्या लौकिकी कार्यरूपा कारणरूपा सहकारिरूपा च चित्तवृत्तिः प्रतीतियोग्या तदात्मकत्वेन सा नटचित्तवृत्तिः प्रतिभाति हन्त तर्हि रत्याकारेणैव प्रतिपन्नेति दूरे रत्यनुकरणतावाचो युक्तिरिति (इमेषां कृत्रिमजाटिल्ययुक्तानां वचसामेतदेव तात्पर्यम् यद्- यदि रङ्गमञ्चे नाट्यकलाप्रभावतः कृत्रिमा अपि कारणकार्यसहकारिणः सत्यवत् प्रतीयन्ते, तर्हि तत्र रत्यादीनामपि लोकवत् प्रतीतिर्मन्तव्या, न च मिथ्या । तस्मात् कुतस्तत्र तदनुकरणस्य ज्ञानम्) नाट्ये अवा-स्तविका विभावादयः काव्यशिक्षाबलोपकल्पिताः कृत्रिमाः सन्तः किं कृत्रिमत्वेन सामाजिकैः गृह्यन्तो न वा ? यदि (कृत्रिमत्वन) गृह्यन्ते तदा तैः कथं रतेरवगतिः । इति । 'कारणान्तरप्रभवेषु हि सुशिक्षितेन तथा ज्ञाने वस्त्वन्तरस्य अनुमानं तावद् युक्तम्, अशिक्षितेन तु तस्यैव प्रसिद्धस्य कारणस्य इति (अस्य तात्पर्यम्- कस्यचित् कार्यस्य

हरिश्चन्द्र दीक्षितः

प्रसिद्धाऽप्रसिद्धयोर्द्वयोः कारणयोः सतोः (यथा वृश्चिकस्य वृश्चिकाज् जन्यत्वम्– इत्येतद् प्रसिद्धम्, गोमयदधिमिश्रणाज् जन्यत्वम्– इत्येतद् अप्रसिद्धम्) सुशिक्षिता अप्रसिद्धमपि कारणं ज्ञातुं शक्नुवन्ति, अशिक्षिताः केवलं प्रसिद्धं हि । अतो नाट्येषु साधारणा जनास्तु कृत्रिमानपि अनुभावान् दृष्ट्वा तेषां रत्यादिरूपाणि वास्तविकान्येव कारणानि अनुमास्यन्ति, किन्तु शिक्षितास्तत्र अनुकरणरूपकृत्रिमं हि कारणं द्रक्ष्यन्ति । अतस्ते तत्र कथं रतिमनुक्रियमाणां ज्ञास्यन्ति इति) इत्येते चान्ये च ये दोषा अभिनवगुप्तेन शंकुकस्य व्याख्यायाम् आविष्कृताः, येषां संख्या शब्दान्तरेण पुनरुक्तिभिर्वर्धितास्ते सर्वे द्वेषेण वा अज्ञानेन वा प्रेरिताः– सम्भावनाधिक्येन द्वेषवशादेव । अभिनवगुप्तस्य गुरुरेतादृशः द्वेषी न भवितुमशक्नोत् । स्वाविष्कृतान् दोषान् स स्वगुरुमुखेन कथापयित्वा स्वगुरोर्हि बुद्धिं दूषितवानस्ति ।

नाट्यदर्शने रसप्रतीतिः कथं भवति इति विषये वस्तुतः केवलं द्वौ संशयावेव उपस्थापयितुं शक्यते– यदि अनुकर्तृनटीनटेषु अनुकार्यादीनां सीतारामादीनाम् वा शकुन्तलादुष्यन्तादीनां वा निस्संशयतया सीतारामादीनामेव सत्त्वस्य प्रतीतिर्भवति, तर्हि तेषां रतिप्रवृत्त्याद्याचरणं पश्यतां सामाजिकानां पररतिप्रवृत्तिदर्शनजन्यलज्जाजुगुप्साभ्यां प्रतीताभ्यां भवितव्यम् रामरावणादीनां युद्धप्रवृत्तिं पश्यतां भयेन प्रतीतेन । यद्यभिनये कृत्रिमत्वस्यैव सर्वथा सत्या प्रतीतिर्भवति, तर्हि अपि सामाजिकानां स्थायिभावप्रतीतिपुरस्सरा रसप्रतीतिः कदापि न सम्भाविनी, यद्यपि सहृदयानामभिनयकलानुशीलनजन्यानन्देन तत्रापि अनुभाव्येन भवितव्यमिति ।

अनयोरपि संशययोऽकियती व्यर्थता इति ते सर्वेऽपि सामाजिकाः जानन्ति यैः रङ्गमञ्चे वा चलचित्रपटे वा नाट्याभिनयोऽवलोकितोऽस्ति । अनुकरणमेवावलोक्यते इति सामाजिकाः प्रथमतयैव जानन्ति । अत एव तेषां न पररतियुद्धबन्धुमरणदर्शनात् लज्जाभयशोकादीनां लोकवत् प्रतीतिः । ते अनुकरणं पश्यन्ति इति ज्ञानेन सह ते

सत्यतामपि पश्यन्ति इत्यपि मनः- स्वभाववशाद्भवति सामाजिकानां प्रतीतिः। तत एव आलम्बनस्य साधारण्येन उपस्थापितत्वात् सामाजिकानां रसरूपायितस्थायिभावविशेषस्य प्रतीतिः। शंकुकस्य व्याख्यायां ये दोषा अभिनवगुप्तेन आक्षिप्तास्ते 'अथाधुना प्राप्तोऽस्त्यवसर' इत्यादिवाक्यमारभ्य 'निस्संशयं यदनुमितं च स्वान्तसि उद्भूतं तदेवास्वादितं भवति इति वाक्यं यावत् पूर्वमेव निराकारिषत।

अभिनवभारत्यामभिनवगुप्तः व्याख्योद्भवकालक्रमानुसारेण प्रथमं लोल्लटस्य, ततः शंकुकस्य ततो नाटकस्य ततः कस्यचित् सांख्यवादिनो व्याख्यामुदाहृत्य स्वव्याख्यामुपस्थातिवान्। किन्त्वेतद्विपरीतं ध्वन्यालोकस्य लोचनव्याख्यायाम् प्रथमं भट्टनायकस्य, ततो लोल्लटस्य, ततः शंकुकस्य व्याख्यां ततः केषांचिदन्येषां निस्साराः व्याख्या उदाहृत्य तासां पश्चाद् अभिनवगुप्तः स्वव्याख्यामुदाहरत्। तत्र भट्टनायकस्यैव रसनिष्पत्तिव्याख्यायां शब्दान्तरेण स्वायत्तीकृत्य, शंकुकाद् रसनिष्पत्तौ अनुमानस्य आवश्यकतां च गृहीत्वा स्वमौलिकत्वं प्रदर्शयितुमपतत्। सांख्यमतानुसारिणी रसनिष्पत्तिव्याख्या अभिनवगुप्तस्य वञ्चनाया अन्याः सम्भावना इत्यस्य नाम्नः प्रकरणे विचारितास्ति।

रसगङ्गाधरकर्तृणा जगन्नाथेन अभिनवगुप्तस्य अयमन्यायोऽलक्षि। किन्तु अस्य अन्यायस्य कारणाद् अभिनवगुप्तो न निन्दितः। प्रत्युत रसगङ्गाधरे अभिनवगुप्तस्य व्याख्यां प्रथमम् उद्धृत्य, तदनन्तरं भट्टनायकस्य व्याख्यामुद्धृत्य भट्टनायकेऽभिनवगुप्तस्य तेन ऋणीत्वं प्रादर्शि। '(भट्टनायकस्य) मतस्यैतस्य पूर्वस्मात् (अभिनवगुप्तस्य मताद् भावकत्वव्यापारान्तरस्वीकार एव विशेषः। भोगस्तु व्यक्तिः। भोगकृत्वं तु व्यञ्जनादविशिष्टम्' इति भट्टनायकाभिमतव्याख्योदाहरणानन्तरं जगन्नाथस्य विज्ञप्तिः। अत्र यत् किमप्युक्तं, तद्ध्वन्यालोके लोचनव्याख्यामाधृत्यैव। तथाप्यत्र किमप्यन्तरमपि लक्ष्यते। जगन्नाथो लिखति भावकत्व-व्यापारान्तरस्वीकार एव विशेष इति

हरिश्चन्द्र दीक्षितः

अभिनवगुप्तस्तु लिखति– किमेवमपूर्णं काव्यं रसान प्रतिभावकम् ? (शब्दार्थयोः) द्वयोस्तु भावकत्वं (व्यञ्जकत्वनाम्ना) अस्माभिरेवो–क्तम– 'यत्रार्थः शब्दो वा तमर्थं - व्यंक्तः इति । भट्टनायकः पूर्वं प्रादुरभवत् अभिनवगुप्तस्तमनुजातः । भट्टनायको भावकत्वं शब्दार्थ–व्यापारममन्यत । स निर्बुद्धिरासीत् । अभिनवगुप्तः सुधीमान् ।

लोके सर्वमपि भवति कारणस्य कार्यम् (ईश्वरं विहाय) । रसो भवत्यकार्यः । अकार्यत्वमस्याऽलौकिकत्वम् । इति यैरुक्तम्, तेषां महामूर्खत्वम् । भरतमुनिना निष्पत्तिशब्द उत्पत्यर्थं एव प्रयुक्तः, भावकशब्द उत्पादकार्थे, भावयन्ति इति क्रियापदम् उत्पादयन्ति इति अर्थे हि । विभिन्नव्यञ्जनयोगान् नवः स्वाद उत्पद्यत एव । विभावा–दीनां वर्णनाद् अभिनयाद् वा रस उत्पद्यते । उत्पादिकया दीपशिखया सह उत्पद्यमानो वा वर्तमानो वा प्रकाशः दीपशिखायाः लोपे लुप्यति । भरतस्य नाट्यशास्त्रे रसनिष्पत्तिः क्रियानिरूपणेसु सर्वत्र उत्पत्तिरि–त्यस्य निष्पत्त्यर्थे भावनार्थे वा प्रयोगः कृतोऽस्ति । यथा– शृङ्गारो नाम रतिस्थायिभावप्रभवः । तत्र सम्भोग (शृङ्गार–) स्तावद् ॠतुमाल्यानुलेपनालंकारेष्टजनविषयवरभवनोपभोगादिभिर्विभावैरुत्प–द्यते इति 'हास्यो नाम हासस्थायिभावात्मकः विकृतिपरवेषालंकार–धाष्ट्र्यदोषोदाहरणादिभिर्विभावैरुत्पद्यते' इति । 'करुणः शापक्लेश–विनिपतितेष्टजनविप्रयोगविभवनाशादिभिर्विभावैरुपजायते' इति । रौद्रोनाम क्रोधस्थायिभावात्मकः क्रोधघर्षणाधिक्षेपावमानमात्सर्यादि–र्विभावैरुत्पद्यते इति । वीरो नामोत्साहात्मकः असम्मोहाध्यवसाय–प्रभावप्रतापादिभिर्विभावैरुत्पद्यते । इति भयानको नाम भयस्थायि–भावात्मकः विकृतरवसत्त्वदर्शनबन्धदर्शनश्रुतिकथादिभिर्विभावैरुत्प–द्यते । इति । बीभत्सो नाम जुगुप्सास्थायिभावात्मकः । स चाहृद्याप्रश–ताप्रियावेक्षानिष्टश्रव्यादिभिर्विभावैरुत्पद्यते । इति अथाद्भुतोनाम विस्मयस्थायिभावात्मकः । स च दिव्यजनदर्शन - इन्द्रजालसम्भावना–दिभिर्विभावैरुत्पद्यते । इति । एवमेकत्र उपजायत इति क्रियापदं

हरिश्चन्द्र दीक्षितः

विहाय सर्वत्र रसभावनादिनिरूपणे उत्पद्यत इत्येव क्रियापदस्य प्रयोगः। 'शृंगारो नाम रतिस्थायिप्रभव इत्यत्र प्रभवशब्दोऽपि प्रयुक्तः। सर्वेषां रसानां स्थायिभावविशेषात्मकताप्युक्ताऽस्ति। तथापि व्याख्या-कौशलप्रसिद्धोऽभिनवगुप्तः स्थायीभावो हि रसे परिणमति इत्युपगमने विमनस्क इव लक्ष्यते। एवम् अभिनवभारत्यां शृंगाररसनिरूपण-प्रकरणे स स्वयम् अलेखीत् 'सम्भोगे रस उत्पद्यते झटित्येव' इत्यु-क्त्वा लोचनव्याख्यायां भट्टनायकस्य मतं द्वेषवशाद्दूषयितुं किमे-तदपूर्वं काव्यं च रसान् प्रतिभावकत्वमिति यदुच्यते भवत इति भाव-नाद् उत्पत्तिपक्ष एव प्रत्युज्जोवित इति। इयमभिनवगुप्तस्य निर्लज्ज-तैव। काव्यार्थः रसान् प्रति व्यञ्जक इति वचने किमपूर्वत्वम्। 'भरतेनैवोक्तमस्ति नानाभावाभिनयव्यंजितान् स्थायिभावानास्वादय-न्ति सुमनसः प्रेक्षका' इति। भुक्तिस्तु व्यक्तिरेव इति वचने किमपूर्व-त्वम् ? व्यक्तिस्तु भुक्तिरेव भरतस्य मते। भुक्तिरवास्वादः—

आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः॥

स्थायिभावान्

आस्वादयन्ति मनसा ॥६।३३–३४॥

आस्वाद एव चर्वणा अनुभूतिर्वा।

विभावानां भावकत्वं भरतेन बहुश उक्तम्। किन्तु शब्दार्थः कदापि न भवति निर्व्यवधानतया रसस्य भावको वा व्यञ्जको वा। पुना रसो न शब्दस्य व्यङ्ग्यार्थः।

ध्वन्यनुकरणरूपं शब्दं विहाय काव्यवाक्येषु कोऽपि शब्दो न भवति निरर्थकः। ज्ञातार्थे सार्थके शब्दे तदभिन्नतया हि तिष्ठति तदर्थः। शब्दरूप एव ह्यर्थः- अर्थरूप एव शब्दः- संकेतादिना शब्दार्थे ज्ञाते सति। अतो दुरूहत्वदोषरहितान् काव्यवाक्यशब्दान् शृण्वन् वा पठन् वा जनस्तद्रूपानर्थान् तत्कालमेव बुध्यति। तानेवार्थान् अभिहितान् वा शब्दाऽभिन्नान् वा इत्यपि वक्तुं शक्यते। काव्य-वाक्यार्थे विभावानुभाववर्णनपरके सति मनः स्वभावानुसारेण

तेषां मनसि कल्पनासूक्ष्मासृष्टिर्वा जायते । कल्पनार्थः पर्यायेण भावनाशब्देनाप्यभिधीयते । विभावादिषु मनसि कल्पितेषु वर्णितैरनुभावैः रामादीनां (आश्रयाणाम्) सीतारावणादीन् प्रति रतिक्रोधादिकेषु अनुमितेषु आलम्बनस्य यथा आश्रय तथा श्रोतरि पाठकेऽपि च। तस्यैव स्थायिभावस्य उद्बोधकतायाः सामर्थ्यस्य कारणात् परोक्षस्य आलम्बनस्य साधारण्यात् तस्मिन्नुद्बुद्धः स्थायिभावविशेषरसरूपत्वेनानुभूयते । अतः रसो नास्ति व्यंग्यो वा व्यक्तो वा शब्दार्थः, न च भोग्यो वा भुक्तो वा शब्दार्थः । सर्वथाकाव्यवाक्यार्थरहिताद् विभावानुभावानां मूकादभिनयादपि रसो निष्पाद्यते, पुत्तलिकानृत्यदर्शनादपि । तर्हि कथं रसः काव्यार्थः काव्यशब्दार्थो वा । अर्थशब्दस्य प्रयोगो भरतमुनिना वर्ण्यवस्त्वर्थेऽपि प्रयुक्तोऽस्ति यथा नहि रसादृते कश्चिदर्थः प्रवर्तते इति वाक्ये ।

विभाववर्णनपरकात् काव्यवाक्याद् अर्थबोधोऽभिधया मन्तुं शक्यते । विवक्षितान्यपरवाच्यध्वनिरभिधामूलैव । अभिधया शब्दार्थबोधः शब्दार्थबोधस्य वाक्यार्थबोधस्य वा कार्यं मनसि विभावदीनां कल्पना भावना वा तस्याः कार्यं रसरूपत्वेन स्थायिभावविशेषस्य भुक्तिः, व्यक्तिश्चर्वणानुभूतिर्वा (व्यक्त्यर्थे अभिनवगुप्तेनापि अनुभूतिशब्दः प्रयुक्तः– तत्र हीर्ष्याविप्रलम्भसम्भोगविभावानुभावव्यभिचारकृता रसानुभूतिः) यदि अनया रीत्या शब्दस्य वा शब्दार्थस्य वा भट्टनायकाभिमतं व्यापारत्रयं स्वीक्रियतां तर्हि का हानिः ? चतुर्विधेषु अनुभावेषु वाचिकानुभावे काव्यवाक्योच्चारणमपि सम्मेलनम् । अन्यथाभिनय नाटकस्य अकाव्यत्वमापत्स्यते । क्वचित् केवलं शब्दो व्यञ्जको भवति, क्वचित् केवलमर्थः, अथवा क्वचिद् अर्थस्य गौणतया शब्दो व्यञ्जको भवति, क्वचिच्छब्दस्य गौणतया अर्थो व्यंजको भवति इति सिद्धान्तो मौर्ख्यपूर्ण एव संकेतेन शब्दकोशेन वा अर्थे ज्ञाते सति शब्दार्थयोरभिन्नत्वात् ।

रसिकस्याभिनवगुप्तस्य रसिकतां पश्य । अभिज्ञानशाकुन्तलनाटके

हरिश्चन्द्र दीक्षितः

आखेटाय दुष्यन्तेनाऽनुधाव्यमाने मृगे भयस्य यल्लक्षणं प्रदर्शितम् यद्भयशब्देन उक्तं च (शरपतनभयाद् इत्यादि) तस्मिन् स भयानकरसं पश्यति । पठ्यताम् अभिनवभारती । अत्र केवलं भयभावाभासस्तिर्यग्गतभयस्य प्रदर्शितत्वात् ।

'यथा गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निष्पद्यन्ते' इति भरतेन उदाहरणायैवोक्तम् । उदाहरणस्य सर्वाणि लक्षणानि उदाहरणसाध्ये न घटन्ते । किन्तु किमपि प्रयोजनं साध्यत एव । गुडमरिचलवणचुक्रादीनां जले मेलनाद् यो नवः स्वादो जायते, षाडवादिरसे स किं निष्कारणः । नहि । गुडमरिचादीनां भिन्नस्वादानाम् एकत्र मेलनं मिश्रणं वा नवस्य स्वादस्य कारणम् । काव्यनाट्यरसस्यापि भवन्ति अनेकानि घटकानि । तानि भरतस्य मते विभावानुभावव्यभिचारिणः । इमेषां रसनिष्पत्तये संयोगः (संयोजनम्) मेलनं मिश्रणं वा कथम् ? इमेषां रङ्गमञ्चे युगपद् उपस्थापनात् प्रदर्शनादभिनयाद् वा । न विभावादयो गुडमरिचादि इव मिश्रणैक्यं गच्छन्ति । संयोगस्य तात्पर्यमस्ति युगपदभिनयप्रदर्शनम् (श्रव्यकाव्ये सर्वेषामेकत्रवर्णनम्) । निष्पत्तिरस्ति उत्पत्तिर्हि भावना हि । निष्पत्तेरनन्तरं जायते भुक्तिरनुभूतिः प्रतीतिर्वा । कस्यानुभूतिः ? आनन्दविशेषस्य । भरतस्य वचने 'हर्षस्य'– 'स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्च गच्छन्ति' इति ।

नाट्यशास्त्रस्य महिमा

भरतस्य नाट्यशास्त्रे सर्वप्रथमं सर्वाङ्गीणं तु अस्त्येव, अद्यावधि सर्वावधि सर्वोत्कृष्टमप्यस्ति रसनिरूपणम् । सर्वस्मिन् जगति नाट्यशास्त्रेण समो नास्ति रसनिरूपकश्च नाट्याभिनयकलानिरूपकश्च कश्चिदन्यो ग्रन्थः । विभावानुभावानां विशेषतः नारीणां कामानुभावानाम् अन्यासां कामचेष्टानां च सुविस्तीर्णायां गणनायां भरतमुनिना स्वकीयमद्भुतं लोकनिरीक्षणं चाधुनिकवाक्प्रयोगानुसारं मनोविज्ञानकौशलं प्रकटितमस्ति ।

हरिश्चन्द्र दीक्षितः

नाट्यशास्त्रे केचिदन्ये दोषाः

नाटयशास्त्रस्य एतादृश्यां महत्तायां सत्यामपि अस्य रसनिरूपणे केचन दोषा अपि विद्यन्ते। रससूत्रस्य दोषास्तु पूर्वमेवोल्लिखिताः। तेभ्यः पृथक् येऽन्ये दोषास्तत्र विद्यन्ते त इम–

१– आलम्बनानाम् उद्दीपनानां परिभाषणं च विभाजनं च अकृत्वैव क्वचिद् विविधानां रसानां विभावानां मुनिभरत एकत्र क्रमरहितं वर्णनं विहितवानस्ति । रसेषु प्रमुखतमस्य शृङ्गारस्य विभावान् स एवम् वर्णितवानस्ति– 'ऋतुमाल्यानुलेपनालंकारेष्टजन–विषयवरभवनोपभोगोपवनगमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्वि–भावैरुत्पद्यते' इति। अत्र बहूनामुद्दीपनानां मध्ये 'इष्टजनविषय' इत्या–लम्बनं गौणतयैव उल्लिखितमस्ति ।

२– अनन्तरं हि एकमेव वास्तविकम् अनुभावं न उक्त्वा बहूनां व्यभिचारिभावानाम् अनुभावरूपत्वेन संग्रहणं कृतमस्ति– 'विप्रलम्भ–कृतस्तु निर्वेदग्लानिशंकासूयाचिन्तौत्सुक्यनिद्रासुप्तस्वप्नविव्वोकव्या–ध्यनुन्मादापस्मारजाड्यमरणादिभिरनुभावैरभिनेतव्यः' । अत्र विव्वोकस्यैवानुभावत्वं भवेत् तर्हि भवेत् । अन्ये सर्वे व्यभिचारिण एव यथा भरतेन कल्पिताः। किन्तु सत्यतेयं यत् निद्रास्वप्नोन्मादा–पस्मारजाड्यमरणादयोऽनुभावा एव ।

३– क्वचिद् य आश्रयस्य स्वकीया गुणास्तेषाम् (आलम्बन-) विभावरूपत्वेन उल्लेखः कृतोऽस्ति, व्यभिचारिभावानां च गुणानां च अनुभावरूपत्वेन– अथ वीरो नामोत्तमप्रकृतिरुत्साहात्मकः। स चासं–मोहाध्यवसायनयविनयबलपराक्रमशक्तिप्रतापप्रभावादिविभावैरुत्पद्यते । तस्य स्थैर्यधैर्यशौर्यत्यागवैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः इति ।

रसस्य विषये जगन्नाथस्य मिथ्या धारणा

भट्टनायकेन प्रभावितत्वाद् योऽभिनवगुप्तः रसस्य परब्रह्मा–स्वादसब्रह्मचारीत्वम्' अमन्यत तस्य मते– 'अभिनवगुप्तमम्मटभट्टादि–

ग्रन्थस्वारस्येन'- जगन्नाथस्य वचनेषु 'भग्नावरणचिद्विशिष्टो रत्यादिः स्थायिभावो रस' इति अथ रत्याद्यवच्छिन्ना भग्नावरणाचिदेव रसः' इति । एतच्चिदात्मविषयकतात्त्विकज्ञानाऽभावादिवोक्तमस्ति ।

'रसो वै सः' इत्युपनिषद्वाक्ये रसशब्दः सुखदुःखादिद्वन्द्वानुभवरहितस्य आनन्दस्यार्थे प्रयुक्तोऽस्ति । चिद् अर्थात् जीवात्मा ईश्वरस्य अंशो भवेद् वा न वा स परमाणुरहितसूक्ष्मस्वरूपे सर्वथा निर्वासनो निर्भावो निर्द्वन्द्व एवास्ति । अन्यथा केनचित् प्रकारेण केनापि ज्ञानेन तस्य मुक्तिर्न समभविष्यत् । वासनैव माया मनोबन्धनं, वाशनायाः मुक्तिरेव द्वन्द्वमुक्तिजीवन्मुक्तिः शरीरसम्बन्धमुक्तिः । काव्ये वा नाट्ये वा रसस्यानुभवः रत्यादिवासनात्मकः । जीवात्मा यदा सूक्ष्मेण स्थूलेन वा शरीरेणाबध्यते तदैव स मनसाऽपि योज्यते । मनसि वासनाः जायन्ते। मनोयुक्तो जीवो वासनायुक्तो भवति । मनसैव जनः काव्ये वा नाट्ये वा रसाननुभवति । रति (काम-) क्रोधभयादयो वासना एव (मनो–) भावा एव, ये (मनो–) विकारा इत्यपि कथ्यन्ते, चिदात्मनो मनसाऽऽवरणानि । अतो मूलस्वरूपे चिदात्मा न भवति रत्याद्यवच्छिन्ना न च रत्यादिः स्थायी भावो भवितुमर्हति चिद्विशिष्टः। काव्यनाट्यरसः सर्वथा वासनात्मको लौकिकोऽनुभवः। रसो प्रत्यक्षरतिशोकादिकारणसम्पर्कजन्यानुभवात् कथं भिद्यत इति पूर्वमपि कथितं साधारणीकरणप्रकरणे पुनः कथयिष्यते च ।

रसनिष्पत्तिव्याख्यासु दर्शनशास्त्राश्रयस्य विचारः

अत्रैव किं विभिन्नासु रसनिष्पत्तिव्याख्यासु विभिन्नदर्शनसम्प्रदायमतानि आश्रितानि आश्रितव्यानि वा इत्यपि विचार्यते ।

वैदिकानि दर्शनानि षट् । तेषु प्रथमं पूर्वमीमांसा दर्शनम् । वेदमन्त्राणां नित्यत्वम्, ईश्वरस्य अनस्तित्वम्, कर्मभ्यः प्रादुर्भूताद् अदृष्टसंज्ञितत्वविशेषात् कर्मफलोपलब्धिरिति पूर्वमीमांसाया अवच्छेदकानि लक्षणानि । एकं ब्रह्मैव नित्यानन्दमयं सर्वथा निर्वासनं निर्गुणं च निष्क्रियं च सत् । मायोपहितं तदेव ब्रह्म ईश्वरश्च विश्वकर्ता च

हरिश्चन्द्र दीक्षितः

जायते । सर्वेऽपि जीवा ब्रह्मांशा एव । स्वरूपज्ञानान् मायाबन्धविनिर्मुक्तास्ते ब्रह्मैक्यं गच्छन्ति–इत्येता उत्तरमीमांसायाः शांकरवेदान्तदर्शनस्य वा मान्यता । विविधशाखं समग्रं काश्मीरशैवदर्शनं वेदान्तदर्शनस्य रूपान्तरमेव । तस्मिन् ब्रह्मैक्योपगमनेन सह चन्द्रचूडकपर्दिगङ्गाधरनीलकण्ठत्रिशूलिभस्मावलिप्तशरीरस्य साक्षाद् ब्रह्मस्वरूपत्वेन गृहीतस्य शिवस्य रुद्राक्षमालादिधारिणा मुमुक्षुणा भक्तिर्मुक्तिसाधनत्वेन स्वीकृताऽस्ति । इत्येतच्छैवदर्शनस्य संकीर्णं साम्प्रदायिकत्वम् । पुनः शैवदर्शने सृष्टिप्रक्रियासम्भावनायां यथा शांकरवेदान्तीयविवर्तवादस्तथा सांख्यीयपरिणामवादश्चोपगतः । यद्यपि शैवदर्शने नामान्तरेण मायापि स्वीकृताऽस्ति, तथापि तत्र शिवस्य परमात्मनः स्वेच्छयैव जगत् सृष्टौ प्रवृत्तिः प्रत्यपादि ।

न्यायदर्शनस्य प्रमाणपरिभाषकस्य प्रमेयपरिभाषकश्चेति द्वौ भागौ । प्रथमे भागे प्रत्यक्षानुमानोपमानार्थापत्त्याप्तवाक्याख्यानि प्रमाणानि व्याख्यातनि सन्ति, द्वितीये भागे प्रमेयानि प्रमाणितानि । प्रमेयेषु प्रमुखं द्रव्यम् । द्रव्याणि भवन्ति नव–पञ्चमहाभूतानि दिक्कालात्मामनांसि । इमानि अनादितया च अनन्ततया च वर्तन्ते । आत्मा द्विविधः परमात्मजीवात्मभेदेन । परमात्मा एक एव सूक्ष्मः सर्वज्ञश्च सर्वशक्तिमान् । जीवा अपि सूक्ष्माः । किन्तु असंख्येयाः अल्पज्ञाश्चाल्पशक्तयश्च । आत्मनोऽनात्मतत्त्वेभ्यः पृथक्त्वस्य ज्ञानेन जायते मुक्तिः । न्यायदर्शने प्रमेयानामात्मादिद्रव्याणां प्रमाणने अनुमानप्रमाणस्य तर्कस्य च प्राधान्यम् ।

यद्यपि गोतमीयं न्यायशास्त्रे पदार्थानां षोडशकम् उपगतमस्ति । किन्तु तेषु षोडशपदार्थेषु बहवस्तर्कप्रक्रियाया अवयवा एव । अतः कालान्तरात् परिष्कारिते न्यायशास्त्र द्रव्य–गुण–कर्म सामान्य-विशेष–समवायाऽभावा इत्येते हि पदार्था उपगताः ये वैशेषिकानामप्यभिमताः सन्ति । यानि नव द्रव्याणि नैयायिकानामभिमतानि तान्येववैशेषिकानामपि, सदृश्य एव तेषां व्याख्या अपि तयोर्दर्शनयोः। अत्रानपेक्ष्यवर्णनेभ्यो

हरिश्चन्द्र दीक्षितः

भेदेभ्यः यः प्रमुखः भेदः सोऽयम्– यत् न्यायदर्शने एकस्य तत्त्वस्य च विभिन्नानां तत्त्वानां च परमाणवः कथं संश्रीयन्त इति न विचारितमस्ति । किन्तु वैशेषिकदर्शने परमाणूनां द्व्यणुकेषु त्र्यणुकेषु चतुरणुकेषु इत्यादिषु क्रमशो वर्धमानमात्रेषु संघातेषु विश्वसृष्टिः प्रारभते । इति । यदिदं न्यायवैशषिकयोरन्तरं, तद्रसनिष्पत्तिप्रक्रियाबोधे अनुपयोज्यम् । अतो रसनिष्पत्तिव्याख्यायां य उपयोगो न्यायस्य सम्भाव्यः स एव वैशेषिकस्य ।

साँख्यदर्शनम् अनीश्वरवाद्यस्ति । तस्मिन् एकस्याः प्रकृतेः असंख्यतया बहूनां च पुरुषाणां (जीवात्मनाम्) सत्त्वमुपगतमस्ति । त्रिगुणात्मिकायाः प्रकृतेरेव विकृतिरिदं जगत् । या प्रकृतिः पुरुषसम्पर्कात् चैतन्यं प्राप्य तेषां भोगाय जगत् सृजति तेषां बन्धस्य कारणं च भवति, सा एव पुरुषेण ज्ञातस्वरूपा सती 'दृष्टाऽहमस्मि' इति निवृत्ता भूत्वा तेषां मोक्षं चोपपादयति । इत्ययमेव संक्षिप्तः सांख्यसिद्धान्तः ।

योगदर्शने सेन्द्रियनिग्रहसार्वभौमधर्माचरणसाध्यसमाध्यवधानरूपा या मोक्षोपलब्धियोगपद्धतिरुपदिष्टाऽस्ति तां विहाय स्वतत्त्वमीमांसापक्षे पुरुषविशेषरूपत्वेन ईश्वरस्योपगमत्वेन सह सर्वं तत्त्वव्याख्यानं सांख्यदर्शनादेव संगृहीतमस्ति । अत एव योगस्य या सेश्वरसांख्यदर्शनमित्यभिधाकृताऽस्ति सा समीचीनैव ।

बौद्धजैनदर्शने अनीश्वरवादिनी । तयोर्जीवात्मविषयिक्यौ कल्पनेऽपि वेदान्तिककल्पनाभ्यां भिन्ने । तयोः का रसनिष्पत्तावुपयोगस्य सम्भावना ।

रामानुजवल्लभाचार्ययोर्दर्शनेऽप्यद्वैतवादिनी । किन्तु रामानुजीये दर्शने ईश्वरः स्वस्मिन्नेव अनादितया प्रकृतिजीवसमूहेन विशिष्टो युक्तो वा वर्तते । यथा रामानुजीये तथा वल्लभीयेऽपि दर्शने ईश्वरो मायोपाधिरहितः । तस्माद् अद्वयादेवेश्वराद् 'विस्फुलिङ्गा इवाग्नेर्हि' जगद्रूपाणि सर्वाणि जडचेतनसत्त्वानि निर्गच्छन्ति । अद्वैतमतावलम्बिनोरप्यनयोर्दर्शनयोः ब्रह्मणः सगुणरूपावतारविशेषस्य भक्तेर्हिनि–

हरिश्चन्द्र दीक्षितः

श्रेयःसाधकत्वं प्रतिपादितमस्ति।

माध्वदर्शनं द्वैतवादि ब्रह्मजीवयोरनादि द्वैतस्योपगमात्। अस्मिन् दर्शने विष्णोर्भक्तिर्निःश्रेयःसाधिका मताऽस्ति। एतेष्वपि त्रिष्वपि श्रुत्यभिमतेषु वैष्णवदर्शनेषु न किञ्चिदीदृग् यद् रसनिष्पत्तिप्रक्रिया-प्रबोधे सहायकं भवेत्। रसनिष्पत्तिव्याख्यासु येषां दर्शनानां प्रभावकत्वं सम्भावितमस्ति, तानीमानि पूर्वमीमांसादर्शनम्, सांख्यदर्शनम्, न्यायदर्शनम्, उत्तरमीमांसादर्शनं शांकरवेदान्तदर्शनम् वा, काश्मीर-शैवदर्शनं च।

भट्टलोल्लटस्य रसनिष्पत्तिव्याख्यायां पूर्वमीमांसायाः प्रभावो वर्तत इति कैश्चित् सम्भावितम्। कस्मात्? मम्मटेन काव्यप्रकाशे नैतादृशः कोऽपि प्रभाव उदलेखि, न च शंकुकादीनापि व्याख्यासु कस्यचिद् दर्शनस्य। एवमेव न च तस्य सर्वश्रेष्ठेन टीकाकारेण भट्टसोमेश्वरेण। माणिक्यचन्द्रस्तु स्वकृतकाव्यप्रकाशटीकायां सोमेश्वरस्य अनुवक्तेव प्रतिभाति।

विभावैर्जनितः, अनुभावैः प्रतीतियोग्यः कृतः (= अनुमापितः) व्यभिचारिभिः पोषितः (स्वानुभावैर्यस्य यानुमितिर्जायते तस्यां व्यभिचारिभिः अर्थाद् व्यभिचारिणामप्यनुभावैरथवा स्वप्नमूर्च्छा-पस्मारव्याधिमोहमरणाद्यनुभावसदृशैर्व्यभिचारिभिः समर्थितायां मुख्यतया रामाद्यनुकार्ये तदनुकरणबलात् नर्तकेऽपि (आभासिकतया) प्रतीयमानः स्थायीभावो भवति सामाजिकानां रसः। भट्टसोमेश्वरस्तु अत्र कथयति- आस्वादयिता तु सामाजिक इत्याह- नर्तकेऽपीति। अत्र क्वास्ति लोल्लटस्य व्याख्यायां पूर्वमीमांसायाः प्रभावितत्वम् अथवा उत्तरमीमांसायाः। नटे रामस्य प्रतीतिं रज्जौ सर्पस्य प्रतीत्या सदृशीं ये मन्यन्ते वस्तुतस्तेषामेवास्ति रज्जौ सर्पस्य भ्रमेण तुल्यः कोऽपि भ्रमः। सामाजिकाः नटे तत्कृतरामत्वारोपं पश्यन्तस्तस्मिन् तदनुकरणमपि पश्यन्ति।

कस्यां व्याख्यायामनुभावैः स्थायिभावस्य प्रतीतिर्वाऽनुमितिर्वा न

न मान्यते । पर्वतशिखरे अलक्ष्यतया वर्तमानोऽग्निर्लक्षितेन धूमेनानुमीयते । एतत् साधारणमनुमानम् । अनुकारिणि यथा अनुकार्यस्य प्रतीतिराभासिकी तथैव स्थायिभावस्य । नाट्यकलाप्रभावात् यथा कृत्रिमेषु अनुभावेषु सत्यता प्रतीयते, तथा आभासिके रत्यादि स्थायिभावेऽपि । इदमेवान्यानुमीयमानविलक्षणत्वम् । स्थायिभावोऽनुक्रियते इति प्रयोगो कुन्ताः प्रविशन्ति इत्यादिना सदृशः । यस्य नास्ति चक्षुषा वा श्रवणेन वा प्रत्यक्षविषयत्वं, तस्य कथमनुकार्यत्वम् । अनुक्रियमाणैरनुभावैः स्थाय्यनुमीयते इति कथने किं न्यायदर्शनस्य प्रभावितव्यम् ?

भट्टनायकस्य व्याख्यायां सांख्यदर्शनमुपयोजितमिति कथं मन्तुं शक्यते । किमनुभूत्यर्थे भुक्तिशब्दस्य प्रयोगात् । नेयं रसभुक्तिः प्रकृत्योपपादितस्य भोग्यस्य पुरुषेण (जीवात्मना) भुक्त्या सदृशा । किं शब्दार्थस्य व्यापारत्रये प्रकृतेस्त्रिगुणात्मकस्य स्वरूपस्य कापि छाया दृग्गोचरीभवत्यन्धमतीनाम् । भट्टनायकस्य व्याख्या सांख्यदर्शनेन प्रभावितेति साहित्यदर्पणस्य हिन्दीव्याख्याकर्तुः श्रीमतः शालिग्रामशास्त्रिणः सांख्येषु संख्यावान् श्रीभट्टनायक इति वाक्यमाधृत्य मया सम्भावितम् ।

साधारणीकृतमालम्बनं प्रति आश्रयेण सह तादात्म्यवशात् नाटकदृष्टॄणां सर्वेषां सामाजिकानां समतया या स्थायिभावविशेषस्य रसरूपानुभूतिर्जायते, तस्याः साम्यं केवलं ब्रह्मानुभूत्या सह सम्भवति इति कारणादेव किम् अभिनवगुप्तस्य व्याख्यायां काश्मीरशैवदर्शनं योजितमिति मतेः समीचीनत्वं सिद्ध्यति ।

रसगङ्गाधरे 'नव्यानामभिमता' या रसनिष्पत्तिसरणिः प्रदर्शिता सा जगन्नाथस्यैव कल्पितेति सम्भाव्यते । तस्याः सम्यक् परीक्षणाय च विवेचनाय च सात्र अवतार्यते— 'काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरं च सहृदयोल्लासितस्य भावनाविशेषरूपस्य

हरिश्चन्द्र दीक्षितः

दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिमात्रस्य शकुन्तलादिविषयकरत्यादिरेव रसः। अयं च कार्यो दोषविशेषस्य। नाश्यश्च तन्नाशस्य। इति।

अथेयं व्याख्या परीक्ष्यते। व्यञ्जना व्यापारस्य किं तात्पर्यम? केनापि साधनेन प्रकाशनम् उत शब्दशक्तिविशेषेण बोधनम्? अभिनये काव्यवाक्यं विनैव अथवा विस्मयादिसूचनध्वनिरूपांश्च आङ्गिकान् अनुभावांश्च विनापि किं रत्यादयः स्थायिभावाः प्रकाशयितुं शक्यन्ते। पठनीये वा श्रवणीय वा प्रबन्धकाव्ये, दृश्यकाव्ये च अनुकुर्वता नटेन उच्चार्यमाणे काव्यवाक्य वा सदा किं शब्दार्था व्यञ्जका हि भवन्ति? शब्दानां व्यञ्जनाव्यापारो यदि मान्यतां तदर्थपि। पुनः रसो व्यङ्ग्यो भवति न विभावादीनां वर्णनम्। नाट्याभिनयेषु अभिनीयमानैरनुभावैः स्थायिभावा अनुमाप्यन्ते अनुकार्याणामालम्बनत्वं च आश्रयत्वं च ज्ञाप्यते। पठ्यमाने श्रूयमाणे वा काव्ये वर्णितैरनुभावैः स्थायिभावा अनुमीयन्ते, वर्णनैरेव वर्ण्यमानचरित्राणां जनानाम् आलम्बनत्वं वा आश्रयत्वं वा तटस्थत्वं वा ज्ञायते। तर्हि व्यञ्जनाव्यापारेण दुष्यन्तादीनां शकुन्तलादिषु रत्यादयः स्थायिभावा गृह्यन्ते इति कल्पनायाः वृथात्वमापद्यते।

अस्यां व्याख्यायां यो भावनाविशेषरूपदोष उल्लिखितः स भट्टनायकस्य निविडनिजमोहसंकटकारी विभावादिसाधारणीकरणात्मकः भावनाव्यापार एव। अस्माद् भिन्नः कोऽन्यो सम्भवति भावनादोषः। सामाजिकः दुष्यन्तत्वादिना स्वात्मनि आच्छादिते शकुन्तलादिषु लोकवदेव रत्यादीन् स्थायिभावान् अनुभविष्यति। अतः सामाजिकः दुष्यन्तत्वादिना स्वात्मन्यनाच्छादितेऽपि दुष्यन्तादिभिः सदृशतया शकुन्तलादिषु रत्यादीन् भावान् अनुभवति। अन्तरं केवलमेतत्-दुष्यन्तादीनां शकुन्तलादयः प्रत्यक्षतया सम्पृक्ता आसन्। सामाजिकानाम् 'आश्रयस्य' 'आलम्बनेन' सह (शकुन्तलादीन् प्रति) परोक्षो

मानसिकः सम्बन्धः उत्पद्यते इत्यस्ति महदन्तरम् । 'यदपि विभावादीनां साधारण्यं प्राचीनैरुक्तं तदपि काव्येन शकुन्तलादिशब्दैः शकुन्तलात्वादिप्रकारकबोधजनकैः प्रतिपाद्यमानेषु शकुन्तलादिषु दोषविशेषकल्पनं विना दुरुपादम् । अतोऽवश्यकल्प्ये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरपि सूपपादा इति यज् जगन्नाथेन पुनरुक्तं तद् स्वदोषाच्छादनायैव ।

भट्टनायकस्तु भावकत्वव्यापारस्य मोहसंकटकारित्वं च विभावादिसाधारणीकरणं चेति द्वे कार्याण्यकल्पयत् । जगन्नाथः स्वपाण्डित्यप्रदर्शनाय भावनाविशेषरूपस्य दोषस्य विभावादिसाधारणीकरणम् सामाजिकस्य स्वात्मनि दुष्यन्तादित्वेन आच्छादनम् इति द्वे कार्ये अथवा शकुन्तलादिषु दोषविशेषस्य कल्पनेन सह त्रीणि कार्याणि कल्पयति । शकुन्तलादिषु को दोषः कल्प्यः । किं स परकीयात्वे स्वकीयत्वम् ? भट्टनायकस्तु भावकत्वं मोहदोषस्य कारणम् अमन्यत । जगन्नाथस्य मते भावनाविशेषरूपदोषस्य किं कारणम् ? किं भावकत्वभावनयोः सुधिया न किमपि साम्यं लक्ष्यम् ? भावकत्वं मनसः कल्पनाकारित्वम्, भावना मनसः कल्पनैव । शुक्तिकाशकले रजतस्य समतायाः कारणात् नेत्रन्द्रियदोषदूरत्वान्धकाराज्ञानकारणाच्च रजतस्य भ्रान्तिर्जायते । नाटके सुन्दरी युवती अभिनेत्री साक्षात् शकुन्तलेव प्रतिभासते । कोऽपि सामाजिकस्तां यद्यपि दुष्यन्तप्रियां शकुन्तलामेव न बुध्यति, तथापि तस्याः सौन्दर्यादिभिर्मोहितः सन् स्वमनसि परोक्षकारणाज्जातां रतिमनुभवति । काव्ये शकुन्तलादीनां वर्णनं पठमानस्य सामाजिकस्य कुतः शुक्तिकाशकले रजतस्य भ्रान्तेः सम्भावना । शुक्तिकाखण्डे रजतस्य प्रतीतिर्यद्यपि मिथ्या ज्ञानं, तथापि तज् ज्ञानमेव । रसो भवत्यनुभूतिर्न ज्ञानम् ।

इयं या नव्यानां वा जगन्नाथस्य वाऽभिमता रसनिष्पत्तिव्याख्या, सा शांकरीयाद्वैतवेदान्तमतानुसारिणी । शांकरवेदान्ते यथा रज्जौ अहेः शुक्तिकायां रजतस्य वा भ्रमो जायते तथैव नव्यानां मते

हरिश्चन्द्र दीक्षितः

शकुन्तलानुकारिण्यां नट्यां शकुन्तलात्वस्य तस्यां सामाजिकस्यापि रत्यनुत्पादकतायां रत्युत्पादकतायाश्च भ्रमो जायते। किन्तु मिथ्येयमस्ति मतिः। प्रथमं तु ब्रह्मणि जगत् भ्रान्तिरिव भासत इति कल्पनमेवास्त्यसाधु। निष्परिमाणो निराकारस्य अद्वयस्य च ब्रह्मणः किमस्त्यन्यन् सदृक्? किं चान्धकारादिभ्रान्तेर्गौण कारणम्? रूपे सदृगरूपस्य हि भ्रान्तिः सम्भवति। पुनः श्रव्ये वा पठ्ये वा काव्ये भ्रान्तेस्तु चर्चैव वृथा। नाटकेऽपि सा नैवाऽपेक्ष्यते। साधारणानां मनुष्याणां मनसः स्वभावोऽयं यत् क्वचिदपि स्वादूनि व्यञ्जनानि दृष्ट्वा तेषां बुभुक्षा जागर्ति, सुन्दरीः अस्वकीया अप्राप्या अपि नारीस्तासां हावभावांश्च दृष्ट्वा तेषां रतिर्जागर्ति–साधारणीनां स्त्रीणामपि एवमेव रमणीकान् पुरुषान् दृष्ट्वा–दुराचारिणोऽत्याचारिणः पुरुषान् दृष्ट्वा तेषां क्रोधो जागर्ति कामं ते अन्येषामेव हानिकराभवेयुः। विकृतरूपवेषवाक्यानां जनानां, जुगुप्सितवस्तूनां, विस्मयोत्पादककर्मघटनानां च, देवताविग्रहाणां च यथा लोके तथैव नाट्यकाव्ययोरपि स्थायिभावविशेषोत्पादकम्। न तेषु स्वकीयत्वपरकीयत्वयोर्भेदः। सर्वेष्वपि साधारणेषु स्त्रीपुरुषेषु प्रत्यक्षे वा कल्पिते वा वासनोत्पादके कारणे सति, तेषां वासना बोध्यत एव। मनुष्याणां लक्षेषु कोटिषु वा कोऽप्येको भवति आत्मस्वरूपज्ञानात् सर्वथा निर्वासनः। ज्ञानिनी सती नारी ज्ञानी सत्यवान् पुरुषो वा काव्ये वा नाट्ये वा प्रवर्तत एव न। यदि प्रवर्ततेऽपि तर्हि न शृाङ्गारिके नाट्ये वा काव्ये वा। भक्तिवैराग्यकाव्यं भक्तिवैराग्यनाटकं हि वा भवति कामविकाररहितस्य मनोरञ्जकम्। शृाङ्गारिकं नाटकं वा काव्यं वा निर्भ्रान्ततया सामाजिकानां कामम् उद्दीपयति। तेनैव कारणेन कामिनो जनाः शृाङ्गरिकं संगीतकाव्यं शृण्वन्ति। भक्तिवैराग्यप्रतिपादकं विहाय अन्यत् नाट्यं वा काव्यं वा चिदात्मनो वासनात्मकमावरणं न अपावृणोति, अपितु पूर्वतः विद्यमानं मोहं दृढयति। तस्मात् कुतो रसनिष्पत्तेर्वेदान्तपरकव्याख्यायाः ग्राह्यत्वम्।

हरिश्चन्द्र दीक्षितः

पुनः रजतोपलब्धये शुक्तिकाशकलस्य समीपे गमनात् तस्मिन् रजतभ्रान्तिर्नश्यति। धृतशकुन्तलारूपायां नट्यां तादृशस्य भ्रमस्य निवृत्तेर्न सम्भावना न चावश्यता। नटी नट्येव इति ज्ञानस्य कदापि न लोप्यत्वात् वारं वारं तदभिनयावलोकने मनसः प्रवर्तनीयत्वाच्च।

श्रव्यकाव्येषु शकुन्तलादीनां केवलं नामान्येव नहि युच्यते अपितु तेषां रूपाणां हावभावानां च वर्णनमपि क्रियते। व्याघ्रादीनामपि रूपाणि च चेष्टाश्च वर्ण्यन्ते। एतादृग्भिर्वर्णनैः पाठकानां श्रोतॄणां वा मनस्सु स्थायिभावानां लौकिकानामेव कारणानां कल्पनाः जायन्ते। कल्पनाभ्योमनः स्वभाववशात् 'आश्रयेभ्यो' निरपेक्षतयाऽपि आश्रयाणामनुभावैरालम्बनानि केषां स्थायिभावानां कारणानि इति ज्ञात्वैव, यथा तेषां तथैव सामाजिकानामपि मनस्सु त एव स्थायिभावा जायन्ते येषामनुभवम् आश्रयाः (वर्णितैः) स्वानुभावैर्ज्ञापयन्ति। तर्हि कुतस्तत्र भ्रान्तेः सम्भावना।

रज्जौ यथा सर्पस्य भ्रम उत्पद्यते, तदा यावद् भ्रमनिवृत्तिं वास्तविकमेव भयमनुभूयते। अतः भ्रान्तिवशात् काव्य वा नाट्ये वा भयक्रोधशोकादीनामनुभावानां सुखरूपत्वमापद्यत इति उपगमो हि भ्रमः। मनः स्वभावोऽयं यद् अनुकृतकारणदर्शनात्, वर्णनानुसारेण मनः- कल्पितात् कारणाद् वा यः स्थायिभाव उत्पद्यते, अस्य सर्वथा दुःखात्मकत्वेऽपि तस्यानुभवे दुःखेन सह सुखस्यापि काचित् प्रतीतिर्जायते। प्रत्यक्षानुभवे पुरुषाणां कृते शरीरक्लान्तिजनकत्वाद् रतिरपि दुःखाय भवति। अनुकृतिदर्शने कल्पनायां वा न तादृशस्य दुःखस्य सम्भावना, यद्यप्यनुभावितत्वात् तत्रापि समयान्तरनिवृत्त्य 'विरसत्वं' जायते।

अभिनवगुप्तस्य अनुकर्तृत्वाद् अनुगामित्वाच्च मम्मटजगन्नाथौ व्यञ्जनावादिनौ ध्वनिसमर्थकौ च स्तः तथैव रसस्य ध्वन्यत्वस्यैव समर्थकोऽस्ति विश्वनाथोऽपि य आसीत् रसस्य काव्यात्मत्वस्य तर्कोपस्थापनं विनैव प्रतिपादयिता। किन्तु अभिनवगुप्तस्य समकालीनौ

हरिश्चन्द्र दीक्षितः

सम्भवतस्तस्य अज्ञातारौ धनञ्जयधनिकौ ध्वनिविरोधिनावास्ताम्-रसस्य ध्वन्यतायाा अनुपगन्तारौ । यतोऽस्य निबन्धस्य कर्त्ताऽपि ध्वनि-विरोधकोऽस्ति, अतो व्यञ्जनावादिनां मतानामुद्धरणाद् अनन्तरं स धनञ्जयधनिकयोः रसनिष्पत्तिविषयकं मतम् उदाहरति । मम्मटेन न किमपि स्वकीयं मतं प्रकटितमस्ति । विश्वनाथोऽपि शब्दान्तरेण अभिनवगुप्तस्यैवानुवक्ता ।

विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम् ॥

सा० द० ३।१

इति । तथैव- अभिधादिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैर-स्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति विश्वनाथस्य रसनिष्पत्ति-विषयको विचारः । यत् किञ्चित् तेन विशिष्टमुक्तं तदग्रे विचार-यिष्यते ।

नास्ति रसस्तात्पर्यवृत्तेरपि विषयः- दशरूपके तु-

विभावैरनुभावैश्च सात्त्विकैः व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायीभावोरसस्मृतः ॥४।१

इयं कारिका अवलोकवृत्तौ एवं व्याख्यातास्ति- काव्योपात्तैर-भिनयोपदर्शितैर्वा श्रोतृप्रेक्षकाणमन्तर्विपरिवर्तमानो रत्यादिः स्थायी स्वादगोचरताम् = निर्भरानन्दसंविदात्मताम्-आनीयमानो (भवति) रसः तेन रसिकाः सामाजिकाः काव्यं तु तथाविधानन्दसंविदुन्मीलन-हेतुभावेन रसवत् आयुर्घृतमित्यादिव्यपदेशवत् । काव्योपात्तैरि-त्यस्य काव्ये वर्णितैरिति, अन्तर्विपदिवर्तमान इत्यस्य अन्तसि मनसि वा भाव्यमानस्येति संविदात्मतामित्यस्य मनोगोचरतामिति अनुभूति-रूपतामिति वा रसवद् इत्यस्य रसात्मकमित्यस्ति तात्पर्यम् ।

पूर्वाचार्यैः कृतानां व्याख्यानामपेक्षायामस्यां व्याख्यायां सात्त्वि-कैरित्येतदधिकमुक्तम् । सात्त्विकभावनामनुभावरूपत्वमेवोपगम्यम् । अत्रानुभावैः सह स्थायिभावस्य कः सम्बन्धो भवति इति न स्पष्टीकृतम्।

हरिश्चन्द्र दीक्षितः

कः स्थायिभावो विभावानुभावादिभिः स्वाद्यतामानीयते । य आश्रय-स्यानुभावैस्तदगत एवानुमीयते ।

अस्याः रसनिष्पत्तिव्याख्यायाः द्वे महत्यौ विशेषते-अस्यां व्याख्यायां रसस्य काव्यातमत्वं निराकृतमस्ति । काव्यवाक्येषु भावाभिनयेषु वा रसस्य भावकत्वं निष्पादकत्वं हि वा भवति स्वयं रसो न तिष्ठति । रसः काव्यात्मेत्यौपचारिक एव वाग्व्यवहारः । पुनरत्र रसस्य ब्रह्मानन्दसहोदरत्वं चिदात्मगोचरत्वं च नोपकल्पिमस्ति । यद्यपि संविद् इति शब्दात् चैतन्यम् इत्यर्थोऽपि प्रत्याय्यते तथापि संविद् इति शब्दः संवेदना शब्दस्य पूर्वरूपम् । संवेदना मनसि भवति मनसा युक्त एवात्मनि न ह्यव्यवधानतया चिदात्मनि । निर्भरानन्द-संविदात्मतामिति स्वादगोचरताम् इत्यस्य स्पष्टीकरणायोक्तमस्ति इत्यवश्यं ध्यातव्यम् ।

इतोऽग्रे विभावानुभावसात्त्विकव्यभिचारिस्थायिभावानां परिभाषाः विधाय रसोऽस्ति व्यङ्ग्यार्थ इति पक्षे ध्वनिकारस्य आनन्दवर्धनस्य सर्वास्तर्कान् उपस्थाप्य तान् स्वतर्कैः प्रतिकृत्य रसस्य तात्पर्यवृत्या बोध्यत्वं निष्पाद्यत्वं स्वादगोचरतामानेयत्वं वा प्रतिपाद्य विभावानुभावादिभिः सह रसस्य दशरूपकावलोककर्तृणा भाव्य-भावकसम्बन्ध उद्भावितोऽस्ति । रसस्य तात्पर्यवृत्त्या कथं साध्यताऽस्ति इति विषये दशरूपके एवं तर्कितमस्ति-

१- यथा वाक्ये कारकैः सह उक्ता वा अनुक्ता वा (अनुक्तत्वावस्थायाम् अध्याहार्यतया) प्रकरणादिभ्यां बुद्धिस्था' क्रियैव भवति वाक्यार्थस्तथैव विभावादिभिः सह उक्तो वा अनुक्तो वा स्थायिभावोऽपि रसोऽपि वा ।

२- न चाऽपदार्थस्य वाक्यार्थत्वं नास्तीति वाच्यम् (अपदार्थस्यापि भवति वाक्यार्थत्वम्) सर्वकार्यबोधस्य सर्वाभिप्रेतबोधस्यावसानं यावद् भवति तात्पर्यवृत्तेः प्रसारः । एतावत्येव तात्पर्यविश्रान्तिरिति नियमनं कः कर्तुं शक्नोति । विवेच्यमाने सती इमेऽप्युभे

हरिश्चन्द्र दीक्षितः

मते असाधुनी सिद्ध्यतः। क्वचिद् अश्रुतं क्रियापदमध्याहार्यं भवति क्वचित् कारकपदमपि। प्रकरणाद्यनुसारं श्रोतृबोद्धव्यबुद्ध्योः समतया स्थितत्वाद् द्वारम् इति श्रुते सति यदि पिधेहि इति अध्याह्रियते पिधानक्रियाऽनुमीयते वा तर्हि पिधेहीति श्रुते द्वारम् इत्याह्रियते अन्यथा पिधेहीति क्रियापदस्य व्यर्थता आपत्स्यते। कुत्रचित् केनापि कारणेन रत्यादिस्थायीभावशब्दो वा शृंगारादिरसशब्दो वा काम-मुक्तोभवेत्, न वा उक्तो भवेत्। काव्यवाक्ये न च स्थायीभावो न च रसो वर्ण्यते, वर्णितुं शक्यतेऽपि न। तत्र विभावानुभावादयो हि वर्ण्यन्ते। विभावानुभाववर्णनसम्बद्धमेव किमप्यनुक्तं कारकपदं वा क्रियापदं वा अध्याहर्तुं शक्यते। रत्यादिस्थायीभावो भवति (विभावादिवर्णनपरक-) काव्यवाक्यार्थ इति मुनिभरतस्यैव मतं नितान्तमशुद्धम्, यद्यपि भरताभिमतरसनिष्पत्तिप्रक्रियाया अवगमाय 'अर्थ इति शब्दो भरतेन स्थायिभावार्थे प्रयुक्त इति बुद्धौ सदाऽवधार्यं भवति।

वक्तुर्विवक्षा यावत् प्रयोजनस्य प्रसारस्तावत् तात्पर्यवृत्तेरपि व्यापार इति तर्केण रसस्य तात्पर्यवृत्तिबोध्यता न साधितुं शक्यते, यत्र लक्ष्यार्थो बोध्यस्तत्र लक्ष्यार्थबोधं यावत् तात्पर्यस्य प्रसारः, यत्र व्यङ्ग्यार्थो बोध्यस्तत्र व्यंग्यार्थबोधं यावत्। केचित्तु यो वाक्यार्थः किं वा यः पदार्थोऽपि अभिधेयो मान्यते, तमपि तात्पर्येणैव बोध्यं मन्यंते। एवं तु तात्पर्यस्य विविधरूपत्वं सिद्ध्यति। किन्तु तद्वैविध्येषु तदैक्यं न सिद्धयति। अयम् अभिधेयार्थ इति अयं लक्ष्यार्थं इति अयं व्यङ्ग्यार्थ इति व्यपदेशे का हानिः? एवं तु अभिधावादिनोऽपि अभिधेयार्थात् पृथक् लक्ष्यार्थे च सर्वप्रकारके वस्त्वलंकाररसव्यंग्यार्थेऽपि अभिधाया एव प्रसारम् अकल्पयन्त। मुकुलभट्टस्तु लक्षणाम् अभिधाया एव भेदान्तरं मत्वा सर्वान् व्यङ्ग्यार्थान् लक्षणायां समावेशयत्। अयं मिथ्याऽतिवादः। वस्तुतो रसं विहाय अन्यत् सर्वम् अभिधेयार्थस्य हेतुत्वाद् भवत्यनुमेयमेव। रसो नाभिधेयः, न लक्ष्यः

न च व्यङ्ग्यः, न च तात्पर्यं, न चानुमेयः। स त्वनुभूतिविषयोऽनुभाव्यश्च।

स्वयं भरतस्य मते विभावादिभिः सह रसस्य भाव्यभावकसम्बन्धस्तथैव भट्टनायकस्य मते। भाव्यभावकसम्बन्धस्य स्थाने व्यङ्ग्यव्यञ्जकसम्बन्धं मत्वाऽभिनवगुप्त इदं तथ्यं समर्थितवानस्ति। भुक्तिस्तु भट्टनायकेन भावितस्य रसस्य मतास्ति।

विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥

सा० द० ३।१

व्यक्त इत्यस्य किं तात्पर्यम् ? व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसः। न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते इति। अथैतदपि विवेच्यते। यद् दुग्धं स्वयं दधिनि परिवर्तते परिणमते तदपि पूर्वत एव विद्यते। अन्धकारे पूर्वतो विद्यमानो घटो दीपेन दृग्गोचरीक्रियते, पात्रे विद्यमानं दुग्धं दधिनैव वा केनापि तिक्तवस्तुना वा दधिनि परिवर्त्यते। स्थायिभावकारणस्य वा आलम्बनस्य वा अनुपस्थितौ नाट्ये अभिनयालोकेन सह रसस्य भाव्यभावकसम्बन्धः। काव्ये विभावादिकल्पनैः सह रसस्य भाव्यभावकसम्बन्धः। कल्पनायाम् अविद्यमानायां विश्वनाथस्य मतस्य पर्यालोचनम् रसरूपे अपरिवर्त्यो परिवर्त्यो वा स्त्रीपुरुषाणां मनस्सु न पूर्वतो विद्यते कोऽपि स्थायिभावः। यदा वयम् अस्माकं शत्रुं पश्यामस्तदा वयं क्रुद्धाः भवामः यदा केनापि कृतम् अपमानं वा स्मरामस्तदा तस्य रूपस्य कल्पनेन सह तं प्रति क्रुद्धा भवामः। अनयैव रीत्या अनुकृतस्य आलम्बनस्य दर्शनेन वर्णितस्य आलम्बनस्य कल्पनेन वा आलम्बनप्रकृत्यनुसारेण अस्माकं मनस्सु (रसरूपेऽनुभाव्य एव) स्थायिभावविशेषो जायते।

साहित्यदर्पणस्य कारिकायां विभावादीनामेकवचनीयप्रयोगोऽप्यस्ति तस्याः दोषः।

हरिश्चन्द्र दीक्षितः

अधुना प्राप्तोऽस्त्यवसरो यदस्य निबन्धस्य रसनिष्पत्तिविषयकं स्वकीयं मतं प्रकाशयतु। किन्तु तस्मात् पूर्वं प्राक्कृतज्ञापनानुसारमत्र स्थायी भावः परिभाष्यते । वस्तुतः मनुष्याणां मनसि स्थायिसदृक् किमपि न भवति । यैर्मनोभावैः स्त्रीपुरुषाणां पारस्परिकेषु सम्बन्धेषु विविधाः दैहिक्यः जीवनक्रियाः प्रधानतया विधीयन्ते, ये मनोभावाः प्रधानानां जीवनव्यापाराणां भवन्ति प्रेरकाः वा, ते रतिहासक्रोधोत्साहादयः प्रधाना मनोभावा इति व्यपदेश्याः। त एव काव्यशास्त्रेषु स्थायिभावा इति व्यपदिश्यन्ते । यैर्मनोभावैर्जीवनक्रिया अप्रधानतया विधीयन्ते, अप्रधानानां जीवनक्रियाणां ये भवन्ति प्रेरकाः वा, ते अप्रधाना गौणा वा मनोभावा इति व्यपदेश्याः। काव्यशास्त्रेषु तेषां संज्ञा व्यभिचारभावा इति। इमे अस्थायिभावा इत्यपि व्यपदेष्टुं शक्यन्ते । स्थायिभावानां किं स्थायित्वम् ? प्रधानानां मनोभावानां भावकानि वा कारणानि वा भवन्ति निश्चेष्टानि सचेष्टानि वा जड़-चेतनानां तिर्यग्जन्तुमनुष्यदेवदानवादीनां प्रत्यक्षस्थितानि प्रत्यक्षानुसारं स्मृतानि वा कल्पितानि वा च रूपाणि। मनोभावकारणान्येवालम्बनानि। आलम्बनस्य प्रत्यक्षतया कल्पनायां वा स्थितेरवधि यावत् तेनैव भावितो यः प्रधानो मनोभावो मनसि केनाप्यन्येन अनुकूलेन वा प्रतिकूलेन वा मनोभावेन अपरिवर्तितः, अनपचितो वा तिष्ठति स भवति स्थायिभावः। एतादृक् स्थायित्वं प्रधाने एव मनोभावे सम्भवति। अगोचरीभूते असम्पृक्ते वा आलम्बने स्थायिनः स्थायित्वमपि नश्यति। कस्मिंश्चित् स्थायिभावे उदिते तिष्ठति च कोऽपि व्यभिचारीभाव उदयति तिरोभवति च। आलम्बनायितैर्यैर्जनैः सह जीवनव्यापी दीर्घावधिस्थिरो वा रागात्मको द्वेषात्मको सम्बन्धो जायते, तेषामनुपस्थितावपि तस्य सम्बन्धस्य स्मृतेः कारणात् तैः सह घटिता कापि घटनाऽपि कमपि व्यभिचारिभावमुत्पादयति। रावणेन अपहृतायां सीतायां सत्यां तद्रागस्मृतेः कारणादेव रामस्य मनसि विषादचिन्ताशंकादयो व्यभिचारिभावा जायन्ते, स रोदिति च। काव्यशास्त्रे तस्या

हरिश्चन्द्र दीक्षितः

एव रतेः शृंगाररसोद्भापिस्थायित्वं मान्यते या कान्तकान्ताप्रत्यक्षतायां मुग्धावलोकनस्मित्युपसर्पणादिभिरनुभावैर्व्यज्यते प्रकटीक्रियते वा। एतदेव क्रोधादीनामपि विषये सत्यम्।

पूर्वाचार्यैः व्याख्यातानां रसनिष्पत्तेः प्रक्रियायां खण्डनाभिप्रायेण संशोधनाभिप्रायेण वा यदुक्तम् तद् यच्चात्र स्थायिभावस्य परिभाषणाभिप्रायेण उक्तं तच्च बुद्धौ निधाय पाठका निबन्धकर्त्रभिमतरसनिष्पत्तिव्याख्यां बोद्धुं यतन्ताम्।

निबन्धकर्त्राभिमतरसनिष्पत्तिप्रक्रिया

आलम्बनविभावेन नायकाद्याश्रयस्य मनसि जनितः, रत्युत्साहजुगुप्सादिः स्थायिभावस्तदुद्दीपितो वा न वा प्रायः (सम्पर्क) कामनाक्रोधघृणादिभिर्व्यभिचारिभिः सह चरितः क्वचित् न सहचरितोऽपि बहुभिः प्रदर्शितैरनुभावैरनुमितः सन् आलम्बनस्य साधारणीकृतरूपे हि उपस्थापितत्वात् मनः स्वभावानुसारेण सामाजिकानामपि उद्बुद्धश्च चानुभूयमानश्च भवति शृंगारवीरबीभत्सादिको रसः।

सहसा अपमानादिविप्रियकारिणं पूर्वस्मिन् काले, ये घोरापमानाऽन्यायाद्याचरितं तं जनं (शत्रुं) दृष्ट्वैव सहसा क्रोधो जायते। तत्र किमपि उद्दीपनं नाऽपेक्ष्यते। शरीरे शक्तौ सत्यां क्रोधात् सहसा जातायां वा उग्रताऽमर्षादीन् विनैव क्रुद्धो जनः स्वशत्रुं प्रहरति प्रहर्तुं प्रयतते वा। हासे च जुगुप्सायां च न भवति वस्तुतया किमपि पृथगुद्दीपनम्। यदा पुष्पवाटिकायां सीतारामावन्योन्यं दृष्टवन्तौ, तदा संयोगस्य अनिश्चितत्वात् किमुद्दीपनं भवितुमशक्यत। सीतायां तु दर्शनाभिलाषो जातः, किन्तु रामे न कोऽपि व्यभिचारीभाव उदायत्।

नाट्याभिनयावलोकनकाले आलम्बनोद्दीपनाश्रया अनुकृतरूपेषु प्रत्यक्षा हि तिष्ठन्ति। रूपैः सह अनुभावा अपि भवन्ति गोचरा एव। यद्यपि तत्रापि काव्यवाक्यरूपो वाचिकोऽनुभावो भवति एव तथापि नाटके अभिनयावलोकनस्यैव प्राधान्यम्। अतो नाट्येऽभिनयदर्शन-

हरिश्चन्द्र दीक्षितः

रसानुभूत्योर्भवति भाव्यभावकसम्बन्धः, निष्पाद्यनिष्पादकसम्बन्धो वा।

श्रव्ये वा पठ्ये वा काव्ये आलम्बनादिरूपचेष्टाऽनुभावानां वाक्यार्थेषु भवति वर्णनम्। वर्णनानुसारं श्रोतॄणां पाठकानां वा मनसि तेषां जायते कल्पना। सा कल्पना जनयति तेषां मनसि रसरूपेणाननुभूयमानं स्थायिभावविशेषम्। अतः (श्रव्य) काव्यानुशीलने भवति (वर्णनजन्य-) विभावादिकल्पनारसानुभूत्योर्भाव्यभावकसम्बन्धः। कल्पनायाः कारकत्वेन वाक्यार्थबोधोऽनिवार्यतया अपेक्ष्यते। किन्तु विभावादिकल्पना रसनिष्पत्त्योर्मध्ये न भवति कापि शब्दार्थ बोधप्रक्रिया। अतो रसो न भवितुमर्हत्यनुमेयो वा व्यङ्ग्यो वाऽर्थः।

लक्षणावादिनां मते व्यंजनावादिनां मते वा काव्यवाक्ये भवितु शक्नोति कोऽपि लाक्षणिको वा व्यञ्जनात्मको वा शब्दार्थप्रयोगः। किन्तु प्रयोजनं विहाय यदनुमेयं हि भवति सर्वेषां लाक्षणिकानां व्याञ्जनिकानां वा प्रयोगाणां परिणतिस्तस्मिन्नेवार्थे भवति योऽभिधयाभिधातुमशक्ष्यत।

लोकगीतचलचित्रादिगीतरूपाद् अकाव्यात्मकादपि विभावादिवर्णनाज् जायते रसानुभूतिः। किन्तु यादृशादपि वाक्याज् जायते रसानुभूतिस्तस्यावश्यमेव काव्यत्वम् इति ये मन्यन्ते, ते तथा मन्तुं शक्नुवन्ति, तथापि रसानुभावकत्वमेव न मन्तुं शक्यते कस्यापि वाक्यस्य उत्तमकाव्यत्वस्य प्रमाणम्। काव्यकोटिस्तु सपदावलिस्वरूपप्रकारा स्वभावोक्तिवक्रोक्तिकोटिमाश्रयति।

शृंगाररसे स्त्रीपुरुषावुभौ भवतोऽन्योऽन्यं प्रति रतेरेवालम्बनाश्रयावुभौ।

काव्यं कोऽपि एकाकी हि पठित्वा रसम् अनुभवितुं शक्नोति।

नाट्यालोकनावसरे प्रेक्षागारे स्थितः 'कोऽप्यन्यः सामाजिकः किं करोति, तस्य रसानुभूतिमात्राकियती, करुणोत्पादकं दृश्यं पश्यन् कोऽपि हसति वा रोदिति वा इत्येतद् अनवदधाना एव अन्ये सामाजिका

हरिश्चन्द्र दीक्षितः

स्वेषां मनस्सु रसमनुभवन्ति । प्रेक्षागारगोष्ठ्यां यदा कोऽपि जनोऽन्यत्रदत्तावधानः कमप्यन्यं किमपि कथयति, तदा कोप्यन्यस्तं भर्त्सयति–कस्माद् विघ्नं करोति इति । एतत् सर्वम्–नाट्यावलोकनावसरे सर्वेषां सामाजिकानाम् आलम्बनं प्रति तेषां सम्बन्धेषु आत्मैक्यं जायत इत्यस्य विरोधि प्रमाणम् । इमे विभावा ममैव मम मित्रस्यैव मम शत्रोरेव तटस्थस्यैव, अथवा न मम न मित्रस्य न शत्रोर्न न च तटस्थस्य इति विचारः कस्य मनसि जायते ? सर्वेऽपि प्रेक्षकाः आलम्बनं प्रति उत्पन्नं स्थायिभावविशेषं स्वस्य स्वस्य मनसि रसरूपत्वेन पृथक्-पृथक् भुञ्जन्ति–अनुभवन्ति । आश्रयगतैरनुभावैः सामाजिका आलम्बनं प्रति स्थायि (मनो–) भावविशेषमनुमिमान्ति । पुनर्यावच्च स तं स्थायिभावमनुभवति अनुभावैः प्रकाशयति च तावत् सामाजिकास्तं स्थायिभावं रसरूपत्वेन अनुभवन्ति । एतत् तथ्यं नास्ति सामाजिकानाम् आश्रयेण सह तादात्म्यस्य, आश्रयस्य, सत्वन सामाजिकानामात्मनि आच्छाद्यमानत्वस्य वा ।

लोके यदा कस्यापि मनसि केनापि प्रत्यक्षेण कारणेन कोऽपि स्थायिभावो जायते अर्थात् यदा किमप्यालम्बनं प्रत्यक्षतया सम्पृक्तं भवति, तदोद्बुद्धे भावे सुखरूपेऽपि सति कस्यचित् कालस्य पश्चात् तन्मनसा सह तदिन्द्रियेषु दुष्प्रभाव्यमानत्वं प्रारभते क्लान्तिश्च जायते । रतिसदृशः सुखात्मको भावस्तु शीघ्रतरतया खेदं जनयति । किन्तु यदा काव्यवाक्यवर्णितं स्थायिभावकारणं मनः कल्पनायां विद्यते अनुकृतरूपत्वेन रङ्गमञ्चेऽवलोक्यते वा तदा वैयक्तिकसम्बन्धरहितत्वात् इन्द्रियैः सह असम्पृक्तत्वाच्च तत्परिणामतः स्वकीयहानेरभावाच्च तदा उद्बुद्धः सुखात्मकः स्थायिभावविशेषो लोके प्रत्यक्षकारणेन उद्बुद्धस्य स्थायिभावस्य अनुभवात् सुखतरः प्रतीयते । शोकक्रोधभयजुगुप्सारूपे दुःखात्मकेऽपि स्थायिभावे कल्पनास्थितेन अनुकृतौ दृष्टेन वा कारणेन जाते सति यद्यपि सामाजिकेषु केचन दुःखसूचका हि अनुभावा उत्पद्यन्ते, तथापि काव्यनाट्यकलाप्रभावात् स्वभाववशाद्

हरिश्चन्द्र दीक्षितः

वा मनसि कोऽपि हर्षोऽप्यनुभूयते। किन्त्वेकं तथ्यं सर्वैः सम्यगवधातव्यमत्र। लोके यदि स्वकीयस्य प्रियस्य मृत्यौ वियोगे वा धनादेर्विनाशे वा यथार्थतया बहुतरं दुःखमनुभूयते, तर्हि स्वकान्तकान्तासंगे च बहुतरं सुखमप्यनुभूयते, कामं तस्य परिणतिः शीघ्रं खेदे हि भवति। काव्यनाट्यरसेऽपि कोऽपि बहुकालं यावद् रन्तुं न शक्नोति। तत्रापि क्लान्तिर्जायते पुनर्यदि कोऽपि यावज्जीवं बारं बारं शृंङ्गाररसमनुभवेत्, तर्हि किं तस्य तस्याः वा कामरतिर्न कांक्षयिष्यते। शृंङ्गाररसस्य तुलनायां सैव भविष्यति वरीयसी।

ये काव्यरसं वा नाट्यरसं वा ब्रह्मानन्देन सह समाधिसुखेन सह वा तुलयन्ति, तेषां रसविषयकमज्ञानमेव। शृङ्गाररसानुशीलनं यथा तथा कामोत्तेजकं हि भवति। तस्मादेव कामिनः शृङ्गारकाव्ये च स्त्रीणां मुखेन-वेश्यानां मुखेन-शृङ्गारगीतं च शृण्वन्ति। कञ्चित् कालं यावत् काव्यनाट्यानुशीलनप्रवृत्तौ रसरूपत्वेन य इन्द्रियमनः दुष्प्रभावरहितानन्दप्रतीतिर्जायते सैव तस्य (रसस्य) लोके स्थायिभावविशेषानुभवात् भिन्नता च विशिष्टता च। इयमेव विशिष्टता ब्रह्मानन्दसहोदरेति वक्तुं शक्यते। अन्यथा क्व ब्रह्मानन्दः क्व काव्यनाट्यरसः। रसो न काप्यलौकिकी अनुभूतिः।

यत्र कुत्रापि अनेकेषां स्थायिभावानां ग्रहणमभिप्रेतमासोत् तत्र पूर्वाचार्यैः रत्यादिः स्थायिभाव इत्येवोक्तमस्ति। कस्मान्न भयजुगुप्सेत्यादिः स्थायिभाव इति। रतौ तु ब्रह्मानन्दसहोदरता सुकल्प्यैव। किन्तु रतिः रसरूपाऽपि सामाजिकानां मनसि दुष्प्रभावकारिकैव। काव्यस्य सुप्रभावकत्वं दुष्प्रभावकत्वं वा वस्तुप्रकारविशेषेण च विभाव्यरसप्रकारविशेषेण च निर्धार्यते। दुश्चरित्रपात्राणां तत्पतनकारिदुष्कर्मणां वर्णनं भवति मनसि दुष्प्रवृत्तेर्हेतुः। बहुविलासिनी रतिः परकीयारतिर्वा परवञ्चनात्मको हासः, परदोषप्रदर्शनहेतुर्हासो वा भवति मनोदुर्विकारकः। सच्चरित्रपात्राणां तदभ्युदयकारिसत्कर्मणां वर्णनं तद्विपरीतं भवति सत्प्रभावि। दुर्भावदुर्भावकारकोऽपि सन्

यद्यपि शृङ्गाररस एव आनन्दकरतमः प्रतिभाति, तथापि वीर-भक्तिशान्तरसा आनन्दानुभावकत्वेन सह भवन्ति मनः संस्कारका अपि ।

रसात्मकम् अर्थात् रसानुभावकं काव्यं पठित्वा नाटकं दृष्ट्वा वा, काव्याद् वा नाटकाद् वा रसानुभवं कृत्वैव वा कोऽपि परार्थ-साधकः, लोकहिताय स्वहितस्य समर्पयिता लोकहिते एव स्वहितस्य भावयिता वा न जायते । काव्ये वा नाट्ये वा यत् सत्वम् आश्रये भावविशेषम् उत्पाद्य अन्येषु सामाजिकेषु तमेव भावमुत्पादयति, एवं यथा केनाप्येकेन सामाजिकेन तथैवान्यैः सर्वैरपि सामाजिकैः स एव स्थायिभावोऽनुभूयत इतीयं रस-(अनुभूति-) दशा (जनानाम्) हृदयस्यास्ति मुक्तावस्थेति रामचन्द्रशुक्लस्य निगमनं नास्ति मान्यम् । अनुभूतेरनन्तरं रसो विनश्यति । कस्यचित् पात्रस्य सच्चारित्र्यात् सद्वचनाद् वा प्रेरितो हि सद्विचारः काव्यनाट्यानुशीलनस्य पश्चात् स्मृतौ तिष्ठति परार्थपरमार्थकर्मप्रेरकश्च भवति ।

हरिश्चन्द्र दीक्षितः

पंचमो भागः

साधारणीकरणम्

यदेकेन सह सम्बद्धं तस्य बहुभिः सह सम्बन्धनं साधारणीकरणम् । विभावादयः केन एकेन सह सम्बद्धाः भवन्ति ? आश्रयेण सह । रसनिष्पत्तिव्याख्याप्रकरणे आश्रय इति शब्दस्य प्रथमः प्रयोगोऽस्य निबन्धस्य रचयित्रा संस्कृतभाषायां जगन्नाथस्य रसगङ्गाधरे हि लक्षितोऽस्ति । साहित्यदर्पणरसगङ्गाधरयोर्मध्ये रचितः कोऽप्यन्यः काव्यशास्त्रीयप्रबन्धो अनेन न पठितोऽस्ति । पूर्वम् आश्रयस्य स्थाने नायक एव अग्राहि । स्वयं जगन्नाथेन बहुधा नायकशब्दो हि प्रयुक्तोऽस्ति । लोल्लटादिभिः कस्मान्नायक एव अग्राहि ? तस्मिन् काले बहुधा श्राङ्गारिका एव नाटका अरच्यन्त श्रृङ्गारवीरमिश्रा वा येषु वः पुरुषः 'फल' रूपत्वेन कान्तायाः स्त्रियाः विवाहसंगतिं च रतिं चालभत शत्रुविजयादिकीर्तिं च सोऽभवन्नायकः । कान्तास्त्री चाभवन् नायिका । तावेवाभवतामालम्बनाश्रयौ च । आलम्बनाश्रयौ तत्रान्यावप्यभवताम् । अभिज्ञानशाकुन्तले विदूषक आसीत् हासस्यालम्बनं दुष्यन्तश्चाश्रयः । अनवधानिनी शकुन्तला आसीत् क्रोधस्यालम्बनम् दुर्वासा चाश्रयः । पुनः दुष्यन्तः स्वयमभूत् स्वसभायां क्रोधस्य आलम्बनम् शकुन्तलाया आनेतारौ तपास्विनावभूतामाश्रयौ । किन्तु अनयोरालम्बनमाश्रयत्वमुपेक्षितमस्ति बहुधा केवलं रसाभासस्य वा भावानुमानस्यैव वा हेतुकत्वात् तथापि नायकशब्दस्य प्रयोगे अव्याप्तिदोषः सम्भवति, अतो आश्रयशब्दो वरीयान् ।

भट्टनायकस्य मतेन आलम्बनोद्दीपनविभावानाम् अनुभावानां च व्यभिचारिणां चेति सर्वेषां साधारणत्वं सम्पाद्यते । एतन्मतम् अस्मत्कालीनेन आचार्यनगेन्द्रेनापि प्रथमं समर्थ्यते । किन्त्वसाध्वेदम् । उद्दीपनानि तु साधारणान्येव भवन्ति । एतानि विनाऽपि रसानुभूतिः सम्भवति । अनुभावैस्तु आश्रयगतः स्थायी भावः

हरिश्चन्द्र दीक्षितः

प्रथममनुमीयते हि । स्थायिभावानुमापनमेवानुभावानां प्रयोजनम् । रतौ कटाक्षभुजाक्षेपादयः सामाजिकेषु न उत्पद्यन्ते । व्यभिचारिभावाः सामाजिकैः केवलमनुमीयन्ते, कदापि नानुभूयन्ते । व्यभिचारिभावानपि विना रसानुभूतिः सम्भवति । आश्रयेण सह तु सामाजिकानां तादात्म्यमेव सम्भाव्यते । स्थायिभावस्तु सर्वेषां समान एव भवति ।

अधुना शिष्यति केवलमालम्बनम् । तदेव आश्रयेण सह विशिष्टतया सम्बद्धमुपस्थाप्यते । अतस्तस्यैव केवलं साधारणीकरणं सम्भवति । आलम्बनं हि साधारणीक्रियते च ।

याः सीताराधादयो रामकृष्णादीनाम् ईश्वरप्रतिरूपवत् पूज्यानां महापुरुषाणामभूवन् रतेः कारणानि आलम्बनानि वा ताः हिन्दूधर्मिसामाजिकानां पूज्याः । अतः कथं ते रामादिभिः सह आत्मैक्यं स्थापयित्वा सीतादिनारीः प्रति काल्पनिकीमपि रतिमनुभवितुं शक्नुवन्ति । तर्हि किं भवति । यदा सीतादीः प्रति रामादयः स्वरतिम् अभिव्यञ्जन्ति (प्रकाशयन्ति), तदा सामाजिकास्ताः प्रति तमेव भावमनुभवन्ति यं कविरन्वभवत् । कः स भावः ? श्रद्धेति । यत्र कविर्नायिकां प्रति काव्यनाट्यगतां कामपि रत्यालम्बनं स्त्रियं प्रति रतिमनुभवति तदा सामाजिका अपि अनुभवन्ति । रावणं प्रति यः क्रोधः रामेणानुभूतस्तमेव कविरप्यन्वभवत् । अत एव सामाजिका अपि अनुभवन्ति । इत्यनेन तर्केण कवेरनुभूतिः साधारणीक्रियते इति निगमयति रामचन्द्रशुक्लः पूर्वम् आलम्बनस्य साधारणीकरणं मत्वापि तदनुसरणान् नगेन्द्रोऽपि ।

किन्तु कवेरनूभूतिः साधारणीक्रियते इति मतमपि असाध्वेव । यद्यपि परम्परोलब्धज्ञानेन कविर्जानाति यत् सीतादयः परमसुन्दर्य आसन् रामादीनां रतेः कारणान्यपि । किन्तु ताः स न दृष्टवानस्ति । अतो यदा सीतादीनाम् रामादीन् प्रति रतेरालम्बनत्वं कल्पयति, तदा तासां मूर्तीः स्वमनसि कल्पयन् कविश्चिन्तयति यत् किं ताः

हरिश्चन्द्र दीक्षितः

रामादिसदृशेषु पुरुषेषु रतिमुत्पादयितुं शक्नुवन्ति। एवं चिन्तयन् कविः स्वभावतः किं यादृक् तेन कल्पितं तादृक् तासां रूपं तस्मिन् वा अन्येषु वा रतेर्जनकम् अस्ति वा न वेत्यपि समीक्षति। सीता लोकमाताऽस्ति इति स न विचारयति। पार्वती अस्ति लोकमातेति कालिदासो न व्यचारयत्। अतः पार्वतीसीतादीनां लोकपूज्यता नास्ति काव्ये च नाट्ये च तासां साधारणीभवने कापि बाधा। किन्तु काव्य-नाट्यानुशीलनावधौ यदि स्वमनः संस्कारवशात् पार्वतीसीतादीनां पूज्यत्वं कोऽपि सामाजिकः स्मरति, तर्हि स ताः प्रति शृङ्गारात्मिकां रतिं नानुभविष्यति, कवेरनुभूतिः काऽपि भवेत्। यदि पार्वतीसीतादयो लोकपूज्या मातरस्तर्हि शकुन्तलादयोऽपि परकीयाः। किं परकीयाः प्रति मानसी अपि रतिर्धर्मानुमन्या। कविर्यथा रावणं प्रति रामस्य क्रोधं प्रकाशयति, तथा रावणस्य रामं प्रति। परन्तु सज्जनस्य दुष्टं प्रति क्रोधः सामाजिकैरनुभूयते, न च दुष्टस्य सज्जनं प्रति। किमुचितम्, किमनुचितम् इति कविर्जानाति, साधारणतया सर्वेऽपि सामाजिका अपि जानन्ति। उचितमेव ग्राह्यं भवति। कविः सामाजिकानां न समक्षं विद्यते, न कल्पनायाम्। सर्वं काव्यं हि तस्य कल्पना। अतो कवेरनुभूतिर्न साधारणीक्रियते।

हरिश्चन्द्ररामदुष्यन्तकृष्णादय आसन् सन्तो महापुरुषाः। धीरोदात्तनायकरूपत्वेन तेषां हि चरितं पुरा रचितेषु काव्येषु च नाटकेषु रसनिष्पत्तये च शिक्षायै च गृहीतमस्ति। तैः सार्धमात्मैक्यानुभवः सर्वेषां काम्यो भवितुं शक्नोति। किन्तु सम्प्रति काव्येषु नाटकेषु गद्योपाख्यानेषु (उपन्यासेषु) च साधारणबलबुद्धीनां च तुच्छचरित्राणामपि जनानां नायकत्वं कल्पितमस्ति। किमेवंविधैः नायकैः सह आत्मैक्यम् इष्टं भवितुं शक्नोति। अवश्यं नैव। तर्हि रसानुभूतये नायकेन सह आत्मैक्यस्थापनायाः कल्पना वृथा। एतदपि प्रमाणं कवेरेवानुभूतेः साधारणीभवनस्य।

परन्तु नगेन्द्रस्य अयमपि तर्को न मान्यः। नायकोऽपि कुत्रचित्

कस्याप्यालम्बनं भवत्येव । यस्तस्य 'आश्रयः' तस्य भावं सामाजिका अनुभविष्यन्ति, यदि स औचित्येन प्रकाशयिश्यते । अन्यथा दुष्टतुच्छचरित्रनायकं काव्यं सर्वथा 'नीरसं' भविष्यति ।

यथा जडचेतनसत्त्वानां तदाकृतिवैशिष्ट्यानुसारेण भवन्ति जातयस्तथैव भवन्ति जातयस्तद् गुणभेदानुसारेण । एवं सुन्दराणाम् असुन्दराणां च, सुचरितानां दुश्चरितानां च, सदयानां च क्रूराणां च, वीराणां च भीरुणामपि च भवन्ति जातयः । पुनः सौन्दर्यादीनां मात्राणां कोटीनामपि जातयो भवन्ति । साधारणीकरणीये 'आलम्बने' व्यक्तेः संज्ञां विहाय सुन्दरतरसुन्दरतमादीनां वा सुन्दरितरसुन्दरितमादीनां वा जातित्वमेव प्रतिष्ठितं वा प्रतिष्ठाप्यं वा भवति । ईदृग्विधं प्रतिष्ठापितं जातित्वमेवालम्बनानामालम्बनत्वम् इत्ययं रामचन्द्रशुक्लस्य विचारोऽवधातव्यः । किन्तु मुनिभरतेन यादृग्विधानामालम्बनोद्दीपनरूपाणां विभावानामभिनेयत्वं वर्णनीयत्वं वा विहितमस्ति तदनुसारेण विभावानां कल्पनीयतायामुपगतायाम् तथैव उचितं हि आलम्बनं विधेयम्–आलम्बनगतमनौचित्यं वारणीयमेवेति नियमस्यानुवर्तने शुक्लमहोदयस्य विचारस्य नवीनता च उपयोगिता च समाप्यते ।

भरतेन यद्यपि विभावस्वरूपाणां विधाने साधारण इति शब्दो न प्रयुक्तः, न च रसनिष्पतिप्रक्रियायाम् आश्रयस्य नायकस्य वा भूमिका विचारिता – यद्यपि रसनिष्पत्तिसूत्रे स्मृता अनुभावा आश्रयस्यैव इति निस्सन्देहतया सुनिश्चतम-किन्तु तस्य मतेन विभावैर्न केवलमाश्रयस्य (नाटकस्य) मनसि अपितु सर्वेषामपि सामाजिकानां मनसि, कस्यापि स्थायिभावस्य जनकैर्भवितव्यमेव अर्थाद् विभावैः कविकल्पनायामेव पूर्वतः साधारणीकृतैरेव भवितव्यम् । अतोऽस्य निबन्धस्य रचयितुरपि मतमस्ति यदालम्बनविभावः कविना साधरणीकृतरूप एवोपस्थाप्यते, नहि स काव्यनाट्यानुशीलनावधौ साधारणीक्रियते इति ।

पशुपक्षिवनपर्वतसरितसमुद्रादिरूपे निसर्गे च स्त्रीपुरुषाणां

हरिश्चन्द्र दीक्षितः

रूपस्वभावाचरणेषु किं मनोरमं किं वा अमनोरमं, किं सत् किम् असद् इति सर्वेऽपि सामान्यबुद्धयो जना जानन्ति। कविः कस्मान्न ज्ञास्यति यो भवति प्रतिभासम्पन्नः। कविरेवंविधमालम्बनं कल्पयति कल्पयितुं शक्नोति वा यत् सर्वेषां वा बहूनां वा मनुष्याणां मनस्सु समानमेव 'भाव' जनयति। अतः स एव वास्तविकः कविः यो लोक-हृदयम् अभिजानाति इति यत् शुक्लमहोदयेन निगमितं, तदस्ति केवलं भावुकं कवित्वपूर्णं वा कथनम्। तस्मिन् नास्ति किमपि शास्त्रीयतायाः गुरुत्वम्। साम्प्रतं आँगलकाव्यप्रभाववशात् बहवः कवयो मुक्तकरूपेषु गिरि–निर्झरसरित्सरः-लतापुष्पादीनामेव हर्षकारिवर्णनं कुर्वन्ति, शृङ्गाराद्यनुभावकं मुक्तकं वा प्रबन्धं वा रचयन्त्येव न, तथापि ते लोकमनोरमं हि विदधति। अस्मिन्नेव प्रकरणे अस्य प्रबन्धस्यान्ते 'साधारणीकरणविषयकं परिशिष्टशिष्टम्' अपि पठ्यताम्।

कीदृशी रसानुभूतिर्वरीयसी–प्रबन्धकाव्यं विदधानस्य कवेः प्रथम-उद्देश्यो भवति पाठकश्रोतॄणां रसानुभावनम्। रचनायाः क्रमे प्रकरणानुसारं क्वचित् क्वचित् स सदुपदेशानपि विदधाति। यदि प्रबन्धकाव्यस्य, नायकोऽस्ति लोकहितकृद् धीरोदात्तस्तर्हि तस्य सदा-चरणं च लोकमान्यत्वकीर्त्यादिफलोपलम्भनमपि च भवति सदुपदेश-कम्। दोषस्य दमनाय सद्गुणस्य संस्थापनाय च धीरोदात्तचरित्रः पुरुषः यानि असाधारणानि कर्माणि करोति तेषां वर्णनात् अथवा कस्मिन्नपि सुरम्ये स्थले कमपि उचितं प्रयत्नं कृत्वा कस्या अपि कान्तायाः यमनुरागं स लभते, तस्यापि वर्णनाद् या सामाजिकानां वीरशृङ्गारादिरसानामनुभूतिर्जायते, सा तस्याः रसानुभूतेः या साधारणजनचरित्रस्य च साधारणघटनास्थलानां च वर्णनाज् जायते, भवति भृशं वरीयसी आनन्दाधिक्यविधायिनीत्वात्। रामचन्द्रशुक्ल-स्य एकं कथनमस्ति–रसानुभावकेषु मुक्तकेषु भवति आनन्दस्य सिद्धा-वस्थायाः वर्णनम, प्रबन्धेषु भवति आनन्दस्य साधनावस्थायाः वर्णनम् इति। यतः सिद्धं भवति साधनस्य तुलनायां वरीयस्, तर्हि मुक्तकानि

हरिश्चन्द्र दीक्षितः

भवन्ति प्रबन्धानां तुलनायां वरीयांसि-तानि शृङ्गारादिरसानुभाववर्णन-मुक्तकानि, येभ्यः कोऽपि सद्विचारोऽपि न प्रयंते। तर्हि किमेतन् मतम्, काव्यानामेवविधं विभाजनं मान्यतामर्हति कदापि नैव।

रसो नास्ति काव्यस्यात्मा

आचार्य आनन्दवर्धनः वस्त्वलंकारध्वनी रसध्वनेः पृथगमन्यत। एतद्ध्वनिकाव्यविभाजनम् अविच्छिन्नया परम्परया जगन्नाथं यावत् स्वीकृतमस्ति। रसस्य काव्यात्मत्वं मान्यते चेत्, तर्हि यत्र वानरादीनां स्वभावो वर्णितोऽस्ति निर्झरादीनां रूपसौन्दर्यं वा वर्णितम्, तत्र अकाव्यत्वमापत्स्यते – कुमारसम्भवस्य प्रारम्भे हिमालयवर्णनेऽपि। इदं हिमालयवर्णनं पार्वतीशिवयोः रतेरुद्दीपनरूपत्वेन विहितमस्ति इति कोऽप्यकाव्यज्ञ एव वक्ष्यति। वस्तुतः स्वभावोक्तिषु भर्तृहरीत्यादीनां नीतिशतकादिषु निबद्धासु विचारोक्तिषु च न भवति मनाक् रसस्पर्शः। व्यर्थमेव ध्वनेः काव्यात्मत्वं खण्डयित्वा 'वाक्यं रसात्मकं काव्यम्' इत्युक्त्वा च रसस्य काव्यात्मत्वस्य प्रतिपादनाय महापात्रो विश्वनाथः कमपि तर्कं न प्रस्तौति। काव्यवाक्ये नहि स्थितत्वात् सामाजिकानां मनस्येव निष्पाद्यत्वात् सर्वेषां काव्यवाक्यानां नैव रसानुभावकत्वाद् रसो नास्ति काव्यस्यात्मेति सिद्धम्।

रसरसाभासादयः–

यस्माद् रसानुभूतिर्भवति, तत् तु 'रसकाव्यं' मान्यत एव यस्मात् भावादीनां केवलम् अनुमितयो हि सम्भाव्यन्ते तदपि कथमपि रससम्बद्धत्वाद् रसकाव्यमेव मान्यते। अतोऽष्टविधं भवति रसकाव्यम्-रसः, रसाभासः, भावः, भावाभासः, भावोदयः भावशान्तिः, भावसन्धिः, भावशबलता चेति।

१– रसः– यत्रालम्बनाश्रययोरुभयोर्भवति औचित्येन कल्पनम् आश्रयगतस्थायिभावस्य प्रचुरैरनुभावैः प्रकाशनं च तत्र रसः–

यथा पार्वतीशिवयोः प्रारम्भिकरतिविलासस्य वर्णनेऽस्मिन् पद्ये–

(पार्वती) सस्वजे प्रियमुरोनिपीडनं प्रार्थितं मुखमनेन नाहरत्।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा॥

हरिश्चन्द्र दीक्षितः

अनेन=शिवेन । अत्र पार्वतीशिवयोरुभयोरनुभावाः प्रदर्शिताः सन्ति ।

२– भावः– यत्र कोऽपि 'भावः' केवलमनुमितेर्विषयत्वं गच्छति नानुभूतेः, तत्र भवति भावो यथाऽस्मिन् पद्ये–

हरस्तु किञ्चित्परिलुप्तधैर्य–
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ।।

३– रसाभासः– यत्र रसस्य भवति सर्वा सामग्री किन्तु आलम्बने वा आश्रये वा भवति अनौचित्यम्, सर्वरससामग्र्या सह कोऽपि स्थायिभावो जडसत्त्वे आरोप्यते वा, तिर्यग् जन्तुष्वभिव्यक्तो वर्ण्यते वा तत्र भवति रसाभासः– यथात्र–

विपुलसलिलवृष्टौ क्लेद्यमानश्च ध्वान्ते
पदि पदि निपतंश्चौर्यतोऽस्म्यत्र प्राप्तः ।
इति वदति भुजङ्गे तेन दष्टाधरे सा
स्वयमपि परिजुष्टा जीवनं प्राप्य कान्ता ।।

अत्र अनौचित्याद् रतेः प्रवृत्तिः ।

विलोक्य शैलः स्वरसेन प्राप्तां
कादम्बिनीमुत्सुक आलिलिङ्ग ।
प्रकाशयामास मुदं स्वयं सा
स्वनेन काञ्च्याः द्रुतचञ्चलायाः ।।

अत्राचेतनसत्त्वयोः रतेरारोपः ।

मधुद्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः ।। कु० सं० ३।३६

हरिश्चन्द्र दीक्षित।

४-भावाभासः– अस्य तान्येव कारणानि यानि रसाभासस्य त एव भेदाश्च ।

सुतं छविल्लं प्रतिवेशिनस्तम्
मुहुर्मुहुर्द्रष्टुमहं समीहे ।
शक्नोमि रोद्धुं सखि नो मनो मे
पत्युः सदा यद्यपि शंकिताऽहम् ।।

अत्र अनौचित्येन प्रवर्तितायाः रतेः केवलमनुमेयता ।

गर्जन्ति एते विकटा पयोदा
विद्युत्कृपाणं परिचालयन्तः ।
युध्यन्ति व्योमोगन उत्प्लवन्तः
मदं स्रवन्तो विपिने गजेन्द्राः ।।
आगच्छमानस्य पुरोगजस्य
शुण्डोद्धतस्योग्ररवं निशम्य ।
उत्थाप्य पुच्छं धुतकेसरोऽसौ
सिंहस्तमाक्राम्यदुदीर्णसत्त्वः ।।

तीक्ष्णनखरदरहितत्वाद् गजः सिंहाद् दुर्बलो भवति, तेन निःशंकतया विजेयश्च । अतोऽप्यत्र क्रोधभावाभासः ।

५– भावोदयः– कस्यापि भावस्य सहसोदयः–

विनिन्दकं चार्थविघातकं तम्
मिथ्यासखायं च विलोक्य मार्गे ।
भ्रूवावभूतां कुटिले च तस्य
हस्तोऽप्युदस्थाद् दृढमुष्टिबन्धः ।।

क्रोधस्य सहसोदयः ।

६– भावशान्तिः- भावस्य सहसा शमनं, नियमनं वा ।

प्रहर्तुमेवोद्यतमाशुदृष्ट्वा
शत्रुं स भीरुः पदयोर्नतोऽभूत् ।
त्राहीति तस्यार्तवचो निशम्य
खड्गं पतन्तं न्यरुधत् स वीरः ।।

हरिश्चन्द्र दीक्षितः

प्रहर्तुमेकोद्यतमाशु दृष्ट्वा
भटं स भीरुः पदयोर्नतोऽभूत्।
त्राहीति तस्यार्तवचो निशम्य
खड्गं पतन्तं सुभटो न्यरौत्सीत्॥

७– भावसन्धिः– द्वयोर्भावयोः प्रायो युगपद् उदयस्थिती–

प्रस्थातुमुद्यतं दृष्ट्वा हनुमन्तं महाकपिम्।
अशोकोपवनं जाता सीताया विषमा गतिः॥
यात्ययं राममानेतुम् इत्यभूत् कान्तमाननम्।
कोऽवलम्बोऽधुना मे स्याद् इत्यश्रु विकलेऽक्षिणी॥

८– भावशबलता– बहूनां भावानां युगपद् उदयस्थिती–

प्रत्यागतं पतिं दृष्ट्वा दीर्घकालप्रवासतः।
सहसा सम्मुखं कान्ता भूयँहसत् तथाऽरुदत्॥
दीर्घः प्रवास एतावान् इति सा वाचिकर्कशी।
गाढत्वेन समाश्लिष्यत् हृतसंज्ञाऽमीलयद्दृशौ॥

रसदोषाः– अपुष्टिरतिपुष्टिः पुनः पुनः प्रतीतिः शमितस्य पुनरुत्थितिर्वा बाधितरसानुभूतिश्च विरुद्धपरिणतिश्चैते रसदोषाः।

१– अपुष्टिः– यत्र रसानुभूतिस्तु भवेत्, किन्तु तस्यां काचिन् न्यूनता अतृप्तिरपि वा प्रतीयेत, तत्र भवत्यपुष्टिरूपो रस दोषः यथा–

तं श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम्।
राघवो भरतेनोक्तां बभूव हतचेतनः॥१॥
तं तु वज्रमिवोत्सृष्टमाहवे दानवारिणा।
वाग्वज्रं भरतेनोक्तम् अमनोज्ञं परंतप॥२॥
प्रगृह्य रामो बाहू वै पुष्पिताङ्ग इव द्रुमः।
वने परशुना कृत्तस्तथा भुवि पपात ह॥३॥
तथा हि पतितं रामं जगत्यां जगतीपतिम्।
कूलघातपरिश्रान्तं प्रसुप्तमिव कुञ्जरम्॥४॥

हरिश्चन्द्र दीक्षित।

भ्रातरस्ते महेष्वासं सर्वतः शोककर्शितम् ।
रुदन्तः सह वैदेह्याः सिषिचुः सलिलेन वै ॥५॥
स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यामश्रुमुत्सृजन् ।
उवाच भरतं वाक्यं धर्मात्मा धर्मसंहितम् ॥६-७॥
किं करिष्याम्ययोध्यायां तातं दिष्टां गतिं गते ।
कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ॥८॥

इत्यादि वा० रा० अयोध्या० १०३

भरतस्य वचनेन पितुर्मरणं ज्ञात्वा यः शोको रामस्य हृदि उत्पद्यते, स पाठकेन अनुभूयते । ततः शोकेन सन्तप्तं रामं मूच्छितं दृष्ट्वा सीतया सह तद्भ्रातरो रुदन्ति । अत्र शोकस्य केवलमनुमितिः । अक्ष्णोः सिञ्चितो रामो मूर्च्छाया बुद्ध्वा मृतस्य पितुर्गुणान् वर्णितुमारभते । अतो भवत्यत्र रसस्याऽपुष्टाऽनुभूतिः ।

२– अतिपुष्टिरनुभूत्यतिरेको वा– एकस्मिन्नेव प्रकरणे बारं बारं बहुशो वा अनुभावानां वर्णनाज् जायतेऽयं दोषः । वाल्मीकीयरामायणे हि विविधानां युद्धानां वर्णनेषु वीररसोऽतिरेकतयाऽनुभूयते । प्रमाणरूपत्वेन युद्धकाण्डस्य एकोनषष्टितमे सर्गे रावणलक्ष्मणयोर्युद्धस्य वर्णनं पठ्यताम् ।

३– पुनः पुनः प्रतीतिः– वाल्मीकिरामायणस्य तस्मिन्नेव प्रकरणे, यस्मिन् पितृमृत्युसमाचारश्रवणात् खिन्नस्य रामस्य शोकः प्रथमं वर्णितोऽस्ति, रामेण मृतपितृजीवात्मने जलाञ्जलौ च श्राद्धपिण्डे च समर्पिते सति तद्भ्रातरश्च सीता च पुना रुदन्ति–

तेषां तु रुदतां शब्दात् प्रतिशब्दोऽभवद्गिरौ ।
भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव ॥३३॥
महाबलानां रुदतां कुर्वतामुदकं पितुः ।
विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥३४॥

रघुवंशमहाकाव्यस्य अन्तिमे सर्गे राज्ञोऽग्निवर्णस्य यो बहुनारिवृन्दरतिविलासो वर्णितस्तस्मिन्नपि भवति नीरसायमाना पुनः पुनः

शृङ्गाररसप्रतीतिः । अग्रे विरुद्धपरिणतिदोषस्य वर्णनमपि पठ्यताम ।

४– बाधितरसानुभूतिः– यत्र लोकपूज्ययोर्महच्चरित्रयोः स्त्रिपुरुषयोर्देविदेवयोर्वा न केवलं रतिर्वर्ण्यते, अपितु साधारणस्त्रिपुरुषयोः रत्या समावर्ण्यते तत्र बाधितरसानुभूतिर्वर्णितरतिकान्तकान्तायुगमस्य पूज्यत्वात् । अयं दोषो ध्वन्यालोकस्य तृतीये उद्योते षष्ठ्याः कारिकायाश्च पुनश्चतुर्दश्याः कारिकायाश्चाग्रे विहितमालोकभाष्यं पठता मया सम्भावितोऽस्ति–

यत्त्वेवंविधे विषये (उत्तमप्रकृतीनां सम्भोगवर्णने) महाकवीनामपि असमीक्ष्यकारिता लक्ष्ये दृश्यते स दोष एव । स तु शक्तितिरस्कृतत्वात् तेषां न लक्ष्यत इत्युक्तमेव । ध्व० आ० ३।१०-१४।। दोषोऽयं ध्वन्यालोकस्यैवानुसारेण कुमारसम्भवे शंकरपार्वत्योः सम्भोगवर्णने वर्तते । अस्य संज्ञा तु मया कल्पिता । दोषोऽयं रसाभासाद् भिन्नः यतोऽस्मिन् परस्परं रतिरनौचित्यान्न प्रवर्तते ।

५– विरुद्धपरिणतिः– कस्यापि रसस्य अनुभावकाद् वर्णनानन्तरं तद्विरुद्धं प्रकृतिवस्तूनां वर्णने जायतेऽयं दोषः, यथा वाल्मीकीये रामायणे निहतपतिकायास्ताराया: विलापे–

अगाधे च निमग्नाऽस्मि विपुले शोकसागरे ।
अश्मसारमयं नूनमिदं मे हृदयं दृढम् ।।
भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा कृतम् ।
सुहृच्चैव च भर्ता च प्रकृत्या च मम प्रियः ।।
प्रहारे च पराक्रान्तः शूरः पञ्चत्वमागतः ।

ततः– स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ।
कृमिरागपरिस्तोमे स्वकीये शयने यथा ।।

अस्मिन्नपि प्रकरणे रसस्य पुनरुद्दीप्तिः कृताऽस्ति–

अस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् ।
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम् ।।

हरिश्चन्द्र दीक्षितः

उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना ।
अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम् ।।

अस्य दोषस्योदाहरणानि विरलान्येव ।

स्वशब्दवाच्यतादोषस्य वृथा कल्पना—

यत्र रतिव्रीडादिकः कोऽपि भावः शृङ्गारहास्यादिः कोऽपि रसः स्वनाम्ना स्मर्यते, तत्र जायते स्वशब्दवाच्यातादोषः, यतो नामस्मरणमात्रेण न कोऽपि भावोऽनुमीयते प्रतीयते वा, न कोऽपि रसोऽनुभूयते ।

रसस्य अनभिधेयताया अपि मृषा कल्पना- येन तर्केण स्वशब्दवाच्यतादोषः कल्पितोऽस्ति, तेनैव तर्केण अनभिधेयतायाः दोषोऽपि कल्पितोऽस्ति ।

उभयोर्मृषयोर्दोषयोर्निराकरणम्—

किं शर्करेति वचनेन लवणेतिवचनेन वा वक्तुर्वा श्रोतुर्वा जिह्वायां मधुरो वा लवणो वा स्वादोऽनुभूयते ? को बुद्धिमान् कविर्यो भावानुमानात्मकं, रसानुभावकं वा काव्यं विधातुमिच्छति, स भावकारणस्य रूपं वा भावाश्रयस्य अनुभावान् वा रूपं चानुभावाश्च उभौ वा कस्मान्न वर्णयिष्यति । रूपस्य चानुभावानां च वर्णनेन सार्धं यदि केनापि कारणेन—कमपि भावं विशेषतया अवधेयं विधातुं यदि तं स नाम्ना स्मरति, तर्हि न कापि काव्यत्वक्षतिर्जायते यथात्र—

लंकेश्वरः क्रोधवशं जगाम
ससर्ज चान्यान् निशितान् पृषत्कान् ।
वा० रा० युद्ध० ५६।१००

अगाधे च निमग्नास्मि विपुले शोकसागरे ।।
तारायाः विलापः— किष्कि० २४।१०

शोकसागरे इति रूपकम् ।

रसस्य कोऽपि कविः कदापि नाम न स्मरति ।

हरिश्चन्द्र दीक्षितः

रसो नास्ति लक्ष्यार्थो-पीति विषये दशरूपके प्रस्तुतस्तर्कस्य तस्यापि वृथात्वस्य साधनम्-

'गङ्गायां घोष' इत्यादिषु गङ्गादयः शब्दा गङ्गादिषु घोषादीनां धारकत्वादीनाम सामर्थ्यस्य अभावात् स्रोत इत्यादिषु स्वार्थिषु बाधिताः सन्तः स्वगतलक्षणाशक्त्या घोषादीनि योग्यान्यर्थान्तराणि लक्षयन्ति । किन्तु- अत्र तु (रसानुभवहेतुकविभावादिवर्णनेषु) नायिकादिशब्दाः स्वार्थे अस्खलद्गतयः (अबाधिगतयः) कथमिव अर्थान्तरमुपलक्षयेयुः । को वा निमित्तप्रयोजनाभ्यां विना मुख्ये सति उपचरितं प्रयुञ्जीत' इति । एतद्वचनं दशरूपकावलोकरचयितुर्महान्तं भ्रमं प्रकटयति । रसप्रत्यायकेषु विभावादिवर्णनेषु शकुन्तला-दुष्यन्तादयः शब्दा नायिकानायकनामवाचका न भवन्ति स्वार्थेषु स्खलद्गतयः। किन्तु तेषां स्वरूपाणाम् अनुभावानां च वर्णनेषु तादृशाः शब्दप्रयोगाः कस्मान्न कर्तुं शक्यन्ते, ये लक्षणावादिभिर्लाक्षणिका इति कथ्यन्ते, यथात्र- कृशाङ्ग्याः संतापं वदति बिसिनीपत्र-शयनम् इति वाक्ये वदति शब्दः ।

मनः करोति मे कान्तं शीतलं चापि ते प्रिये ।
चन्द्रकान्तिर्मुखे रम्ये रञ्जयत्यक्षिणी च मे ।।

मनः शरीरान्तः स्थितं किमपि सूक्ष्मं तत्त्वम् । अतः कुतस्तस्मिन् तमसावृतत्वम् आलोक्यत्वम् वा एवं कुतो घर्मतप्तत्वं घर्मतापनिवृत्तिर्वा । अतोऽत्र अनयोः शब्दयोः स्वार्थौ बाध्येते । ततस्तयोर्योगेन उभयोः शब्दयोः क्रमशः प्रसन्नमिति शान्तमिति च संगतावर्थौ लक्ष्येते । एवमेव चन्द्रस्य वा चन्द्रमसो वा कान्तेर्मुखे असम्भावनया विध्वर्थस्य योगेन चन्द्र इत्यस्य चारु इति योग्यो वा संगतो वार्थः लक्ष्यते । अतो यत्र रसानुभूतिर्वा भावानुमितिर्वा साध्या तत्राप्यनुभावानां च विभावरूपस्य वर्णने च लाक्षणिकाः प्रयोगाः सम्भवन्ति । अनेन प्रमाणेन सिध्यति यन् नायिकादि (-विभाव संज्ञा-वाचकाः) शब्दाः स्वार्थेषु अस्खलगतयो भवन्ति इत्यादि तर्केण रसो न लक्ष्यः लक्ष्यार्थो

वेति सिद्धेः वृथैव प्रयत्नः कृतः।

रसानां शब्दगुणैः सह न नित्यसम्बन्धः

माधुर्यं च ओजश्चेति गुणौ शब्दानामुच्चारितेषु रूपेषु उत्पद्येते तिष्ठतश्च, शब्दानां परिवृत्तौ विनश्यतः। रसानुभावकस्य विभावादिवर्णनस्य भवति वाक्यार्थेन सह नित्यः सम्बन्धः। अतो रसविशेषस्य माधुर्येण सह ओजसा सह वा न सम्भवति सम्बन्धनित्यता। येषु विभावादिवर्णनेषु श्रृंगारकरुणवात्सल्यभक्तिशान्तरसेषु कस्यचिन् निष्पादकत्वं भवति, तत्र वर्णनेषु वा अर्थेषु वा भवति भावविशेषस्य माधुर्यम्, यच्छब्दोच्चारणमाधुर्यान् नितान्तं भिन्नम्। एवमेव येषु विभावादिवर्णनेषु रौद्रवीरभयानकबीभत्साद्भुतरसेषु कस्यचिदनुभावकत्वम्-विशेषतः रौद्रवीरभयानकेषु कस्यचित् तत्रापि वर्णनेषु वा अर्थेषु हि वा भवति भावविशेषस्य परुषत्वम्। हास्ये न भवति माधुर्यं, न च परुषत्वमपेक्ष्यते। श्रृङ्गारादयो रसाः शब्दोच्चारणस्य माधुर्यं विना, रौद्रादयो रसाः शब्दोच्चारणस्य परुषत्वं विना उद्भणितुं शक्नुवन्ति, उद्भवन्ति च। तथापि शब्दमाधुर्येण श्रृङ्गारादीनां शब्दपारुष्येण रौद्रादीनां च प्रभविष्णुता वर्धत इति सत्यम्।

रससमासरचना सम्बन्धविचारः—

रससमासरचनयोरपि नास्ति कोऽपि नित्यसम्बन्धः। किन्तु रसानभावकवर्णनेषु माधुर्यगुणविधायकशब्दावलीनाम् ओजोगुणविधायकशब्दावलीनां वा समासरचना कर्तुं शक्या तथापि पाठा अर्थबोधविघ्नसम्भावनावारणाय समासा लघवो हि विधीयन्ताम्, मध्यमाकारा वा। दीर्घसमासास्तु क्वचित् कदाचिदेव शब्दचमत्करोत्पर्यं विनिवेष्टुं शक्यन्ते, न सर्वत्र, न प्रायशः।

किं रसवदलंकारः सम्भवति

रसवत् इति रसात्मक इत्युभौ शब्दौ समानार्थकौ। अतो यत्र यत्र काव्यं रसात्मकम् तत्र तत्र रसवदलंकार इति निष्कर्ष्यते। किन्तु नायं निष्कर्षः समीचीनः। यदि रसवदलंकारः सम्भवति, तर्हि

कस्मान् रसाभासवत्, भाववत्, भावाभासवत् भावसन्ध्यादिवद् वा । वस्तुतः काव्ये भवति विभावादीनां वर्णनम्, रसः सामाजिकस्य मनसि जायते, भावस्तेनाऽनुमीयते । अतो न सम्भवति रसवदलंकारः ।

रसैः सह अनुप्रासोपमादीनामलंकाराणां सम्बन्धस्य विचारः

विभावानुभावादीनां वर्णनेषु यत्र स्वाभाविकीनां चेष्टानां स्वाभाविकानां रूपाणां वा स्वभावोक्तिपरं निरलंकारं हि वर्णनं न भवति काव्यम्, तत्र विभावानुभावादीनां वर्णनेषु उपमारूपकविभावनामीलितोन्मीलितादीनाम् अर्थालंकाराणामेव वाक्यार्थस्याप्तिर्भवति काव्यस्य कारणम्, न रसानुभावकता, भावानुमापकता वा । अतो न केवलं शब्दालंकारा अपितु उपमारूपकादयो अर्थालंकारा अपि रसात्मके शब्दार्थशरीरे च काव्ये कटककुण्डलहारादिभिः सदृशा बहिःशोभावृद्धये संयोगसम्बन्धेनैव धार्या इति कतिपयानां प्राचीनानां तदनुगन्तॄणाम् अर्वाचीनानामपि केषांचिदाचार्याणां मतं कथमपि नहि तर्कबुद्ध्याऽवगन्तव्यम् । शब्दालंकाराः शब्दपरिवृत्तिं न सहन्ते । त एव भवन्ति कटककुण्डलाद्याभूषणसमाः संयोगसम्बन्धेन धार्याः बहिःशोभावर्धकाश्च ।

रसस्यातिव्याप्तेरवधारणायाः कारणात् तद्विरुद्धं मिथ्यारोपाणां कल्पना अतिव्याप्तौ अनवगतायां स्वतस्तेषां परिहारः–

यावत् काव्यं क्वचिदपि च कदाचिदपि रचितम, तत् सर्वं रसात्मकम्, तस्मिन् यथा तथा रसस्य स्थितिं साधयितुं शक्यत इति आसीत् साहित्यदर्पणकर्तुर्विश्वनाथस्य विचारः । हिन्दीभाषायां रससिद्धान्तस्य रचयितुर्नगेन्द्रोऽपि एवमेव मन्यते । सोऽपि तासु सर्वासु कवितासु रसस्य स्थितिं साधयितुं यतते यासु नास्ति मनागपि रसस्य स्पर्शः । त आधुनिकाः कवयो ये प्रयत्नपूर्वकम् अरसानुभाविकाः कविताः रचयन्ति, ते बहुभिः प्रकारैः रसे अव्याप्तेर्दोषं निर्दिशन्ति । नगेन्द्रमहोदयस्तान् यथा तथा निराकर्तुं यतते । किन्तु वृथैव ।

हरिश्चन्द्र दीक्षितः

रसो न काव्यस्यात्मा, न च सर्वं काव्यं रसानुभावकम् । काव्ये रसानुभावकता उपचारतया रसस्थितिर्वा तत्रैव मान्या, यत्र आश्रय आलम्बनं प्रति यं स्थायिभावम् अनुभावैर्व्यनक्ति (प्रकटयति), स सामाजिकैरपि अनुभूयते, कामम् आभासिकतयैव तत्र केवलं तत्रैव भवति रसः। न तत्रापि यत्र कोऽपि स्थायी वा संचारी वा भावोऽनुमीयते। यत्र चेतनसत्त्वस्य स्वाभाविकीनां चेष्टानां जडस्य वा चेतनस्य वा सत्त्वस्य स्वाभाविकस्य रूपस्य निरलंकारं वा सालंकारं वा वर्णनं भवति काव्यं- शब्दावली वाक्यरचना च भवेत् सदोषा वा निर्दोषा वा- प्रायः बहुत्र वा सदोषा यथा हिन्दीभाषायाः साम्प्रतिकीषु नवकवितासु-तत्र न भवति रसः काव्यरसो वा। गिरिवनमृगशशकादिजडचेतनसत्त्वस्वाभाविकचेष्टारूपवर्णनात्मिकाया कविताया अनुशीलनाद् यो हर्षानुभवो जायते, सोऽपि रसानुभव एवेति यस्योपगमनम्, तेन काव्यत्वविमर्शाऽसमर्थेनैव भवितव्यम् ।

पुनः कस्यचिद्विचारस्य उक्तिवैशिष्ट्येनाभिव्यक्तिर्भवितुमर्हति काव्यम्, भवति च। विचारः कीदृशोऽपि भवेत् सार्वभौमश्च सनातनः देशकालपरिमितो वा साम्प्रदायिको वा असाम्प्रदायिको वा निकृष्टो वा। तस्य काव्यविधयाऽभिव्यक्तिरस्त्येव काव्यम् ।

रसानुभावनाय वर्ण्यस्य वस्तुनः ग्रहणं कल्पनं वा

कोऽपि कविर्गिरेर्वा निर्झरस्य निश्चेष्टं रूपं मृगशशकादीनां वा सचेष्टरूपं वा पश्यन्नेव तद्वर्णनरूपं काव्यं रचयितुं शक्नोति। किन्तु रसानुभावनम् उद्दिश्य स क्रियमाणमनुभवमाधृत्य काव्यं न कर्तुं शक्नोति। यत्र रसानुभावकं किमपि मुक्तकं विरच्यते, तत्र कारकस्य उत्तमपुरुषत्वं भवद् वा अन्यपुरुषत्वं वा क्रियासु भूतकालत्वं भवेद् वा वर्तमानकालत्वं वा रसानुभाविनी घटना भवति पूर्वस्मिन् काले हि घटिता।

यत्र कोऽपि कविः कविनिबद्धपात्ररूपः कश्चित् लोकसाधारणजनो वा कामपि तादृशीं घटनां स्मरति यस्याः वर्णनं भवति

हरिश्चन्द्र दीक्षितः

रसानुभावकम् तत्र प्रत्यक्षं हि भवति स्मृतम्, स्मृत्याकल्पितं वा ।

यत्र पूर्वदृष्टं पूर्वानुभूतं वा किमपि अभिज्ञायते, तत्र एतत् पूर्व-मनुभूतं दृष्टं वेति स्मृतिरव जायते । किन्तु कवेर्वा कविनिबद्धपात्रस्य वा-कामं स भवेत् ख्यातो वा अख्यातो वा-'अभिज्ञानम्' एव न भवति काव्यम् । तत्र दृश्यमानरूपस्य काव्यविधया वर्णनम् 'इदं तदेव' इत्य-स्य काकुस्वरेण उच्चारणं (काकुवक्रोक्तिरूपम्) भवति काव्यत्वस्य-कारणम्, सामाजिकानां कृते भावविशेषस्यानुमापकं च, यथात्र-

एते त एव गिरयो विरुवन्मयूरा
स्तान्यव मत्तहरिणानि वनस्थलानि ।
आमंजुवंजुललतानि च तान्यमूनि
नीरन्ध्र-नीपनिचुलानि सरित्तटानि ॥

अत्र सामाजिकैः प्रकरणज्ञानमपि अपेक्ष्यते । अतोऽभिज्ञानं वा स्मृतिर्वा न काव्यस्य वा रसस्य वा कारणं, यथा आचार्यो रामचन्द्र-शुक्लोऽमन्यत रसमीमांसायाम् ।

व्यतीते काले निर्मितानां राजप्रासादानां दुर्गाणां च भग्नावशेषान् पश्यन् तद्रूपदर्शनहेतुत्वेन कोऽप्यनुमातुं शक्नोति यत् तेषां मूलस्वरूपा-णि कीदृशानि भव्यान्यासन्, तेषु कीदृशा नाना विभवविलासा अन्व-भाविषुः । ततो अस्माकं देशे पुरा कीदृशी चमत्कारिणी भावनार-चनाकला अवर्तत कीदृशो विशालो विभवश्चेति विचारेण स प्रसन्नो भवितुं शक्नोति अथवा कीदृशी परिवर्तनशीलता च नश्वरता च जगत इति विचारेण विषण्णः । अत्र ध्वंसावशेषदर्शकेन यो हर्षो वा विषादो वाऽनुभूयते तस्य कारणमस्ति प्रत्यक्षम्, प्रत्यक्षहेतुकी लोक-सम्भवरूपकल्पना च तदनुजातो विचारश्च । अयं नास्ति रसानुभवः । ध्वंसावशेषाणां दर्शनेन पुराणेतिहासकथानकपठनेन वा या कल्पना जायते, सा न भवति स्मृत्यात्मिकी स्मृत्याभासिका कल्पना वा, यतो-ऽत्र कल्पितम्, न भवति पूर्वदृष्टम् ।

हरिश्चन्द्र दीक्षित।

कथानकस्य कल्पनम्

रसस्य उत्कृष्टानुभूतिः नाटकेभ्यः प्रबन्धकाव्येभ्यो हि वा जायते। तेषु कथानको भवति ख्यातम् (पुराणेतिहासादुपलब्धम्) उत्प्रेक्षितं (कविकल्पितं) वा मिश्रम् (उभयसमन्वयरूपं) वा। कल्पना भवति द्विविधा–

१– लोकसम्भवरूपघटनानुसारिणी।

२– अलोकसम्भवरूपघटनानुसारिणी च। कल्पनायाः प्रथमे प्रकारे प्रत्यक्षानुभूतेषु केनचित् परिवर्तनेन सह सर्वं भवति जडचेतन-सत्त्वरूपेषु च घटनास्थलरूपेषु च घटनासु च लोकानुरूपमेव सम्भवं च। द्वितीये प्रकारे प्रत्यक्षानुभूतेषु कविना स्वमनसि कृतैरङ्गसंयोजनादिरूपैः परिवर्तनैरीदृशाणि रूपाणि तदनुसारं कर्माणि च कल्प्यन्ते यानि लोके न सम्भवन्ति–असम्भवतया विचित्राणि भवन्ति। रूपेषु च कर्मसु च घटनासु वा कल्पितं वा श्रुतिपरम्परया यथार्थवत् स्वीकृतं वा असम्भवत्वं ख्यातोत्प्रेक्षितयोरुभयविधयोः कथानकयोर्निवेश्यं भवति। ख्यातेषु कथानकेषु रसविशेषानुभावनाय, विचारविशेषप्रतिपादनाय वा कवयस्तत्प्रकरणेषु किमपि नवीनं स्वकल्पितं योजयितुं शक्नुवन्ति योजयन्ति च। यत्र रूपेषु च घटनासु च असम्भवत्वम् (अलौकिकत्वम्) प्रतीयते, तत्र कस्यचित् स्थायिभावस्य अनुभूत्या वा अनुमित्या वा सार्धं विस्मयोऽप्यनुभूयतेऽनुमीयते हि वा।

यत् कथामुक्तम् अकथात्मकं वा कथाबद्धं कथात्मकं वा वस्तु आधृत्य किमपि काव्यं रच्यते, तत्र प्रस्तुतम् इत्यपि कथ्यते। उपमेयमपि अप्रस्तुतम् इति कथ्यते। यः कथयति यत् वस्तु वा प्रस्तुतं वा अनाधृत्यैव काव्यं रचयितुं शक्यते रच्यते वेति तस्यैतत् कथनं शून्यस्य पटलत्वं विधाय केनापि मनुष्यरूपचित्रकारेण (न ईश्वरेण) चित्रं रचयितुं शक्यते रच्यते वेति कथनेन तुल्यमेव। किन्तु यद् वस्तु प्रस्तुतं वा काव्याधाररूपत्वेन प्रयोज्यते, कामं तत् सम्भवमेव किं न स्यात्, तदपि सर्वत्र कल्पितमेव भवति इत्युपगमनं न साधु तथापि रामचन्द्रशुक्लस्य कल्पितं रूपविधानं द्विप्रकारकं भवति–

हरिश्चन्द्र दीक्षितः

प्रस्तुतरूपविधानं च अप्रस्तुतरूपविधानं चेति । इदं प्रस्तुतरूपविधानम् अस्माकं पूर्वेषाम् आचार्याणां विभावपक्षोऽस्ति इति (रसमीमांसायां प्रस्तुतरूपविधानवर्णने) यद् वचनं तस्य समीचीनत्वं न बोद्धुं शक्नोमि । काव्ये यत् प्रत्यक्षानुभूतं वर्ण्यते, प्रत्यक्षसदृशं हि पुराणेतिहासाभ्यां लभ्यते वा तत् कथं भवितुं शक्नोति कल्पितम् उत्प्रेक्षितं वा ?

यदुपमानरूपत्वेन प्रयोज्यते, तद् अप्रस्तुतमिति कथ्यते । आलम्बनस्य च उद्दीपनानां च व्यक्तानुभावस्य आश्रयस्य च तथैव गिरिनिर्झरवनमृगादीनां तद्भावोद्दीपकत्वात् पृथक् वास्तविकानां रूपचेष्टाकर्मणां यद् वर्णनं क्रियते, तत् प्रस्तुतस्य वर्णनमिति अथवा प्रस्तुतवर्णनमिति कथ्यते । काव्ये इदमेव भवति प्रस्तुतम् । प्रस्तुतस्यैव उपमेयत्वम् । प्रस्तुतस्य वर्णने यदुपमानरूपं नियोज्यते तदप्रस्तुतमिति कथ्यते । उपमानरूपमप्रस्तुतं क्वचित् प्रस्तुतस्य तेन सह सादृश्यस्य प्रदर्शनाय, क्वचित् तस्मिन् (प्रस्तुते) तस्य (अप्रस्तुतस्य) एव आरोपाय कल्प्यते । कस्मात् ? प्रस्तुतस्य सुरुचिकरं कुरुचिकरं वा प्रभावं वर्धयितुं स्थायि (मनो-) भावं तीव्रयितुं च । यद्यपि क्वचित् कदाचित् वास्तविकरूपस्वभावचेष्टावर्णनमपि भवितुं शक्नोति काव्यम् । किन्तु बहुधा विभावादीनां वर्णने गिरिनिर्झरादीनां वर्णने च अप्रस्तुतस्य योजनं विना काव्यरचना भवत्यशक्या ।

प्रस्तुतस्य अभावे अप्रस्तुतस्य योजना न सम्भवति । यत्र रूपकातिशयोक्तौ समासोक्तौ वा काव्यवाक्यार्थेषु केवलम् अप्रस्तुतस्य वर्णनं दृश्यते, तत्रापि प्रकरणे प्रस्तुतं वर्तत एव ।

संयोगवियोगादिभिर्नवस्य असम्भवस्य च कल्पना केवलं रूपेषु हि सम्भवति, न कस्मिंश्चिदन्यस्मिन्निन्द्रियविषये ।

साधारणतया मूर्तस्य प्रस्तुतस्य मूर्तेनैव अप्रस्तुतेन सह एवम् अमूर्तस्य प्रस्तुतस्य अमूर्तेनैव अप्रस्तुतेन सादृश्यस्य प्रदर्शनं समीचीनं भवति । किन्तु क्वचिन् मूर्तामूर्तयोरपि सादृश्यप्रदर्शने न जायते

हरिश्चन्द्र दीक्षितः

कापि प्रभावक्षतिः, यथा– सन्तः खलस्य वचनानि कथं (कथा) सहन्ते, यथा गिरयो बिन्दूनाम् आघातान इत्यत्र ।

रूपकातिशयोक्तौ क्वचित् लक्षणया अनुमापकाः शब्दार्थप्रयोगा अपि विधातुं शक्यन्ते । क्वचित् कस्यचिच्छब्दस्य उच्चारणध्वनिस्तं ध्वनिमनुमापयति यः कस्यचिज्जडस्य चेतनस्य वा सत्त्वस्य भवति । ईदृशः प्रयोग आंग्लभाषायां यवनभाषागृहीतशब्दे अनोमोटोपोइया इति कथ्यते । किन्तु वस्तुतोऽयं चमत्कारोऽनुप्रासेन सह माधुर्यस्य ओजसो गुणस्य वा योगेन सम्यक्तरं सम्पाद्यते । क्वचिच्छब्दार्थै उक्तम् अप्रस्तुतं भवति अनुक्तस्य प्रस्तुतस्य अनुमापकम् । किन्तु यत्र प्रस्तुतम् अनुक्तं भवेत् तत्र उक्तेन अप्रस्तुतेन ईदृशेण भवितव्यम्, यस्य प्रस्तुतेन सह सादृश्यसम्बन्धः सर्वेषां सामान्यबुद्धीनां पाठकानां पूर्वतो विदितो भवेत् सरलतयाऽनुमेयो वा । सादृश्यस्य, सादृश्येण आरोपस्य विधाने वा कविना स्वकल्पनाशक्तिः प्रयोज्या भवति । पुनरौपम्येन च 'रसेन' च तेभ्यो दोषेभ्यो रहितेन भवितव्यम्, ये काव्यशास्त्रेषु औपम्यदोषा इति च रसदोषा इति च व्याख्याताः सन्ति । वस्तु कामं विभावादिवर्णनरूपं स्यात्, रसानुभावकविभावादिस्वरूपत्वाद् गिरिनिर्झरादिरूपवर्णनात्मकं वा तत्र प्रत्यक्षस्मृतिकल्पनानां प्रयोगा एवमेव विधीयन्ते इति तथ्यस्य ज्ञानेन रामचन्द्रशुक्लेन 'रसमीमांसायाम् प्रत्यक्षरूपविधानं स्मृतरूपविधानकल्पितरूपविधानप्रस्तुतरूपविधान-अप्रस्तुतरूपविधानम् इति संज्ञितेषु पञ्चसु अध्यायेषु प्रत्यक्ष – स्मृति–कल्पना–प्रस्तुत–अप्रस्तुत विषये यद् बहुविस्तारेण उक्तमस्ति तस्याल्पमुपयोगित्वं सारल्येन स्पष्टीभविष्यति ।

अङ्गी रसः

अंगी रस इति कः ? यः कस्माचिद् गद्यपद्यप्रबन्धकाव्यात् नाटकाद् वा प्रामुख्येनानुभूयते । प्रामुख्येन अनुभूयमानेन रसेन सह येऽन्ये रसा अनुभूयन्ते ते अप्रमुखा इति कथयितुं शक्यन्ते । प्रमुखतया

अनुभूयमानेन रसेन अप्रमुखतया अनुभूयमानानां न भवति यथार्थतया अङ्गाङ्गिसम्बन्धः ।

तस्य रसस्य अंगित्वं विधीयते यस्य प्रमुखतयाऽनुभावनम् स्वोद्देश्यं निश्चित्य कविः किमपि कथानकं कल्पयति तदनुरूपं किमपि कथानकं पुराणाद् वा इतिहासाद् वा गृह्णाति, एवं यस्तस्य स्थायिभावस्य अनुभवरूपत्वेन सामाजिकैरनुभूयते, यो नायकस्य मनसि उद्बुद्धः सन् नाटकस्य वा प्रबन्धस्य वा समाप्तिं यावत् तिष्ठति। वाल्मीकीयरामायणस्य, रामचरितमानसस्य च अङ्गीरसो (युद्ध-) वीर एव यस्य स्थायिभाव उत्साहो रामस्य मनसि प्रमुखतया प्रबन्धस्य अन्तिमेंऽशे हि उदयति ।

अंगिरसत्वेन प्रायः शृंगार एव वा वीर एव गृह्यते यतोऽनयोः कमपि उद्दिश्य कथानकस्य विधानं सुकरं भवति । यद्यपि प्रबोधचन्द्रोदयेन सदृशं शान्तप्रधानमपि नाट्यकाव्यमुपलभ्यते, किन्तु शृंगारं वा वीरं वा विहाय अन्यं कमपि रसम् अङ्गिनं विधाय विघ्ननिवृत्तीष्टसिद्धिसाधनकर्मबहुलं प्रभावि च कथानकं विधातुं प्रायशो न शक्यम् ।

किन्तु प्रधानतया कस्यापि रसस्य अनुभावनम् अनुद्दिश्यापि कस्यापि रसस्य अनुभावनं विनापि सद्विचारचरित्रप्रेरणामेवोद्दिश्य कस्यापि महतः कर्मणः कर्तुः पुरुषस्य चरितमाधृत्य नाटकं वा काव्यं वा कर्तुं शक्यते । कालिदासस्य रघुवंशे प्रथमः सर्गः स्वतन्त्रं खण्डप्रबन्धकाव्यमस्ति । तस्मिन् यूना राज्ञा दिलीपेन गुरुं वशिष्ठं प्रति नन्दिनीं धेनुं प्रति च या श्रद्धाभक्तिः प्रदर्श्यते, सा केवलमनुमीयते । यदा राजा नन्दिनीधेनोर्भक्षणायोद्यतस्य सिंहस्य सम्मुखे स्वदेहं लोष्ठवत् पातयति तदापि सामाजिकैस्तस्य चरित्रस्य महत्ता अनुमीयत एव । आश्चर्यस्य वा विस्मयस्यापि नात्र अवश्यंभाविता । यद्याश्चर्यस्य मनागनुभवो भवेदपि, तर्हि स न भविष्यति रसरूपः ।

पश्चिमीयदेशेषु महद्भिः कविभी रचितानां प्रमुखनाट्यप्रबन्ध-

हरिश्चन्द्र दीक्षितः

काव्यानामनुशीलनाज् ज्ञायते यत् तानि नह्यरच्यन्त प्रमुखतया रसानुभावनाय सनातनसार्वभौमविचारप्रेरणाय वा ? तर्हि केनोद्देश्येन तानि रचितानि? तानि रचितानि सन्ति क्वचिन नियतेर्वा दुर्नियतेर्वा प्राबल्यस्य प्रदर्शनाय केनचिच्चारित्र्येण महतामपि भवति पतनमिति प्रदर्शनाय, क्वचिन् मनुष्याणां प्रकृतिनीचत्वस्य क्वचिन्मानवप्रकृतिवैचित्र्यस्य क्वचिच्च सुधारोपायबोधं विनैव मानवसमाजस्य विकाराणां प्रदर्शनाय च ।

कदाचिद् विश्वस्मिन् प्रबलतरमसत् दीर्घकालं यावत् समर्धमानं तिष्ठति । किन्त्वन्ततः तदसद् दैवीगत्या केनचित् प्रबलतरेण सत्-समर्थकेन विनाश्यत एव । सस्त्रीपुरुषबालवृद्धनिवासपुरग्रामान् दाहयन् मोदमानश्च कोऽप्यतिक्रूरोजनः स्वप्रमादेन अग्नौ पतित्वा भस्मीभवति बहुयातनया सह केनाऽपि दाह्यते, अन्यप्रकारेण घात्यते । यदि लोके कदाचिदेतादृश आततायी अदण्डित एव म्रियते, तथापि असत् तु समाप्नोत्येव । किन्तु नाटके वा प्रबन्धे यदि कोऽपि महापापिष्ठ आततायी नाटकस्य वा प्रबन्धस्य वा समाप्तिं यावत् जीवितश्च अदण्डितश्च तिष्ठति, तर्हि असत्यमेव जयते इत्येवोपगमिष्यते । अतस्तादृङ् नाटकं वा प्रबन्धकाव्यं वा न रचितव्यम् यस्मिन्नाततायी दुष्टः तत् समाप्तिं यावद् अदण्डितश्च जीवितश्च तिष्ठति अथवा यस्मिन् मानवसमाजस्य दोषा एवं प्रदर्श्यन्ताम् यत् तेषां स्वाभाविकत्वम् च अपरिहार्यतया सनातनत्वं च प्रतीयेत । भारते आंग्लसाहित्यप्रवृत्त्यनुकरणे यानि एतादृशानि गद्यपद्यनाट्यप्रबन्ध-कथाकाव्यानि रचितानि सन्ति येषु मनुष्यचरित्रदोषाणाम् असुधार्यं स्वाभाविकत्वम् नितान्तविवेकरहितमनोविकारानुसज्जितत्वं च प्रदर्शितमस्ति, तानि मानवसंस्कारप्रवृत्तिप्रतिकूलान्युपेक्ष्याणि च किं कोऽप्येक एव रसः ? रसो वस्तुत एक एव । विविधाः रसास्तस्यैकस्य हि विवर्त्ता इत्यप्येको मृषा विचारः प्रचारितोऽस्ति । यदि रस एक एव, तर्हि केवलेन एकेनैव स्थायिभावेन भवितव्यम्, एकयैव

हरिश्चन्द्र दीक्षितः

मूलप्रवृत्त्या वा । सर्वेषां स्थायिभावानां द्विरूपत्वमेव–सुखरूपत्वं दुःख–रूपत्वं वा ? तर्हि सर्वैरपि सुखिभिर्वा दुःखिभिर्वा भवितव्यम् । कस्मात् स्थायिभावविरोधविचारो वा रसविरोधविचारो वा ?

आत्मानन्दः सुखदुःखोभयरहितः निरनुभूत्यवस्थः । केऽपि स्था–यिनो भावाः सुखरूपा भवन्ति, केऽपि दुःखरूपाः । काव्यरसा भवन्ति केऽपि सुखरूपाः, केऽपि दुःखरूपाः । नाट्यकलायाः काव्यत्वस्य वा चमत्कारास्यानुभूतये सदुःखसुखरूपेष्वपि रसेषु मनुष्याः प्रवर्तन्ते ।

साधारणमनोरञ्जनाद् रसस्य भेदः नाट्यकाव्यरसप्रतीतौ मनसः परितोषेण सह बुद्धेरपि भवति परितोषः, तत्र केऽपि सद्विचारा अपि जायन्त इत्यस्ति श्रव्यदृश्यकाव्यानुशीलनजन्यरसप्रतीतेरन्येभ्योमनो–रञ्जनेभ्यो भेदः, यं स्पष्टतया रामचन्द्रशुक्लो न व्याख्यातुमशक्नोत् ।

हरिश्चन्द्र दीक्षितः

साधारणीकरणविषयकं रामचन्द्रशुक्लस्यैव मतं साधु

रसानुभावनाय नाट्ये च काव्ये च पूर्वतः साधारणीकृतस्य आलम्बनस्य, साधारण्येन प्रतीयमानानामेव उद्दीपनानां च योजनं क्रियते। किन्तु साधारणीकरणस्य साधारणीभवनस्य वा प्रक्रिया नाट्यस्य वा काव्यस्य वा अनुशीलने प्रारब्धे हि प्रारभत इति मान्यता चेत्, तर्हि भट्टनायकेन साधारणीकरणस्य आविष्करण निश्चयमेव काव्यशास्त्रीयविचारसमृद्धौ महान् योगः। एवमेव रामचन्द्रशुक्लेनाविर्भावित आलम्बनमेव साधारणीक्रियेत इति विचारोऽपि काव्यशास्त्रस्य महानुपकारः। कवेरनुभूतेः साधारणीकरणस्य सम्भावनाया दिश्यग्रसरणेऽप्यस्य विचारस्य महत्त्वं नापचीयते।

शुक्लेन प्रस्तावितस्य आलम्बनस्य साधारणीकरणस्य विरुद्धं नगेन्द्रेन यदेतदुक्तमस्ति–शुक्लस्य (साधारणीकरणविषयकं) मतं भट्टनायकाभिनवगुप्तयोर्मताभ्यां भिन्नमस्ति इति तत् एवमेव 'शुक्लस्य' साधारणीकरणं च व्यक्तिवैचित्र्यवादश्चेति नामवति निबन्धे साधारणीकरणसिद्धान्तस्य नास्ति शास्त्रीयविवेचनम्, (तत्र) पुनराख्यानमेव प्रमुखम् इति एतच्च अशास्त्रीयमेव प्रतिवचनम्। उद्दीपनानि च व्यभिचारिभावाश्च, आश्रयश्च स्थायिभावश्च कस्मान्न साधारणीक्रियन्त इति अस्मिन् निबन्धे पूर्वमेवोक्तमस्ति। कवेरनुभूतिः साधारणीक्रियत इति सम्भावनाऽपि निराकृताऽस्ति। विश्वनाथेन केवलमालम्बनस्य साधारणीकरणं न मतमस्ति। यस्य कर्मविशेषस्य सम्पादने नाट्यकाव्यगतः कोऽपि जनो यं स्थायिभावं स्वानुभावेष्वभिव्यनक्ति, तं कोऽपि सामाजिको नानुभवति। सामाजिकस्तमेव स्थायिभावमनुभवति य 'आश्रयस्य' मनसि आलम्बनविशेषेण उद्बोध्यते। सुमहद्गुरोः किन्तु जडस्य धनुष उत्तोलने रामो यमुत्साहं व्यनक्ति, बहुविस्तारस्य पुनः किन्तु जडस्य समुद्रस्य उल्लंघने हनुमांश्च यमुत्साहं व्यनक्ति तं सामाजिका नानुभवन्ति। सामाजिकास्तदश्चार्यं तं विस्मय वाऽनुभवन्ति यं रङ्गभूमिस्थिता अन्ये राजानः, समुद्रतटस्थिता अन्ये

हरिश्चन्द्र दीक्षितः

वानराश्चानुभवन्ति । अतः किमपि जडं सत्त्वमभिलक्ष्य नाट्यकाव्यगतः कोऽपि जनः कस्मिंश्चिद् अलौकिके कर्मणि यं शक्त्युत्साहं प्रदर्शयति तमपि साधारणीकरणबलात् सामाजिका अनुभवितुं शक्नुवन्ति इति यद् भट्टनायकस्य साहित्यदर्पणकर्तुश्च मतमाभाति तदशुद्धम् । कोऽपि साधारणः सामाजिकः रावणेन सह योद्धुमपि न शक्नोति, किन्तु आलम्बनविशेषेण प्रेरितत्वात् स रामस्य उत्साहमनुभवति ।

राज्ञो जनकस्य पुष्पवाटिकायां सीतया रामस्य, रामेण सीतायाश्च दर्शनस्य प्रकरणे यं शृङ्गाररसप्रतीतिं विचारयन्ति, ते काव्यशास्त्रविशेषज्ञास्तद्विचारणावसरे शृङ्गाररसस्य स्वरूपं कस्माद् विस्मरन्ति इत्यहं न जाने। कान्ताकामिनोः मिलनं विना संयोगं विना वा कथं शृङ्गाररसप्रतीतिः सम्भवति । येन केनापि कविना जनकपुष्पवाटिकायाः प्रकरणं कल्पितमस्ति, तस्योद्देश्यम् आसीत् सीतायाः रामं प्रति उत्कटरत्यभिलाषोद्बोधस्य रामस्य मनसि सीतां प्रति क्षीणाभिलाषोद्बोधस्य प्रदर्शनम् । सामाजिक इमामेवानुरागमिलनाभिलाषमनुमिमाति । तस्मिन् प्रकरणे कविः सीतां प्रति रतिं नानुभवति इत्यनेन कारणेन तत्र सामाजिकानां न शृङ्गाररसप्रतीतिरिति या कल्पना क्रियते सा मृषा । तत्र कविः शृङ्गारं नानुभावयितुमिच्छति, अत एव न शृङ्गाररसानुभूतिः।

कुमारसम्भवे महाकविकालिदासेन पार्वतीशंकरयोः कामरतिः साधारणस्त्रीपुरुषकामरतिवद् एवं वर्णिताऽस्ति, यत् शृङ्गाररसरूपत्वेन तां रतिं केनचिद् व्यवधानेन सह व्यवधानं विनाऽपि वा सर्वेऽपि सामाजिका अनुभवन्ति । किं तर्हि शंकरस्य पार्वतीं प्रति या रतिः कामक्रियासु प्रकाशिताऽस्ति सा रतिः प्रथमं कालिदासेनाप्यन्वभूयत । शकुन्तलादुष्यन्तयोः प्रणयस्याख्यानं प्रथमं महाभारते ह्युपलभ्यते । तत एव कालिदासादीनां तद्विषयकं ज्ञानम् । किं तर्हि शकुन्तलां प्रति दुष्यन्तस्य रत्यभिव्यक्तिः कालिदासेन कल्पिताऽस्ति अथवा किं कालिदासेन प्रथमं शकुन्तलां प्रति काल्पनिकी रतिरन्वभूयत ।

हरिश्चन्द्र दीक्षितः

शकुन्तलायाम् ईदृग्विधं कमनीयं रूप सौन्दर्यं च यौवनं चासीत् यत् सा कस्यापि काम्या भवितुम् अशक्ष्यत् कामं सा तं नैवाऽकामयिष्यत । किमपि स्त्रीरूपं प्रति वा पुरुषरूपं पात्रं प्रति वा कवेरस्ति काऽनुभूतिरित्यस्य कोऽपि कविः स्वकल्पनया स्वकल्पनां न नैव किमपि पात्रम् एवंविधिनोपस्थापयति यत् तद् यथा 'आश्रये' कमपि स्थायिभावविशेषमुद्बोधयति, तथैव तमन्येषामपि मनस्युद्बोधयेत् इत्यनेन सह न कोऽपि सम्बन्धः । अतः कवेरनुभूतिर्न साधारणी क्रियते । स्वकल्पितस्य वा ख्यातस्य वा विभावादिकस्य वर्णने कवेरनुभूतिः का आसीदिति नाटकस्य वा प्रबन्धकाव्यस्य वा अनुशीलने निमग्नः कः सामाजिकश्चिन्तयति ?

इतिहासे वा पुराणे वा कस्यापि जनस्य चरितम् ईदृगस्ति यत् सामान्यस्वभावा लोकजनास्तेन सह भावात्मकमैक्यं न स्थापयितुं शक्नुवन्ति । किन्तु काव्यविशेषे स्थापयितुं शक्नुवन्ति । तत्र किं घटितमस्ति ? कविना पात्रविशेषस्य चरित्रात् तदनौचित्यं निवारितमस्ति यस्य कारणेन स (पुराणेतिहासप्रसिद्धजनविशेषः) सहानुभूतेः पात्रं न आसीत् । अत्रापि कवेरनुभूतेः साधारणस्योपगमनं व्यर्थमेव ।

यत्र स्त्रीपुरुषयोर्मध्ये द्वयोः पुरुषयोर्मध्ये वा मनुष्यसदृशाचरणायोर्देवादिसत्त्वयोर्मध्ये वा उत्प्रेक्षितो वा ख्यातो आलम्बनाश्रयसम्बन्धः प्रदर्श्यते तत्र तस्मिन् नैतिकत्वरूपौचित्येन भवितव्यमेव । अनैतिकत्वरूपानौचित्यं रसप्रतीतौ महत्तमो विघ्नः । यदि रामचन्द्रशुक्लआलम्बनाश्रयसम्बन्धे नैतिकतायाः स्थितिं परमावश्यकतया सम्पादनीयां मन्यते, तर्हि तस्य को दोषः । आश्रयेण सह (समभावानुभवरूपं) तादात्म्यं हि सामाजिकस्य भवति रस इति रामचन्द्र शुक्लस्य मते दोषस्य दृष्टुर्नगेन्द्रस्यैव दोषः । यत्र आलम्बनं प्रति आश्रयस्य स्थायिभाव औचित्येन प्रवर्तते, तत्र भवति तेन सह सामाजिकस्य तादात्म्यम् न तत्र यत्र स्थायिभावोऽनौचित्येन प्रवर्तते ।

व्यक्तिरेव साधारणीक्रियते न जातिरित्यपि शुक्लस्य मतं

हरिश्चन्द्र दीक्षितः

निर्दोषमेव। जातौ तु साधारण्यं भवत्येव ।

कालिदासो न शकुन्तलामपश्यत्, न च दुष्यन्तम् न च रावणम् । अत: स: कोऽप्यन्य: कविर्वा, सर्वेऽपि सामान्या जनाश्च शकुन्तलायां दुष्यन्ते च यौवनसौन्दर्यस्य तानि सर्वाणि लक्षणानि कल्पयन्ति यानि सुन्दरतमायां स्त्रियां सुन्दरतमे पुरुषे वा सम्भवन्ति । एवं रावणे विकरालत्वस्य दुराचारित्वस्य च तानि सर्वाणि लक्षणानि कल्पयन्ति यानि विकरालतमे दुराचारितमे च पुरुषे सम्भवन्ति । अत: पूर्वकाल-भूते 'आलम्बने' व्यक्तिसंज्ञैव स्वकीयत्वेन शिष्यति, अन्यत् सर्वं भवति जातिसमानमेव । आलम्बनस्य यदालम्बनत्वम्, य आलम्बन-त्व-धर्मो वा तद् वा स वा आलम्बनस्य व्यक्तिनामविशिष्टं जाति-त्वमेव । अत: व्यक्तिस्तु विशेष एव भवति, तस्मिन् ईदृश: सामान्यो धर्म: प्रतिष्ठाप्यते, यस्य साक्षात्कारेण सर्वेषां श्रोतॄणां पाठकानां वा मनस्सु अल्पमात्रो वा बहुमात्रो वा एक एव (स्थायि) भाव उद-यति' इत्येतदपि आचार्यशुक्लस्य तर्क: साधुरेव ।

आश्रयेण सह सामाजिकानां 'तादात्म्यं' भवति । स्थायिभावा: सूक्ष्मत्वात् सामान्या हि भवन्ति । व्यभिचारिण: केवलमनुमीयन्ते । उद्दीपनान्यपि साधारणान्येव भवन्ति । अत: आलम्बनस्यैव साधा-रणीकरणं शिष्यति । वस्तुत: कविना पूर्वत एव स्वानुभूतेर्निरपेक्ष-तया साधारणीकृतमेवालम्बनम् उपस्थाप्यते ।

रसानुभाविकाव्यरचनावसरे कविर्विचारयति यत् कीदृग्विध-मालम्बनम् आश्रये च अन्येषां सर्वेषामपि चित्तेषु च तमेव स्थायिभाव-मुत्पादयितुं शक्नोति इति । अन्येषु सर्वेषु कविरपि एको भवति। इत्यनेन प्रमाणेनापि कवेरनुभूते: साधारणीकरणं न सिद्ध्यति । अतो नगेन्द्रमहोदयस्य कवेरनुभूते: साधारणीकरणस्य साधनाय विहित: सर्वोऽपि प्रयासो निष्फल एव सिद्ध्यति। आलम्बनेन भावस्यानुभूत्या प्रथमं कवेर्मनसि उत्पन्नया भवितव्यम्' इति शुक्लस्यैव वाक्यं कवेर-नुभूते: साधारणीकरणस्य सम्भावनाया: बीजं प्रतिभाति ।

हरिश्चन्द्र दीक्षित:

किं रस आस्वाद्योऽप्यस्ति

विदुषा नगेन्द्रेन स्वकीये रससिद्धान्तनामके ग्रन्थे लिखितमस्ति यत् प्रमातृगतो रस आस्वादरूप एव। किन्तु 'भरतेन, लोल्लटेन च शंकुकेन च प्रतिपादितो रसस्तु निश्चयमेव वस्तुगतः। स रङ्गमञ्चे काव्यकौशलेन नाट्यकौशलेन च सृज्यते। स आस्वाद्य एव भवति न आस्वादरूप' इति। अनुभाव्य इत्यर्थे आस्वाद्य शब्दस्य औपचारिकः प्रयोगः। अस्याभिधेयार्थोऽस्ति चर्व्यं इति भक्ष्य इति। यथार्थतया अभिनेया वाचिका अनुभावा भवन्ति विस्मयादिबोधकाश्च गर्जनरोदनादिरूपाश्च अर्थहीनाः ध्वनयः। अनुभाववर्णनात्मकाः काव्यवाक्यार्था न भवन्त्यभिनेयाः। ते सर्वे पाठबोध्या एव। तर्हि किम् अभिनयकौशलस्य च काव्यस्य च रस इति नामान्तरं कल्प्यताम् ? भरतश्च लोल्लटश्च शंकुकश्च यदि कामपि 'त्रुटिं' कुर्वन्ति, तर्हि किं सा त्रुटिः विचाराऽशुद्धिः प्रामाण्या भविष्यति ?

किन्तु भरतादय ईदृशीं त्रुटिं न कृतवन्तः। अन्नं भवति स्वादहेतुः। तन्न भवति स्वादो, न च तस्य भक्षणम्। तथैव विभावस्थायिभावानुभावानाम् अभिनयो वा वर्णनं वा नहि भवति रसः। अभिनयावलोकनं काव्यपाठो वा भवति रसानुभूतिहेतुः। पुनर्नाऽहं जानामि यन् नगेन्द्रेण भावाभिनयसम्बद्धान् स्थायिभावांस्तथाबुधाः। आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ।। इत्ययम् आनुवंश्यः श्लोकोऽवहितो वा न वा। मनसा आस्वादयन्ति-केषां मनसा ? स्वेषामेव। अतो मुनिभरतस्यैव मते रसः प्रमातृगतो भवति। स्थायिभावो रामादावनुकार्ये हि भवति। नटे तदनुकरणात् तत् प्रतीतिरिति लोल्लटः। प्रतीतिकर्ता कोऽस्ति ? प्रमाता वा सामाजिको वा। नटः संस्थायिभावानुभावरामादीन् अनुकरोति इति को जानाति ? सामाजिकः। अनुमापकः कः? सामाजिकः। अतः शंकुकस्यापि मते रसानुमितिः प्रमातृगतैव।

हरिश्चन्द्र दीक्षितः

अभिनवगुप्तस्य वञ्चनाया अन्याः सम्भावनाः

पूर्वमेव रसनिष्पत्तिप्रकरणे अभिनवगुप्तस्य वञ्चकत्वमुद्घाटितमस्ति । तत्कृता अन्या अपि काश्चिद् वञ्चनाः सम्भाव्यन्ते । रससिद्धान्तकृता नगेन्द्रेण लिखितमस्ति-अभिनवगुप्तेन भरतस्य रसनिष्पत्तिविषयकं मतं तन्मौलिकरूपे न प्रस्तुतम्, तस्य स्वमतानुकूलं 'पुनराख्यानं कृतं वा । भरतसूत्रस्य लोल्लटप्रभृतीनां व्याख्यातॄणामभिनवभारत्याम्, ध्वन्यालोक-लोचने च उद्धृतासु व्याख्यासु स्वकृतव्याख्यासाधुत्वसमर्थनाय विकृतिपरं परिवर्तनं कृतमस्ति । इत्येतद् वचनं प्रमाणयति यत् स्वयं नगेन्द्रस्य मते अभिनवगुप्तेन शास्त्रीयप्रवञ्चना कृताऽस्ति । किन्तु यतोऽसौ विद्वान् अभिनवगुप्तस्य व्याख्यायां काश्चिद् दोषान् दृष्ट्वाऽपि स्वयमपि तस्यैव समर्थकोऽस्ति अतस्तेन शिष्टाचारच्छद्मना सा वञ्चना प्रकाशिताऽस्ति । अस्य निबन्धस्य कर्ता अभिनवगुप्तस्य व्याख्यायाः नास्ति समर्थकः । स तस्मिन् दोषान् पश्यति वञ्चनां चापि । वञ्चनां स्पष्टतया निर्दिशति च ।

अभिनवगुप्तस्य प्रथमां वञ्चनां लक्षयन्तु विद्वांसः । मुनिभरतस्यैकं वाक्यांशमाधृत्य स निर्गमयति-तत्काव्यार्थो रस इति । वाङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावा इति एतद् भरतस्य पूर्णं वाक्यम् । भावा इति के ? अष्टौ स्थायिनः त्रयस्त्रिंशद् व्यभिचारिणः पुनरष्टौ च सात्त्विका भावाश्च इति । समग्रतया एकोनपञ्चाशत् । एतेषामेव वर्णनात् काव्यार्थो निष्पाद्यते, काव्यार्थे एतेषु हि वर्ण्यन्ते वा विभावानुभाववर्णनरूपत्वात्, अभिनीयन्ते वा विभावानुभावाभिनयरूपत्वात् । अतो वर्णिता वा वाक्यरूपवाचिकानुभावाभिनीता वा भावा काव्यार्थान् भावयन्ति उत्पादयन्ति, न रसान् । कस्मात् ? एकोनपञ्चाशद् भावेषु स्थायिभावाष्टकस्य सम्मिलितत्वात् । रसस्तु (आलम्बनोद्दीपन-) विभावानां च (स्थायिव्यभिचारिभावानाम्) अनुभावनां च वर्णनेन वा अभिनयेन वा

निष्पाद्यते । भावानामेव वर्णनं कवेर्भावं काव्यवर्ण्यं वा प्रकाशयति । अतएव भरतेन– 'कवेरन्तर्गतं भावं भावयन् भाव उच्यते । इत्यप्युक्तम् । अतः काव्यार्थो न भवति रसः । सोऽवगतो भवति रस हेतुरेव ।

को विद्वानासीदभिनवगुप्तस्योपाध्यायत्वेन गौरवान्वितः । भट्टतौतो भट्टेन्दुराजो वा । येन केनाप्युपाध्यायेन शंकुकस्य रसनिष्पत्तिव्याख्या विवेचिता बहुभिर्दोषैर्विदूषिता च, अभिनवगुप्तेन कस्मात् स्वसम्मान्यस्य गुरोर्नाम न अलेखि ? सा विवेचना अभिनवगुप्तेनैव कृतेति बलीयसी सम्भावना । कस्मात् स्वस्यैव नाम्ना न कृता सा विवेचना ? स्वच्छद्मताटस्थ्यप्रदर्शनाय ।

सांख्यवादिव्याख्याविचारः

कस्यापि सांख्यवादिना कृताऽपि व्याख्या अभिनवगुप्तेन उदाहृताऽस्ति । किन्तु तस्यापि नाम स नह्यस्मरत् । किं तस्य नाम न अज्ञासीत् ? एतदसम्भवम् । इयं व्याख्या न केनाप्यन्येन विहिताऽस्ति । स्वयमभिनवगुप्तेन कल्पिताऽस्ति कस्मात् ? स्वस्य विद्वत्ताप्रदर्शनाय । सांख्यात् शैवाद्वैतदर्शनमस्ति वरीयस् इति साधनाय, रसनिष्पत्तिव्याख्यायां दार्शनिकत्वस्य प्रवेशाय । रसनिष्पत्तिव्याख्यायां दर्शनमपि उपयोज्यमस्ति इति विचारस्य समावेशनस्य महत्पापमभिनवगुप्तेन आचरितमस्ति । अभिनवगुप्तेन रसनिष्पत्तिव्याख्यायां व्यर्थमेव 'दर्शनं' समाविष्टम् इति कोऽपि न कथयेदिति कारणेन अभिनवगुप्तेन सांख्यवादी व्याख्या कल्पिताऽस्ति ।

सा व्याख्यास्ति इयम्- (येन लभ्यधायि) सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव । सांख्यदृशा सुखदुःखस्वभावो रसः । तस्यां च सामग्र्यर्था दलस्थानीयाः (चणकमाषादिदलस्थानीयाः) विभावाः ; संस्कारकाः (घृतमरिचजीरकादितुल्याः) अनुभावव्यभिचारिणः । स्थायिनस्तु तत् सामग्रीजन्या आन्तराः सुखदुःखस्वभावा इति ।

हरिश्चन्द्र दीक्षितः

अधुना दृश्यताम्-इयं व्याख्या कथं खण्डिता च उपहसिताऽस्ति-तेन 'स्थायिभावान् रसत्वमुपनेष्यामः इत्यादावुपचारमङ्गीकुर्वता ग्रन्थविरोधे स्वयमेव बुद्ध्यमानेनदूषणाविष्करणमौख्यात् प्रामाणिको जनः परिरक्षित इति किमस्योच्यते । यत् त्वन्यत् प्रतीतिवैषम्यप्रसङ्गादि (रसस्य सुखदुःखोभयात्मकत्वोपगमने यदन्तवैषम्यम्) तत् किमत्रोच्योताम् ।

अधुना धीमन्तः पश्यन्तु अस्य खण्डनस्य मौर्ख्यम् । येन भरत-मुनिना 'स्थायिभावान् रसत्वमुपनेष्याम' इत्युक्तम्, तेन कस्मान् न सूत्रे स्थायिभावस्य ग्रहणं न कृतम् । कस्मात् स्वयम् अभिनवगुप्तेनो-क्तम् स्थायिप्रतीतिरनुमितिरूपा वाच्या न रसः । अत एव सूत्रे स्था-यिग्रहणं न कृतम् तत् प्रत्युत शल्यभूतं स्यात्' इति ।

सूत्रे अनुभावव्यभिचारिभिः कस्य विभावस्य विभावानां वा ग्रहणमुक्तमस्ति । तस्य रसस्य स्थायिभावस्य यस्यानुभावनं सामा-जिकेषु कविरिच्छति । स्थायिभावोऽनुकार्येऽवर्तत । रङ्गमञ्चे अनु-कारी नटोऽस्ति 'विभावः ।' तस्मिन् स्थायी न विद्यते । अतएव सांख्यवादिव्याख्यामपि स्थायिभावो न गृहीतः । भरतेन अष्टौ स्था-यिभावाश्चाष्टौ रसा मताः । तदौपम्यभूतानि अष्टप्रकाराणि माष-मुद्गादीनि दलानि अपि भवितुं शक्नुवन्ति अष्टप्रकारस्वादजन-कानि ।

अभिनवगुप्तः स्वकीयायां व्याख्यायां रसस्य सर्वथा आनन्दमय-त्वं निर्द्वन्द्वचिदनुभूतिरूपत्वं साधयिष्यति । अतः रसस्य सुखदुःखोभ-यात्मकत्वस्योपगमने वैषम्यं विसङ्गतिं वा पश्यति । एक एव कोऽपि रसो न भवति सुखदुःखोभयात्मकः । शृङ्गारहासवीराद्भुतवात्सल्य-भक्तिशान्ताः भवन्ति सर्वसुखा रसाः । किन्तु रौद्रबीभत्सशोकभया-नकेषु दुःखेन सहैव नाट्यकाव्यकलाप्रभावात् सुखमनुभूयते । अस्य तथ्यस्य अस्वीकरणमस्ति अभिनवगुप्तस्यैवाऽज्ञानम् ।

वञ्चकत्वस्य अन्यत् प्रमाणम्-किमभिनवगुप्तस्य वञ्चकत्वस्य

हरिश्चन्द्र दीक्षितः

किमन्यत् प्रमाणं लभ्यते ? लभ्यते । अभिनवभारत्याम् रसनिष्पत्ति-सूत्रव्याख्याकर्तॄणां क्रमोऽयमस्ति- लोल्लटशंकुक - सांख्यवादी-भट्टनायक-अभिनवगुप्ता इति । ध्वन्यालोकलोचनेऽस्त्ययक्रमः-भट्टनायक-लोल्लट-शंकुक - असंज्ञातबहुव्याख्याकर्तृसमूह अभिनव-गुप्ता इति । पण्डितराजो जगन्नाथोऽस्यां प्रवञ्चनायामभिनवगुप्तस्य सहायकोऽभूत् । तेन सर्वप्रथमम् अभिनवगुप्तस्य अभिनवगुप्तमम्मट-भट्टादिग्रन्थस्वारस्यानुसारा (!) व्याख्या उद्धृताऽस्ति । ततो भट्टनायकस्य यतः सोऽभिनवगुप्तस्य ऋणीति साध्यताम् । ततो नव्यानाम् इति कृत्वा तेन स्वकीया व्याख्या उदाहृताऽस्ति इति बोध्यते । चतुर्थः क्रमोऽस्तिपरेषां व्याख्यायाः । के ते परे इति नोक्त-म् । पञ्चमोऽस्ति क्रमो लोल्लटस्य, षष्ठोऽस्ति शंकुकस्य । अस्मादग्रे अज्ञातकर्तृका पञ्च अन्या व्याख्या उद्धृताः सन्ति । का इमे व्या-ख्याः ? ता एव या अज्ञातकर्तृकाः ध्वन्यालोके उद्धृता सन्ति । पण्डितराजेन तासां व्याख्यानां स्रोतो न उल्लिखितमस्ति । कस्मात् । यतो साधारणाः जनाः बुध्येरन् यत् पण्डितराजेन स्वपाण्डित्याद् इमा अन्विष्टाः सन्ति । इमा अपि व्याख्याः सांख्यवादिव्याख्यावत् अभिनवगुप्तस्यैव बुद्धेः कल्पनाः सन्तिः । कस्मात् स इमा अकल्प-यत् ? स्वव्याख्यायाः महत्त्वस्य साधनाय । अन्यथा क एतादृशो मूर्खोऽस्ति यः शुद्धं विभावम् (एव) शुद्धमनुभावं हि वा स्थायिमात्रं हि वा व्यभिचारिणं हि वा विभावानुभावव्यभिचारिणां त्रयाणां संयोगमेव वा अनुकार्यं वा सकलमेव समुदायं वा रसं वदेत् ।

नाट्यावलोकने रसानुभूतिः

नाट्यानुशीलनक्षमः मूर्खान् मूर्खतरोऽपि जानाति यन् नाट्या-भिनये स्थायिव्यभिचारिभावानाम् अनुभावाः कृत्रिमा एव भवन्ति । अनुभावानां कृत्रिमत्वात् कुतः स्थायिव्यभिचारिभावानां सत्यतया-प्रतीतेः सम्भावना । तथापि तेषामाभासिकी सत्यतापि जायते । अन्यथा कस्मान् नाटकानि रच्यन्ताम् कस्मात् सामाजिका-

हरिश्चन्द्र दीक्षितः

स्तेषामनुशीलने प्रवर्तन्ताम् ? विभावानां च स्थायिभावानुभावानां सत्यतया प्रतीतौ जातायां स्त्रिपुरुषयोः रतेरभिव्यक्तिं दृष्ट्वा व्याघ्रं वा राक्षस वा दृष्ट्वा को जनः प्रेक्षागारे स्थास्यति ?

यदि सुरापानाभिनयं कुर्वन् नटः सुरामेव पिबेत्, न रञ्जितं जलमेव, तर्हि मत्तो भूत्वा कथं सोऽभिनयं करिष्यति । यथा नटो रङ्गमञ्चेऽनुकरणं करोति तथा लोकेऽपि जना हासाय वा उपहासाय वा स्वदृष्टमनुकुर्वन्ति । यद् रङ्गमञ्चेऽनुक्रियते, तदपि लोके क्वचिद् भवत्येव । स्थायिनोऽनुकरणस्य तात्पर्यम् अनुभावानामनुकरणमेव । स्थायिभावो नीरूपत्वाद अननुकरणीयः । एतस्य स्पष्टस्य तथ्यस्य यस्तिरस्कारोऽभिनवगुप्तेन कृतः, छद्मना स्वस्य, उपाध्यायेन कारितो वा, स परमतखण्डनस्य निर्लज्जः प्रयासः स्थायिभावस्य नटेन प्रदर्शिता अनुभावाः कृत्रिमाः सन्तः किं कृत्रिमत्वेन सामाजिकैः गृह्यन्ते न वा ? यदि (कृत्रिमत्वेन) गृह्यन्ते, तदा कथं तै रतेरवगतिः इति यद् अभिनवगुप्तस्य वचनं तत् तस्य महद्वञ्चकत्वमेव यतः स ईदृग् अज्ञानी न भवितुं शक्नोति ।

अनुकारिणि नटे स्थायिनो मिथ्या प्रतीतिरेव रस इत्यवश्यं विचाराऽशुद्धिः । तथापि मम्मटेन तु लिखितमस्ति– रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां चर्व्यमाणो रस इति शंकुक इति । सामाजिकानां चर्व्यमाण इत्यस्य सोमेश्वरभट्टकृतसंकेतटीकायाम्–सामाजिकजनास्वाद्यमान इत्यर्थः कृतोऽस्ति । 'अन्यानुमीयमानविलक्षण इति विशेषणपदमप्यवेधयम् । मम्मटस्तु अभिनवगुप्तस्य पूजक आसीत् तस्य प्रतिष्ठापकः । तर्हि तेन कस्मात् शंकुकस्य व्याख्या एवं प्रस्तुताऽस्ति यत् सा सर्वशुद्धा व्याख्या प्रतिभाति ।

यदि नाट्याभिनये कृत्रिमैरपि अनुभावैस्तत्राऽसतोऽपि स्थायिभावस्य आभासो नोत्पद्यते तर्हि लोके कार्यरूपैरनुभावैः कारणरूपस्य स्थायिभावरूपपरचित्तवृत्तेरनुमानेऽभ्यासपाटवस्य क उपयोगः ? किन्त्वभिनवगुप्तो नाट्ये च काव्ये च अनुभावैः स्थायिनोऽनुमानस्य

स्पष्टमुल्लेखमेव नैवाऽकार्षीत् ।

सामाजिकानां मनसि वासनात्मया स्थितः कः स्थायी भाव उद्बुद्धः सन् रसरूपत्वेन आस्वाद्यते ? स एव यस्य व्यञ्जको अनुमापको वा भवति विभावो विभावादिर्वा । विभावो भवेद् भयस्य व्यञ्जकः, अनुभूयतां रत्यात्मकः शृङ्गार इति न भवति । रसो भवति स्थायिविलक्षण इति सत्यम् । किन्तु कस्यचित् स्थायिन एव रूपान्तरं भवति तथापि अभिनवगुप्तः स्वरसनिष्पत्तिव्याख्यायां स्थायिभावविशेषं नह्युदलेखीत् । मम्मटोऽभिनवगुप्तस्य एनं दोषमलक्षयत् । अतः सोऽभिनवगुप्तस्य व्याख्यायाम् अलिखत् - सामाजिकानां वासनात्मतया स्थितः रत्यादिको भवति अलौकिकचमत्कारकारी शृङ्गारादिको रस इति । अभिनवगुप्तः स्थायिभावान् नवसंख्यकान् मत्वाऽपि काव्यनाट्यरस एक एव इति प्रमाणयितुमयतत । लोके स्थायिभावविशेषानुभूतिर्भवति नाट्ये च काव्ये च स्थायिभावविशषरूपान्तरम् । अतः स्थायिविलक्षण एव रसः । नतु यथा शकुकादिभिरभ्यधीयत 'स्थाय्येव विभावादिप्रत्याय्यो रस्यमानत्वाद्रस उच्यते' इति । एवं हि लौकिकेऽपि किं न रस इति यदभिनवगुप्तस्य वचनं, तद् द्वेषजनितम् अज्ञानजनितं वा ।

भरतमुनेर्नाट्यशास्त्रं प्रथमं व्यरचि, ध्वन्यालोकस्तस्य पश्चात् । भट्टनायको भरतस्य सूत्रमवधार्य रसनिष्पत्तिं व्याख्यासीत् । तत्रैव स काव्यस्य शब्दानां-सार्थशब्दानां-भावकत्वमकल्पयत्, तत्कृतां भुक्तिं च । किन्त्वभिनवगुप्तो लोचनव्याख्यायामलिखत्-भोगीकरणव्यापारश्च काव्यरसविषयो ध्वननात्मैव, नान्यत् किञ्चित् । भावकत्वमपि (काव्यस्य) अस्माभिरेव वितत्य वक्ष्यते । (शब्दार्थयोः) द्वयोस्तु भावकत्वमस्माभिरेवोक्तम् इति । तर्हि अभिनवभारत्यां स्वरसनिष्पत्तिभूमिकायाम् तत्काव्यार्थो रसः काव्यात्मकादपि शब्दात् इति कस्मादुक्तम् ? भट्टनायकः स्वरसनिष्पत्तिव्याख्यां ध्वन्यालोकस्य रचनायाः पश्चाद् व्यदधाद् इति यदि प्रमाण्यतां, तर्ह्यपि

हरिश्चन्द्र दीक्षितः

काव्ये शब्दस्य=सार्थशब्दस्य, शब्दगतार्थस्य वा भावकत्वम्=निष्पादकत्वम्=उत्पादकत्वं हि भवति रसरूपत्वेन अनुभावस्य स्थायिभावविशेषस्य सामाजिके चित्ते, नहि व्यञ्जकत्वम्, रसस्य पूर्वतो न विद्यमानत्वात्। रसनिष्पत्तिव्याख्यायाम् अभिनवगुप्तस्य प्रवञ्चकत्वं पराकाष्ठां स्पृशति। रसः प्रथमं भाव्यते, ततो भुज्येत अनुभूयते–अत्र को दोषः ?

अभिनवगुप्तेन अभिनवभारत्यां विस्तीर्णायाः भूमिकायाः पश्चात् स्वव्याख्यामेवं प्रारभत–तत्र लोकव्यवहारे कार्यकारणसहचर इत्यादि। किन्तु नगेन्द्रमहोदयेन भूमिकाया एव एकोंऽशः तत्काव्यार्थो रस इति वाक्यत आरभ्य तत्र विघ्नापसारका विभावादय इति वाक्यं यावत् कस्मादुद्धृतः। ये रसस्य हेतवस्ते केवलं विघ्नापसारका एव। आश्चर्यम्।

रूपाणां च ध्वनीनामेव च दृष्टिश्रुतिगोचराणाम् अनुभावानां च लक्षणानामेव च अनुकरणं शक्यम्। अतिकटूनि भुक्ते मुखविकृतिसीसीध्वन्यश्रुपतनादीनि लक्षणानि। स्थायिव्यभिचारि (मनो) भावा स्वमनसो वोत्पन्नाः सम्वेद्याः। अतो नानुकरणीयाः।

शंकुक एतादृशो मूर्खः कथं भवितुमशक्ष्यत् यत् स स्थायिभावस्य अनुकरणम् अवक्ष्यत्। किन्तु यद्यसौ एतदेवावदत् तर्हि तद् वचनं कुन्ताः प्रविशन्ति, गङ्गायां घोष इत्यादिना सदृशं लाक्षणिकमेव मन्तव्यम्। नाट्याभिनये तु सर्वास्ववस्थासु सर्वासु व्याख्यासु भावानुभावानामनुकृतिरेव मन्तव्या। अतः कस्मात् शंकुकस्यैव सिद्धान्तोऽनुकृतिवाद इति संज्ञेयः।

नगेन्द्रेण शंकुकस्य मते स्वमतस्यारोपः

पुराणे वा इतिहासे वा श्रुतिपरम्परायां वा विख्यातस्य जनस्य स्वरूपं तच्चरितज्ञान स्रोतोभ्यः वयं सर्वे जानीम एव। यः स्वर्णरत्नमुकुटधारी हस्तधृतधनुर्बाणः स रामः, यः मयूरपिच्छमुकुटशोभी यस्य हस्ते क्वचिन् मुरली क्वचिच् चक्रम्, स कृष्णः। पुनर्नाट्यकाव्यगताः

हरिश्चन्द्र दीक्षितः

स्त्रीपुरुषाः स्वपरनामान्यप्युच्चारयन्ति । एतस्मिन् सत्ये सर्वविदितेऽपि नटो रामम् अनुकरोति कृष्णम् वा इति सोऽनुकरोति इत्येतदेव च कथं निश्चीयताम् इति विप्रतिपत्तिं कर्तुं कोऽपि धृष्ट एव उत्सहिष्यते । किं नटो न जानाति-अहं रामं च तस्यानुभावांश्चानुकरोमीति ? जानात्येव । किं सामाजिको न जानाति यन् नटोऽनुकर्तेति ? जानात्येव । व्याख्याकारोऽपि एकः सामाजिकः । अतः सोऽपि जानाति । अत इमेषु तथ्येषु स्वगुरुवचनेन शंकं उत्पादयित्वा अभिनवगुप्तोऽक्षम्यमपराध कृतवानस्ति ।

वाल्मीकिरामायणमस्ति इतिहासः श्रीमद्भागवतपुराणम् वेत्यस्य किं प्रमाणम् ? स्वपितुर्दशरथस्य आज्ञया रामो वनं गच्छति यथा वाल्मीकिरामायणे तथा रघुवंशे च रामचरितमानसे च । श्रीकृष्णो यथा श्रीमद्भावतं गाश्चारयति कंसं निहन्ति च तथैव सूर(काव्य) सागरे च । अतः शंकुकस्य मते नट इतिहासस्य रामादीन नानुकरोति, कविनिबद्धान् रामादीन् अनुकरोति इति यत् तथ्यं नगेन्द्रेन आविर्भावितम्, तस्य क उपयोगः ? राधाकृष्णयोरनुरागः श्रीमद्भागवते न वर्णितोऽस्ति, सूरसागरे वर्णितोऽस्ति । यदि श्रीमद्भागवतेऽपि वर्णितोऽभविष्यत् तर्हि नटेन तदनुकरणे किमन्तरमभविष्यत् । किन्तु नगेन्द्रस्यापि एकम् प्रयोजनम् आसीत्-कवेरनुभूतेः साधारणीकरणम् । अतो यथाभिनवगुप्तेन तथा तेनाऽपि 'पुनराख्यानं' कृतम् ।

रसनिष्पत्तिः समीचीनं व्याख्यानम्

मुनिर्भरतः स्थायिभावस्यानुकरणं नह्यमन्यत । किं तर्हि स स्थायिव्यभिचारिणां विभावानां तदनुभावानां चापि अनुकरणं नाऽमन्यत ? व्यभिचारिणोऽपि भवन्ति मनोभावाः क्वचिच्छरीरावस्थाः वा । तेऽपि अनुभावैर्वा लक्षणैर्हि वा अनुमेयाः । विभावाः (भरतस्य मते) भवन्ति द्विविधाः-स्थायिमनोभावस्य १- आलम्बनानि हेतवो वा २- उद्दीपनानि च । आलम्बनानि च उद्दीपनानि यानि

हरिश्चन्द्र दीक्षितः

मुनिभरतेन कर्त्रेग्राह्यानि मतानि स्वरूपत एव भवन्ति सर्वजनसाधारणानि साधारणीकृतानि वा। सामाजिकस्य कृते आश्रयोऽपि भवति विभावः, यस्मिन् आलम्बनेन उद्बोधितः स्थायिभावस्तत्सहोद्बुद्धा व्यभिचारिभावाश्च तिष्ठन्ति (यमाश्रयन्ति)। अनुभावा अपि आश्रये हि उत्पद्यन्ते, तन्मनसः स्थायिभावं च व्यभिचारिभावांश्च अनुमापयन्ति च। आलम्बनोद्दीपनानां स्वतः साधारण्याद् आलम्बने आश्रयस्य मनसि उद्बोधितः स्थायिभावः सामाजिकस्यापि मनसि उद्बोधितः सन् (नाट्यकाव्यानुशीलनावधि) रसरूपेणानुभूयते। अतो 'नाटके विभावानां चाश्रयस्य च रूपाणाम् आश्रयस्य अनुभावानां च अनुकरणात्, (श्रव्य-) काव्ये तेषां सर्वेषां वर्णनाद् वा रसो निष्पद्यते। इतीयं रसनिष्पत्तेः लघुतमा शुद्धतमा च व्याख्या। अनुकरणं भवति अभिनयात्मकम्, वर्णनं भवति वाक्यात्मकम्। नाटके श्रव्यकाव्यमपि योज्यते। नाट्ये च काव्ये च आलम्बनस्य साधारण्यात्- अस्वकीयत्वात् शोकादयो न भवन्ति सर्वथा दुःखरूपाः। नाट्यकलायाः काव्यसौन्दर्यस्य च प्रभावेन करुणादिष्वपि रसेषु दुःखेन सह सुखमपि अनुभूयते इति सर्वेषामशङ्क्योऽनुभवः।

साधारणीकरणविषयकं परिशिष्टम्

साधारण्यं वा साधारणीकरणं वा न केवलं तत्रापेक्ष्यते यत्र कवेरुद्देश्यं भवति रसानुभावनम्। अपितु अन्यत्राऽपि यत्र रसानुभावनं स कथमपि नहि उद्दिशति, उद्दिशति कस्यचिज् जडस्य वा चेतनस्य वा सत्त्वस्य जडचेतन समूहस्य वा वर्णनेन पाठकानां मनसि प्रायशः हर्षस्यानुभाविन्याः क्वचित् कदाचिद् विषादस्य वा अनुभाविन्याः रूपकल्पनायाः प्रेरणम्। कुत्र कविना ईदृश्यरसानुभाविनी हर्षहेतुकी कल्पना प्रेर्यते ? यत्र स रसानुभवहेत्वालम्बनत्वात् स्थायिभावविशेषोद्दीपनत्वात् च पृथक् पर्वतनिर्झरकाननसरित्सागरसरोद्रुमलतापुष्पमृगमयूरादिषु किमपि सत्त्वं वर्णयति। इमेषु कस्यचिद् वर्णने यदि साधारण्यं बाध्यते तर्हि हर्षोऽपि बाध्यते। पर्वतादीनाम्

अरसानुभाविनि हर्षानुभवहेतुकल्पनाकारिणि हि वर्णने कथं साधारण्यं भवत्युपपाद्यम् ? पर्वतादिषु कस्मिंश्चिद्वर्ण्यमाने सति लोके अर्थात् सम्भाविषु पाठकेषु नास्ति यद् यत् प्रसिद्धम्, न जनभावनासम्बद्धं वा तस्य तस्य नाम न स्मर्तव्यम्। येषां पौराणिकानाम् ऐतिहासिकानां वा नरदेवदानवादीनां विषये याभां पौराणिकीनाम् ऐतिहासिकीनां वा घटनानां विषये च सम्भाविनां पाठकानां न भवेत् श्रुतिपरम्परयैव अपेक्ष्यं ज्ञानम्, तेषां वा तासां वा अप्रस्तुतरूपत्वेन योजना न कर्तव्या, न च यथासम्भवं तत्रापि यत्र कवी रसविशेषमनुभावयितुमुद्दिशति। तद्विधेषु वर्णनेषु कविना स्वस्य एतादृश्याः कस्या अपि अनुभूतेः क्रियायाः वा वर्णनं न कर्तव्यम् या पाठकानामपि न भवितुं शक्नोतु। यदि कविः कस्मिंश्चित् निसर्गसुरम्यस्थलविशेषे तस्य वर्णनेन सह स्वप्रियायाः कस्यचिद् अन्यस्य सहस्थितस्य जनस्य वा संगतिं वर्णयति, तर्हि तस्य स्थलस्य च स्वप्रियायाः अन्यस्य जनस्य वा नाम्न उल्लेखो न कर्तव्यः, अथवा तयोर्वैयक्तिकत्वं न विशेषतया, तेन अवधापनीयम् स्यात्। इत्ययम् अरसानुभाविवर्णनेषु वर्ण्यस्य साधारणताया उपादानस्योपायः।

हरिश्चन्द्र दीक्षितः

रसविमर्शनामकेऽस्मिन् काव्यशास्त्रीये वाक्प्रबन्धे काव्यानुभाव्य-रसविषयकं यत् किमपि तज्जिज्ञासुभिर्ज्ञेयत्वाद् वर्तते, तस्य सर्वस्य संग्रहणं, विवरणं च विवेचनं च कृतमस्ति। अत्र अभिनवगुप्तस्य, मम्मटस्य, जगन्नाथस्य च रसनिष्पत्तिविषयकानि मतानि तर्कप्राबल्य विशेषेण खण्डितानि सन्ति। रसस्य ध्वन्यत्वमपि प्रबलतया खण्डित-मस्ति। अस्य ग्रन्थस्य कर्ता ध्वनिसिद्धान्तविरोधी। अनेन अन्येषु स्वकृतेषु प्रबन्धेषु समस्तध्वनि प्रपञ्चःविच्छेदितोऽस्ति। चिन्तने बुद्धिभ्रान्तिर्धावने पदस्खलनं च सर्वेषामपि सम्भवति। अस्मिन् ग्रन्थेऽपि दोषा अन्वेष्टुं शक्यन्ते। किन्तु यः कोऽपि विद्वान् अभिनवगुप्तमम्मट-जगन्नाथादीन् प्रति स्वपक्षपातस्य कारणादेवास्य दोषान् पश्यति स सादरं मया लिखितशास्त्रीयतर्कविवादाय समाहूयते।

विद्वान्सोऽध्यापकाश्च पाठ्यपुस्तकनिर्धारणाधिकारिणश्च इमं ग्रन्थं कृपया पठन्तु च पाठयन्तु च पाठ्यक्रमे निर्धारयन्तु इतीयं ममा-स्ति शास्त्रप्रसारसिद्ध्यै सविनया प्रार्थना। शुभं भूयात्।

विदुषामनुचरः
दीक्षितो हरिश्चन्द्रो नैमिषीयः

पत्रव्यवहार का पता-
हरिश्चन्द्र दीक्षित शास्त्री
८/३४ लवकुशनगर वार्ड
बिठूर, जिला कानपुर, (उ० प्र०)